विभीषणः	—राक्षसराजरावणस्यानुजः
चारपुरुषः कार्पटिकः	—मथुराधिनाथस्य लवणस्य प्रणिधिः
वृकमुखः	— ,, ,, ,,
सुग्रीवः	—वानराधिराजः
जाम्बवान्	—वानरराजः
वैश्वानरः	—सुग्रीवः
हनुमान्	—वानराधिराजप्रियमित्रं वानरराजः
वासवः	—स्वर्लोकाधिपतिः इन्द्रः
अवन्ध्यः	—राक्षसराजरावणस्य वृद्धामात्यः
भरतः	—दशरथमहाराजपुत्रः
सौमित्रिः	—दशरथमहाराजपुत्रः लक्ष्मणः
वशिष्ठः	—दशरथमहाराजकुलगुरुः
करभकः	—भरतराजमान्यः सेवकः

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ॐ

गूर्जरेश्वरपुरोहितकविश्रीसोमेश्वरदेवविरचितम्

उल्लाघराघवनाटकम् ।

श्रीकृष्णाय नमस्तस्मै [1]यं नत्वा न पुनः पुमान् ।
पङ्कसारेऽत्र संसारकासारे [2]कासरायते ॥ १ ॥

अपि च—

मूर्द्धानं मधुजिन्मुखं [3]मखपुमान् कण्ठं [4]नृकण्ठीरवो,
बाहू [5]बभ्रुरुरो मुरारिरुदरं दामोदरस्तेऽवतात् ।
मात्रा कंसभयार्त्तयेतिविहितां श्रुत्वाऽऽत्मरक्षां हरि-
र्बालोऽन्तर्विहसन्नशेषभुवनक्षेमङ्करः पातु वः ॥ २ ॥

अपि च—

[6]कालिन्दीतटगह्वरे विहरतो गोपीजनस्येच्छया,
राधावक्षसि विक्षिपन्नुरसिजस्पर्शाभिलाषात् करम् ।
दृष्टस्तत्र [7]विशाखया कुपितया [8]काऽप्यस्य लक्ष्मीरहो !,
हारस्येति मिषान्निजाशयमुपह्नोता हरिः पातु वः ॥ ३ ॥

(नान्द्यन्ते)

स्थापकः—(समन्तादवलोक्य सहर्षम्) अहो ! शरदागमरमणीयतमा भुवनलक्ष्मीः ।
तथाहि—

---

1 वासुदेवम् । 2 महिषवदाचरति । 3 यज्ञपुरुषः । 4 नरसिंहः । 5 यादवेन्द्रः । 6 यमुनानदी । 7 विशाखानाम्न्या गोप्या । 8 अनिर्वचनीया ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

एतत् केतकगर्भपत्रसुभगैरभ्रैर्नभः शोभते,
कासाराः सुरभीणि कैरवकुलैरम्भांसि बिभ्रत्यमी ।
शालेयेषु विपक्वशालिषु शुकाः सम्पातमातन्वते,
सूर्या-चन्द्रमसौ च सञ्चितमिव स्फारं महो मुञ्चतः ॥ ४ ॥

तदद्य भगवतः श्रीद्वारकालङ्कारनीलमणेः श्रीकृष्णदेवस्य पुरतः श्रीधरप्रबोधैकादशीपर्वणि सर्वदिग(? गाग)तानां [1]सामाजिकजनानां जनकसुतापतिचरिताभिनयादेशसम्पादनेन कृतार्थयामि संसारकदर्थितमात्मानम् । (विचिन्त्य) भवतु, पर्यालोचयामि प्रेयसीम् । (इति नेपथ्याभिमुखं परिक्रम्य) प्रिये ! इतस्तावत् ।

(प्रविश्य)

नटी—[1]एस म्हि, आणवेदु अज्जो ।

सूत्रधारः—प्रिये ! रामायणरूपकावलोकनकुतूहलिनी खल्वियं परिषत् ।

नटी—[2]अज्ज ! कधं सयलकयिचक्कचव्विदे रामचरिदे सामाइयाणं सवणेच्छा ? ।

सूत्रधारः—प्रिये ! न विभावयति भवती । तथाहि—

स जयति रघुराजग्रामणी रामचन्द्रः,
स च जयति कविश्वोत्पत्तिमूलं मुनीन्द्रः ।
त्रिजगति शतधाऽपि श्रूयमाणा नवेव,
प्रमदयति यदीया कीर्त्तिरुक्तिश्च चेतः ॥ ५ ॥

अपि च—

श्रीकाकुत्स्थकथातीर्थे रुद्धेऽपि विबुधव्रजैः ।
अत्र पावित्र्यलाभाय न प्रवेशमुशन्ति के? ॥ ६ ॥

तद् विमृश्यतां कस्यापि कवेः परिषत्परितोषणानुरूपं किमपि रूपकम् ।

नटी—(विचिन्त्य) [3]अज्ज ! एदिशे पभूदभूदेवसंगुले पिक्खकसमाजे कस्स वि

---

१ एषाऽस्मि, आज्ञापयतु आर्यः ।

२ आर्य ! कथं सकलकविचक्रचर्वितं रामचरिते सामाजिकानां श्रवणेच्छा ? ।

३ आर्य ! ईदृशे प्रभूतभूदेवसङ्कुले प्रेक्षकसमाजे कस्यापि भूदेवप्रवरस्य कवेः नाटकमभिनेतुमुचितं भवति ।

---

1 सभ्य ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

भूदेवप्पवरस्स कयिणो नाडयमहिणेदुमुचिदं भोदि ।

सूत्रधारः—प्रिये ! साधु स्मारितं भवत्या । अस्त्येव वशिष्ठान्वयसम्भूतेश्चौलुक्य-चक्रवर्त्तिवन्दितचरणारविन्दस्य श्रीसोमेश्वरदेवस्य कृतिरभिनवमुल्लाघराघवं नाम नाटकम्, तदेव चतुर्द्धाऽभिनीय सदस्यानुपास्महे । (पुनः सानन्दम्)

चरितमिदमुदारं रामरूपस्य विष्णोः,
कृतिरकृतकरम्या श्रीकुमारात्मजस्य ।
वयमभिनयसज्जाः, सज्जनोऽयं समाजः,
सुकृतमिह मदीयं प्राक्कृतं प्रादुरासीत् ॥ ७ ॥

नटी—[1]अज्ज ! कधं इयरेहिं [? कयीहिं] विय एदिणा कयिणा अत्तणो गुण-संकित्तणं ण कियं ? ।

सूत्रधारः—प्रिये ! न खलु महात्मनामात्मगुणसङ्कीर्त्तने रसना प्रवर्त्तते, परं विबुधवर्गनिसर्गसम्बन्धेन चौलुक्यचक्रवर्त्तिसचिवेन श्रीवस्तुपालेन सूक्तमिदमुदीरितम्—

यस्याऽऽस्ते मुखपङ्कजे सुखमृचां वेदः, स्मृतीर्वेद यः,
त्रेता सद्मनि यस्य, यस्य रसना सूते च सूक्तामृतम् ।
राजानः श्रियमर्जयन्ति महतीं यत्पूजया गूर्जराः,
कर्तुं तस्य गुणस्तुतिं जगति कः सोमेश्वरस्येश्वरः ? ॥ ८ ॥

नटी—[2]अज्ज ! सुविहियं एदं सव्वमवरं । मह उण इक्कं ज्येव असंतोसकारणं वट्टदि ।

सूत्रधारः—(साशङ्कम्) प्रिये ! कथय किं तत् ? ।

नटी—[3]अज्ज ! मम दुहिदा पढमं ज्येव दाणिं सुसर(? ससुर)हरे पत्थिदा । ता से तहिंगदाए किं किं हविस्सदि ?–त्ति पज्जाउलं मे हिययं ।

सूत्रधारः—प्रिये ! किमेवं मृषा विषीदसि ? । शरीरिणां हि शुभाऽशुभविधाने विधिरेव प्रभविष्णुः । तथाहि—

---

१ आर्य ! कथं इतरैः [कविभिः] इव एतेन कविना आत्मनः गुणसङ्कीर्त्तनं न कृतम् ? ।

२ आर्य ! सुविहितमेतत् सर्वमपरम् । मम पुनः एकं एव असन्तोषकारणं वर्त्तते ।

३ आर्य ! मम दुहिता प्रथमं एव इदानीं श्वसुरगृहे प्रस्थिता । तत् तस्याः तत्र-गतायाः किं किं भविष्यति ?–इति पर्याकुलं मे हृदयम् ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

प्रतिकूले विधौ बन्धुरप्यरातीयतेतराम् ।
अनुकूले पुनर्वैरिजनोऽपि सुजनायते ॥ ९ ॥

नटी—[1]अज्ज ! सच्चं ज्येव एयं, तह वि सिणेहपरदा मं किलेसयदि ।

सूत्रधारः—प्रिये ! सकललोकसंवादी खल्वसावपत्यस्नेहानुभवः । तथाहि—

नवपरिणीता दुहिता गच्छन्ती पतिगृहाय बन्धूनाम् ।
परमार्थवेदिनामपि वैक्लव्यं विरचयत्येव ॥ १० ॥

(नेपथ्ये)

साधु भो भरतावतंस ! साधु, (" नवपरिणीते "त्यादि पठति ।)

सूत्रधारः—प्रिये ! कथमयं शतानन्दभूमिकायां वत्सरङ्गमङ्गलो व्याहरति ? । तदेह्यावामप्यनन्तरकरणीयाय सज्जीभवावः । (इति निष्क्रान्तौ ।)

॥ [1]**प्रस्तावना** ॥

(ततः प्रविशति शतानन्दः ।)

शतानन्दः—साधु भो भरतावतंस ! साधूक्तं भवता (" नवपरिणीता " इत्यादि पठित्वा ।) यदयं महाराजश्रीसी[2]रध्वजः सीताप्रस्थानजनितोन्मनीभावः सांसारिकस्नेहापहरणोद्वर्तनचूर्णानि भगवतो याज्ञवल्क्यस्यापि वचनानि नाद्य संस्मरति ।

रामेण स्थाणुचापं सपदि दलितमित्युल्लसद्विस्मयश्रीः,
सम्बन्धः सैष गोत्रे समजनि तपनस्येति सन्तोषपात्रम् ।
सीता गन्ताऽद्य भर्त्तुर्भवनमिति पुनर्वैमनस्येन मुह्यन्,
न ह्यन्तःस्नेहबन्धं श्लथयति मिथिलेन्द्रोऽपि योगीन्द्र[3]शिष्यः ॥ ११ ॥

(पुनः स्मृत्वा सचमत्कारम्) अहो ! निरुपमः कोऽपि दिलीपकुलकाननकेसरीन्द्रे रामभद्रे सर्वजनानामनुरागातिरेकः । तथाहि—

यष्टङ्कारस्त्रिनयनधनुर्दण्डतः खण्ड्यमानात्,
काकुत्स्थेन स्थगितनिखिलाशान्तरालस्तदाऽऽसीत् ।

---

१ आर्य ! सत्यं एव एतत्, तथापि स्नेहपरता मां क्लेशयति ।

---

1 प्रस्तावना अन्यपात्रप्रवेशः । 2 जनकराजः । याज्ञवल्क्यशिष्योऽपि ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सोऽप्युच्चैस्तच्चरितरचितानन्दनृत्यत्रिलोकी-
कॢप्तश्लाघाकलकलतिरोभूतभूमा बभूव ॥ १२ ॥

(पुनः पृथ्वीं प्रति)

कौशिल्यया तदिदमुद्धृतविश्वशल्यं,
यद्यर्पितं कृपणया नृपरत्नमेकम् ।
तत् किं न देवि वसुधे ! त्वमपीदृगन्य-
दाविष्करोति(? षि)? भवती ननु भूरिरत्ना ॥ १३ ॥

(आकाशे)

मा मैवं महर्षे गौतमात्मज !
एकं कौशल्यया रामनाम रत्नमसूयत ।
सीतासंज्ञं मयाऽप्येतद् द्वितीयमुपदीकृतम् ॥ १४ ॥

शतानन्दः—(ऊर्ध्वमवलोक्य) भगवति वसुन्धरे ! स्थाने वयमविमृश्यवादिनो भवत्या निवारिताः । (पुरो विलोक्य) अये ! कथमयं मिथिलाधिनाथः समर्थितविवाह-महोत्सवं दशरथप्रमुखसम्बन्धिजनमनुव्रज्य वत्सां जानकीं जननीजनवन्दनार्थमन्तःपुरगता-मागच्छन्तीं प्रतिपालयन्निहैव विवाहमण्डपतले वत्सौ राम-लक्ष्मणावापृच्छ्यमानावभिभाषमाणो वर्त्तते ? तदितो गच्छामि (इति परिक्रामति ।)

(ततः प्रविशन्ति जनक-प्रतीहारौ राम-लक्ष्मणौ च ।)

रामः—(सविनयमञ्जलिं बद्ध्वा जनकं प्रति) अनुजानन्तु तत्रभवन्तो मामयोध्या-गमनाय ।

जनकः—(विचिन्त्य सोत्कण्ठम्) वत्स ! बाढं मूढोऽस्मि प्रतिवचनदाने । यतः——

त्वद्दर्शनातृप्तविलोचनस्य, गच्छेति निर्गच्छति किं मुखान्मे ? ।
यात्राक्षणेऽस्मिन्नथ च त्वदीये, तिष्ठेति वाचोऽनुचितैव वृत्तिः ॥ १५ ॥

रामः—(सप्रश्रयम्)

वात्सल्यं तातपादानां भूतवर्गे निसर्गजम् ।
जने पुनरिहापत्यनिर्विशेषे विशेषतः ॥ १६ ॥

(नेपथ्ये)

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कुमार रामभद्र ! समादिशति महाराजो दशरथः, यदयं प्रगुणीकृतः प्रास्थानिको रथः । तद् वध्वा [1]सीरध्वजसम्भूतया सह सत्वरमागम्यताम् ।

जनकः—(श्रुत्वा) वत्स रामभद्र ! स्थित्वाऽपि चिरमस्माभिरनुभवनीय एव भवत्प्रवासजन्मा रणरणकः, तत् कृतमतः परं विलम्बेन । अपि च—

नरपतिरितरोऽपि स्मर्यते वैष्णवोंऽशः,
स्वयमसि रमणीयैस्त्वं गुणैर्विष्णुरेव ।
किमपि भुवनकार्यं यद् विचिन्त्याऽवतीर्ण-
स्तदिह घटयतस्ते वत्स ! निर्विघ्नमस्तु ॥ १७ ॥

लक्ष्मणः—तात ! भवदनुग्रहादेवं भविष्यति ।

(इति उभौ परिक्रम्य निष्क्रान्तौ ।)

शतानन्दः— (उपसृत्य) स्वस्ति भवते [2]भास्करप्रशिष्याय ।

जनकः—भगवन्नाङ्गि[3]रस ! अभिवादये (इति प्रणम्य प्रतीहारं प्रति) मित्रानन्दिन् ! समाहूयतां वत्सा वैदेही । सोऽयमतिक्रामति प्रस्थानमुहूर्त्तः । वयमपि पुरोहितसहिताः शान्तिकगृहमुपेत्य प्रयाणप्रवणां वत्सां वैदेहीं प्रणमयितुमुद्बोधयामो भगवन्तमु[4]पर्बुधम् । (इति तथाकुरुतः ।)

प्रतीहारः—यदादिशति देवः । (इति पदान्तरे स्थित्वा व्यावृत्त्य च) देव ! इयं जानकी हंसिकया समभित एवाभिवर्त्तते ।

(ततः प्रविशन्ति कञ्चुकिना निर्दिश्यमानमार्गा कृतप्रस्थानोचितमङ्गला सीता हंसिका च ।)

सीता—(बाष्पमुत्सृज्य) [1]हला हंसिए ! अज्ज णियबंधुवग्गेण विजुज्जमाणाए मह हियए बाढमरदी चिट्ठदि ।

हंसिका—[2]सहि जाणए ! महारायदहरहस्स देवीए कोसल्लाए पसाददाणेण

१ सखि हंसिके ! अद्य निजबन्धुवर्गेण वियुज्यमानाया मम हृदय भृशमरतिस्तिष्ठति ।

२ सखि जानकि ! महाराजदशरथस्य देव्याः कौशल्यायाः प्रसाददानेन तस्य च सर्वाङ्गसुन्दरस्य परमेश्वरशरासनभञ्जनजनस्य स्नेहानुभवेन सर्वं सुखावहं भवत्यै भविष्यति ।

1 सीतया । 2 जनकाय । 3 शतानन्द ! । 4 अग्निम् ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तस्स य सव्वंगसुंदरस्स परमेसरसरासणभंजणजणस्स सिणेहाणुहवेण सव्वं सुहावहं भोदीए भविस्सदि ।

सीता—सहि ! तस्सिं कोअंडखंडणखणे तुममवि हिट्ठिदा आसण्णुपविशिय हिययच्छियं 'भट्टिदारिए !' मा[मा]मंतेसि ।[1]

हंसिका—तस्सिं भग्गसरासणे भग्गे संपुण्णो पियसहीए मणोरह त्ति सरहस्सं मह वद्धावयंतीए सयं ज्येव तुए एदं पारितोसिकं दिण्णं ।[2] (इत्यङ्गुलीयकं दर्शयति ।)

सीता – (सवैलक्ष्यम्) सहि ! पत्थाणपय्याउलदाए विसुमरिय म्हि ।[3]

कञ्चुकी—भर्तृदारिके ! सोऽयं महाराजसीरध्वजः शान्तिकशालायां प्रकाशितहुताशनः पुरत एवाभिवर्त्तते, तदितो गच्छाम इति ।

(सर्वे तथाकुर्वन्ति)

जनकः—(सीतां प्रति) वैदेहि ! वत्से ! प्रदक्षिणीकृत्य प्रणम्यतां भगवानाशुशुक्षणिः, अनन्तरमयं च कुलगुरुर्गौतमतनूजः ।

(सीता तथाकरोति ।)

शतानन्दः—

वत्से ! भव श्वसुरयोः प्रमदप्रदा त्वं,
तातान्वयस्य यशसे भव निर्मलस्य ।
प्राणप्रिया च भव भर्तुरनन्यजातेः,
पुत्रप्रसूर्भव, भव प्रथमा सतीषु ॥ १८ ॥

जनकः—(सविनयमञ्जलिं बद्ध्वा वैश्वानरं प्रति)

स्वामिन् ! मुखं मखभुजामसि मानवाना-
मन्तर्गतोऽसि जगतोऽप्यसि वृत्तवेदी ।
सेयं सुता मम नमस्यति तुभ्यमग्ने !,
पाता पिता च पविता भविता तदस्याः ॥ १९ ॥

---

१ सखि ! तस्मिन् कोदण्डखण्डनक्षणे त्वमपि हृष्टा आसन्ने उपविश्य हृदयेप्सितं 'भर्तृदारिके !' [इति] मामामन्त्रयः ।

२ तस्मिन् भर्गशरासने भग्ने सम्पूर्णः प्रियसख्या मनोरथ इति सरहस्यं मह्यं वर्धापयन्त्यै स्वयं एव त्वया एतत् पारितोषिकं दत्तम् ।

३ सखि ! प्रस्थानपर्याकुलतया विस्मृता अस्मि ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सीता—(जनकं प्रणम्य) तादे[1]! गच्छामि । (इति रोदिति ।)

जनकः—(शतानन्दं प्रति) आर्य ! जानकीमेवंविधामवलोकयतामस्माकं पुनः प्रत्यागतमिव ममत्वासङ्गेन । पश्य—

महतीमप्यतिक्रम्य प्रत्याहारनियन्त्रणाम् ।
अधुना सीतया सार्द्धं गन्तुमिच्छति मे मनः ॥ २० ॥

शतानन्दः—महाराज ! निर्गुणेऽप्यपत्ये स्निह्यन्ति गुरवः, किं पुनरेवंविधे ?। (पुनः सीतां प्रति) वत्से जानकि ! न खलु भवती स्वभावतः शीलवती परिशिक्षामपेक्षते, तथापि गुरुत्वादस्माभिरभिधीयसे—

शुश्रूषा श्वशुरे, ननान्दृषु नतिः, श्वश्रूषु सेवाञ्जलिः,
पत्यौ तत्परता, सनर्म च वचस्तन्मित्रवर्गे शुचौ ।
साङ्गत्यं कुलबालिकासु, विनयः पूज्ये, तनौ संवृति-
र्मार्गोऽयं मुनिपुङ्गवैर्मृगदृशां श्रेयःश्रिये दर्शितः ॥ २१ ॥

(सीता लज्जावनता तिष्ठति ।)

जनकः—वत्से ! यदभिधातव्यं तदभिहितमेव गौतमात्मजेन ।

कञ्चुकी—(जनकं प्रति सविनयम्) देव ! विज्ञापयन्ति देव्यः—यदयं जामाता रामभद्रो राक्षसैः सहजकृतविरोधः, मायाविनश्च राक्षसाः, तदस्य मार्गे तदन्तरायनिवारणाय प्रतिविधातव्यं देवेन ।

शतानन्दः—(विचिन्त्य) न केवलं राक्षसाः किन्तु राक्षसजातिरक्षाधिकारी दशकन्धरः प्रतिविधातव्यः । यः किल—

लङ्केन्द्रः स नवीनवीरपदवीरम्यो न गम्यो गिरां,
यस्मिन् जुह्वति चन्द्रहासदलितान् मौलीन् पुरारेः पुरः ।
भीत्या मन्दशिखोदयोऽपि दहनः स्वैरेव तत्र क्षणं,
प्राणद्भिः स्वदिदिक्षया तनुतनुः श्वासानिलैर्दीपितः ॥ २२ ॥

प्रतीहारः—(सचमत्कारम्) किमुच्यते ? मानधनानां धौरेयः स राक्षसचक्रवर्त्ती । तथाहि—

---

१ तात ! गच्छामि ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

शौर्यक्रीतजगत्त्रयाधिपतिताचिह्नं प्रसन्ने प्रभौ,
राजद्भिस्तिलकं शिरोभिरपरैश्छिन्नप्ररूढैर्धृतम् ।
अच्छिन्ने ननु मानिनोऽस्य न दधे मूर्ध्नाऽपरोपार्जित-
श्रीसम्भोगपराङ्मुखेन चतुर्भिस्तेषां प्रभूतैरपि ॥ २३ ॥

जनकः—(कञ्चुकिनं प्रति) हरिदत्त ! किमस्माभिरिह प्रतिविधातव्यम् ? । पश्य—

बालोऽपि प्रबलां निनाय विलयं यः क्रीडया ताडकां,
चक्रे दूरमुदस्तमस्तकतया राहुं सुबाहुं च यः ।
यः कोदण्डमखण्डयन्मखरिपोर्यातू निहन्तुं स्थितः,
काकुत्स्थोऽस्ति स एव, सम्प्रति पुनः संन्यस्तशस्त्रा वयम् ॥२४॥

तद् भवताऽपि वत्सामनोविनोदाय कियदपि गत्वा सत्वरमिहाऽऽगन्तव्यम् ।

सीता—(पदान्तरे स्थित्वा पुनर्निवृत्त्य जनकं प्रति) ताद[1] ! न विसुमरणीय म्हि । (इति बाष्पं विसृजति ।)

जनकः—(सगद्गदं सीतायाश्चिबुकमुन्नमय्य) अयि वत्से ! किमिदं प्रार्थितवती भवती ? । यतः—

अविभाजितो जनन्या स्नेहो मय्येव ताव[1]कस्तद्वत् ।
अन्यत्र कृतविरक्तेर्ममा[2]पि त्वामुपाश्रितः स्नेहः ॥ २५ ॥

अपरं च पतिव्रतानां रहस्यमिदमुपदिश्यते—

संपत्तौ वा विपत्तौ वा वने वा भवनेऽपि वा ।
भर्त्तारमनुवर्त्तन्ते निर्विकल्पाः कुलस्त्रियः ॥ २६ ॥

(सीता जनकं प्रणम्य हंसिका-कञ्चुकिभ्यां सह निष्क्रान्ता ।)

जनकः—(शतानन्दं प्रति) आर्य ! प्रस्थिता जानकी । तद् वयमपि विवाहमण्डपतले समुपविश्य हरिदत्तागमनं प्रतिपालयामः । (इत्युत्थाय तथाकुर्वन्ति ।)

जनकः—(समन्तादवलोक्य सोत्कण्ठम्) भगवन्[3] गौतथ्यतनय !

---

१ तात ! न विस्मरणीयाऽस्मि ।

---

1 °कस्तावत् दे० । 2 °मापि वत्से ! त्वमुच्छ्वसितम् भा० । 3 °न् गौतथ्य° भा० । गौतथ्यतनयः शतानन्दः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सौधं तदेव, नगरं च तदेव, वस्तु-
जातं तदेव च, तदेव दिनस्वरूपम् ।
सीताप्रवासविरसीकृतचित्तवृत्ते-
रन्यादृशं तदखिलं प्रतिभाति मेऽद्य ॥ २७ ॥

शतानन्दः—अस्माकमपि । (पुनरात्मगतम्) वैदेहीप्रवासवैमनस्येन सुतरां परिक्लिश्यते मिथिलेश्वरः, तदिदानीं वार्त्तान्तरविनोदेन प्रमोदयामि । (इति तावन्मण्डपमवलोक्य प्रकाशं जनकं प्रति) हे सूर्यशिष्यान्तेवासिन् ! स्मरसि तदानीं जानकीविवाहविहितशोभाविभूतेरस्य मण्डपस्य ? । तथाहि—

लब्धं तैर्नयनोत्पलद्वयफलं यैरेष दृष्टस्तदा,
मार्त्तण्डान्वयसम्भवक्षितिधवश्रीमण्डितो मण्डपः ।
[1]सूर्यान् [2]यत्र पपाठ सम्मदमिलत्कण्ठो वशिष्ठो मुनि-
र्गेयान्युद्वहनोचितानि च जगौ हर्षोद्धताऽरुन्धती ॥ २८ ॥

जनकः—आर्य ! तत्र किं परिहीयते ? यत्र भगवान् विश्वामित्रः स्वयं कार्यकर्त्ता भवति । यः किल—

[3]यद् वन्द्यं जगतीभुजां, भगवतः प्रद्योतनस्यापि [4]यद्
दुष्प्रापं, निजतेजसा न तृषितः क्षात्रेण तेनापि यः ।
ब्राह्मण्याय स्पृहयाञ्चकार महसे, तच्चापि जन्मन्यगा-
[5]दस्मिन्नेव, मुनीश्वराय [6]कुशिकापत्याय तस्मै नमः ॥ २९ ॥

शतानन्दः—विदेहाधि[7]पते ! महर्षिणोऽप्यस्य गुरुषु गुरुतरं दाक्षिण्यम् । यतः—

राजाऽसि, प्रथमा तवैव गणना धर्मव्यवस्थाविदाम्,
आसंसारमिहापरो न सृजतेः कर्त्ता विरिञ्चिं विना ।
तत् कर्त्तुं समयव्यतिक्रममिमं नैवार्हसीत्यादराद् ,
देवेन्द्रेण निवारितो निववृते यः सर्गसर्गान्नवात् ॥ ३० ॥

प्रतीहारः—देव ! तदेतदपि महामुनेरस्य माहात्म्यमवधार्यताम् ।

---

1 ऋग्वेदसम्बन्धिनो मन्त्रान् । 2 मण्डपे । 3-4 यत् क्षात्रं तेजः । 5 अस्मिन्नेव जन्मनि प्राप्तवान् । 6 कौशिकाय विश्वामित्राय तुभ्यं नमः । 7 °पते महर्षे ! मह° भा० ।

P. P. Ac. Gunratnasuri M.S.　　　　Jin Gun Aaradhak Trust

नरदेवोऽपि भूदेवो भवन्नुच्चैस्तपोग्निना ।
स्वदेहस्य सुवर्णस्य [1]वर्णोत्कर्षं चकार यः ॥ ३१ ॥

जनकः—(स्मृत्वा शतानन्दं प्रति) भगवन्नहिल्यानन्दन ! सोऽयं तत्रभवान् मैत्रावरुणो दशरथपार्थिवादप्यधिकतरमेव स्निग्धबुद्धिरस्मासु । तथाहि—

जन्येन राजन्यजनेन सार्द्धमरुन्धतीजानिरुपागतोऽपि ।
भूत्वाऽस्मदीयः प्रमदात् तदानीं, सम्बन्धिनः प्रत्युत सच्चकार ॥ ३२ ॥

शतानन्दः—मिथिलाधिपते ! भवता दशरथाभिधानमभिदधानेन स्मारितोऽस्मि तन्महिमानमसमानम् । पश्य—

सङ्ग्रामाङ्गणनिर्जितक्षितिपतिश्रीसंविभागोऽर्थिनां,
चक्रे येन न केवलं बलवता सर्वोऽपि साधारणः ।
देवस्यापि सुरारिशोणितसुरा[2]पाणप्रवीणासिना,
दोस्तम्भप्रभवस्वशक्तिविभुताभोगोपयोगो हरेः ॥ ३३ ॥

अपरं च—

कोपोत्कटस्य शकटेन [3]सदृक्षमृक्षं,
मङ्क्षु प्रजाक्षयकृते प्रविविक्षतस्तत् ।
सौरेर्ग्रहस्य रिपुनिग्रहचण्डचापं,
येन व्यधायि निजदोर्यु[4]गमर्गलाऽग्रे ॥ ३४ ॥

जनकः—भगवन् ! अपरमपि वितर्कयामि—

अजात्मजेन यद् राज्ञा भग्नारम्भः कृत[5]स्तमः ।
ग्रहेषु सहते सैष पङ्गुरङ्गुलिदर्शनम् ॥ ३५ ॥

(पुनः स्मृत्वा सोल्लासम्) तेन पुनर्नूतनसम्बन्धिना वसुन्धराधीश्वरेण निजकुलसदृशी बहुमतिरस्माकमाविष्कृता । तथाहि—

अप्यल्पं बहु मानसेन मुदितेनास्मत्कृतं मानयन्,
जामातुर्जनकोऽपि भक्तिनिरतेष्वस्मासु सप्रश्रयः ।

---

1 वर्णोऽन्वर्थं प्रकारयः भा० । 2 °पानप्रवी° दे० । 3 सदृक्ष° भा० । 4 °गलार्ग° भा० । 5 °स्ततः दे० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

निर्वर्त्योपयमं पुरीं जिगमिषुः सोत्कण्ठमापृच्छ्य नः,
स्वस्याविस्मरणाय सैष विदधे पृथ्वीपतिः प्रार्थनाम् ॥ ३६ ॥

(पुनर्विमृश्य) तया पुनः कोशलेश्वरदुहित्रा सीताविषये स्नेहा[1]विष्करणेन वयमपि पश्चात्कृताः । पश्य—

कौशल्यया नववधूः समधूकमाला,
तात्कालिकप्रमदबाष्पकरम्बिताक्ष्या ।
अङ्के निवेश्य तनया मम नैकवार-
मालिङ्गिता तदनु मूर्द्धनि चुम्बिता च ॥ ३७ ॥

किं बहुना ? सेयं सर्वाऽपि भवतः कुलगुरोः शुभध्यानसमृद्धिः । तथाहि—

स श्वशुरः सा श्वश्रूः स वरः स गुरुः स वंशश्च ।
सर्वं सुविहितमेतन्मम दुहितुस्त्वत्प्रसादेन ॥ ३८ ॥

प्रतीहारः—(क्षणमिव स्थित्वा) कथमद्यापि चिरयति हरिदत्तः ? ।

(ततः प्रविशति कञ्चुकी ।)

कञ्चुकी—(साश्चर्यम्)

तत् पौरुषं किञ्चन यद् विचिन्त्य, चमत्करोति त्रिदिवेश्वरोऽपि ।
रामस्य तत् किञ्चिदनुद्धतत्वं, पात्रं न मैत्रावरुणोऽपि यस्य ॥ ३९ ॥

(अग्रतो विलोक्य) कथमयं महाराजसीरध्वजो मदागमनमित एव प्रतीक्षते ? । तदेनमुपसर्पामि । (इति तथाकृत्वा "तत्पौरुषं" इत्यादि पठति ।)

जनकः—(श्रुत्वा) हरिदत्त ! किं तेनैव दशरथापत्यरत्नस्य शङ्करशरासनभङ्गवृत्तान्तेन त्वमेवं मुखरीकृतोऽसि ? ।

कञ्चुकी—नहि नहि ।

जनकः—(ससम्भ्रमम्) किं तर्हि ? ।

कञ्चुकी—देव ! श्रूयताम्—वैदेहीविवाहमहोत्सवानन्तरम्—

सम्बन्धेन नरेश्वरो, मधुरया वाचा तदन्तःपुरं,
पत्न्या दाशरथिर्धनैः परिजनो, भक्त्या वशिष्ठस्तया ।

---

1 स्नेहकर° दे० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सानन्दं च सविस्मयं च सचमत्कारं च बिभ्रन्मनः,
स्थानं स्वं मिथिलापुरीपरिसराद् गन्तुं प्रतस्थे ततः ॥ ४० ॥

जनकः—ततस्ततः ? ।

कञ्चुकी—ततश्च देव ! मदामोदमनोरमैः स्तम्बेरमैः, अनुपमवेगविराजिभिर्वाजिभिः, लीलालङ्घितविषमपथैर्महारथैः, प्रकाशितशौर्यसम्पत्तिभिः पत्तिभिः परिवृतो महाराज-श्रीदशरथः पथि प्रतिष्ठमानः प्रतिकूलानि शकुनान्यालोकयामास ।

(सर्वे श्रुत्वा शङ्कां नाटयन्ति ।)

जनकः—कानि पुनस्तानि ? ।

कञ्चुकी—अवधार्यताम्—

अप्रदक्षिणचरान् कुरङ्गकान्, वीक्ष्य तानथ पथि प्रदक्षिणान् ।
शङ्कितो दशरथः पुरोहितं, पृच्छति स्म वदति स्म सोऽप्यदः ॥ ४१ ॥

शतानन्दः—(जनकं प्रति) महाराज ! [1]कृतमाशङ्कया ? । स खलु यत्र शक्तिजनकः [2]सप्तमर्षिर्गोप्ता भवति तत्र विफलान्येव दुर्निमित्तानि । तथाहि—

यत्र क्षमां [3]दधति हन्त ! हिमाद्रितुल्ये,
वैकल्यमाप कुशकात्मजकोपवह्निः ।
दृष्टोऽप्यनिष्टशमनं न करोति केषा-
मन्तर्मुखीकृतमनाः स मुनिर्वशिष्ठः ? ॥ ४२ ॥

जनकः—कः सन्देहः ? ।

हरिदत्तः—ततः किमभिहितं तेन मिहिरान्वयपुरोहितेन ? ।

कञ्चुकी—स्वामिन् ! इदमुदीरितम्—

मा भैषीर्भुजबलभीषितारिवीर !,
ब्रूमस्तत् तव नृपते ! यदत्र भावि ।
भीमात्रं किमपि [4]पुरा प्रदर्श्य पश्चात्,
कल्याणं कथयति ते निमित्तमेतत् ॥ ४३ ॥

जनकः—ततस्ततः ? ।

---

1 किमा° दे० । 2 सप्त[म]र्षिगोप्ता भवति वशिष्ठो रक्षकः तत्र दे० । 3 दहति हन्त हि° दे० । 4 पुरः भा० ।

P. P. Ac. Gunratnasuri M.S.　　Jin Gun Aaradhak Trust

कञ्चुकी—देव ! तत्रैव शिबिरविरचनायां विधीयमानायां, समुच्छ्रीयमाणेषु पटावासपटलेषु, कटकनिवासिभिर्लोकैरहमहमिकया निरुध्यमानेषु छायापादपेषु, यवसेन्धनोदकार्थं प्रतिचलितेषु कर्मकरप्रकरेषु, प्रास्थानिकरथादवतरति च महाराजदशरथे तावत् कुतोऽपि—

उन्मूलितद्रुमवना घनपांशुपूर-
व्याषिद्धसूरकिरणस्फुरणा समन्तात् ।
तस्यावनीविजयिनः शिबिरप्रदेशं,
वातावली सकलमाकुलयाञ्चकार ।। ४४ ।।

जनकः—ततस्ततः ? ।

कञ्चुकी—

मध्ये तस्याः कोऽप्यनिर्द्धार्यरूपस्तेजोराशिः प्रादुरासीत् पुरस्तात् ।
मर्त्याकारः सोऽथ संलक्ष्यते स्म, ज्ञातः पश्चान्निश्चितं जामदग्न्यः ।। ४५ ।।

सर्वे—(ससम्भ्रमम्) कथं जामदग्न्यः सम्प्राप्तः ? ।

शतानन्दः—(विचिन्त्य सरोमाञ्चम्) मिथिलाधिनाथ ! न वचनगोचरस्तस्य तेजस्तपोराशेः पौरुषप्रकर्षः । तथाहि—

कुर्वन् करैः क्षितिगतोऽपि सहस्रसंख्यैः,
सापत्न्यकं दिनकृतः [1]कृतवीर्यसूनुः ।
यं पश्चिमाचलमिवातुलशृङ्गमेत्य,
प्राप्तस्तथाऽस्तमुदियाय यथा न भूयः ।। ४६ ।।

जनकः—तथ्यमेवैतत् ।

हरिदत्तः—ततस्ततः ? ।

कञ्चुकी—अथावगतपरशुरामो रामपिता नरपतिः सरभसमासनादुत्थाय सार्घपात्रपाणिः प्रणामपूर्वमेनं भृगुपुङ्गवमित्यभिदधे—

जय कदर्थितपार्थिवसन्तते !, जय समग्रमहीवलयप्रद ! ।
जय निरस्तविशाखमुखद्युते !, जय कुठार[2]हुतार्जुनदोर्वन ! ।। ४७ ।।

अपि च—

देवोऽयं दिवि तेजसामधिपतिर्धत्तेऽद्य तेजोऽधिकं,
पुष्यत्यद्य मनुर्मनुष्यपतिषु श्रेयःकलां पुष्कलाम् ।

---

1 कृतवीरसूनुः दे० । 2 °रहता° भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

ज्ञानस्याऽऽयतनं खनिश्च तपसामुग्रौजसामग्रणी-
र्यद्वंशप्रभवस्य मे यदभ'वः साक्षात् त्वमक्ष्णोः पुरः ॥ ४८ ॥

☞ [2]जनकः—ततस्ततः ? ।

कञ्चुकी—तदनन्त[रं] रञ्जितललाटभ्रकुटिः क्रोधवशादनाकर्णिततद्वचनः स रेणुकातनयः स्वात्मानं प्रति प्रक्षे(? प्रतिक्षेप)मित्याचचक्षे—

गौरीपुत्रपराजयं कृतवतस्त्यक्त्वाऽपि दाक्षायणी-
दाक्षिण्यं गुरुसम्मदेन तव यः पृष्ठे करं दत्तवान् ।
भग्ने तस्य शरासने भगवतः स्वस्थोऽसि तत् सर्वथा,
धिग् धिग्! भार्गव! पाप! चापविषये कोऽद्यापि विद्यामदः? ॥४९॥

जनकः—(ससम्भ्रमम्) प्रशान्तचित्तोऽपि सोऽयं स्वधितिध्वजः क्षत्रजातेरातङ्ककारी, किं पुनः कुपितः ?, तत्रापि रामभद्रं प्रति, पर्याकुलोऽस्मि । ततस्ततः ? । ☜

कञ्चुकी—ततश्च—

तस्मिन्नग्रे भृगुपतिरयं राज्ञि कुर्वन्नवज्ञां,
बिभ्रद् भूमीरमणरुधिरैर्धौतधारं कुठारम् ।
भङ्क्त्वा भूताधिपतिधनुषः स क स केति भूयः,
कोपाटोपप्रकटभ्रकुटीभीषणो भाषते स्म ॥ ५० ॥

जनकः—(साशङ्कम्) भगवति रघुकुलदेवते! [3]सन्निधत्स्व भार्गवेणाभियुज्यमाने रामभद्रे। (पुनः शतानन्दं प्रति) भगवन्! [4]समाधेहि मानसं रामभद्राभ्युदयाय ।

शतानन्दः—(विहस्य) महाराज! किमेवमाकुलोऽसि ? । नन्वनपेक्षितपरसाहाय्यविजयिनी रघुराजसन्ततिः ।

जनकः—ततस्ततः ? ।

कञ्चुकी—ततश्च देव! तेनायो[5]ध्याधिनाथेन सत्रासचेतसा निजजीवितादपि प्रियतरं रामभद्रं प्रति रोषकषायितान्तःकरणः स रैणुकेयः सपादोपग्रहमित्यभ्यर्थयाञ्चक्रे—

यत् पूर्वजैर्नृपतिभिर्मम पूजितोऽसि,
सेवाञ्जलिर्विरचितश्च मया यदेषः ।

---

1 °भवत् सा° दे० । 2 हस्तचिह्नान्तर्गतोऽयं पाठः दे० आदर्शे गलितोऽस्ति । 3 संविधत्स्व भा० । 4 °समवेहि दे० । 5 °ध्याना° दे० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

[1]तन्मानयन् बहु बहु क्षमतामुपेत्य,
भूयः प्रयच्छ तनयं भगवन्! नमस्ते ॥ ५१ ॥

(इति रामं दर्शितवान्।)

जनकः—ततस्ततः?।

कञ्चुकी—(ततश्च पादपतितं दशरथमुत्थाप्य) स प्रमथाधिनाथशिष्यः पुनरेवमवादीत्—राजन्निन्दुमतेय!

मह्यं द्रुह्यतु न द्वेषपात्रमेष भवेन्मम।
नाहं सहे महेशानचापव्यापादनं पुनः ॥ ५२ ॥

जनकः—कथ[2]मगणितदशरथप्रणिपातेन वि[3]स्मृतच्यवनादिवचननिर्मुक्तक्षत्रवधाबन्धेन च संरब्धमेवं भगवता भार्गवेण?। तथासति किमध्यवसितं तेन दाशरथिना?।

कञ्चुकी—देव! विज्ञप्यते—रामभद्रोऽप्युन्निद्रसरोजसखेन मुखेन पुनः प्रबद्धाञ्जलिरित्यभिहितवान्—भगवन्! [4]ऋचीकान्वयचूडामणे!

ब्रह्मचारिविजयार्जितकीर्ते!, दुस्तरव्रतविधाननिधान!।
एष दाशरथिषु प्रथमस्त्वां, मौलिना प्रणमति प्रणतेन ॥ ५३ ॥

जनकः—ततस्ततः?।

कञ्चुकी—ततश्च क्षत्रियान्तकारिणा परशुधारिणा [5]साक्षेपमित्यभिहितो रामभद्रः—आः क्षत्रियबटो! मिथ्याविनीत! किमहं ब्रह्मचारिणः कुमारस्यैव विजयादुपलब्धप्रसिद्धिः? न पुनरुन्मदमेदिनीपालककुलोच्छेदात्?। किञ्च व्रतानामेव निधानमहम्? न पुनस्तेजसाम्?। मौलिनैव प्रणतोऽसि? न [6]च चेतसा?। तदवलोक्यतामिदानीम्—

रे रे क्षत्रियडिम्भ! किं भवधनुर्भङ्गाभिमानी भवान्,
जानीते जगतां त्रयीमपि गताहङ्कारवीरामिव?।
ग्रस्ताशेषनृपान्वयोऽप्यसुहितः सोऽद्यापि धात्रीमिमां,
पात्रीं पश्यति तत् पुलाककवलोत्कण्ठी कुठारो मम ॥ ५४ ॥

इत्यभिदधानस्य तस्य सस्मितमुखाभिरामेण रामेण दत्तमिदमुत्तरम्—

---

1 तं मान° भा०। 2 °मवग° भा०। 3 दृश्यतां पत्रं १५ टिप्पणी २। 4 ऋचीका° दे०। 5 साक्षेपमभिहितो रामभद्रः—भोः क्षत्रिय° भा०। 6 च तेजसा भा०।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

व्याहारैर्वा घटय कटुभिर्निष्ठुरैर्वा प्रहारैः,
स्वस्याऽऽवेशप्रशमनमसावस्ति रामः [1]पुरस्ते ।
इक्ष्वाकूणां यदपरिचित[2]क्षारणाकारणानां,
विश्वस्मिन्नप्यहतगतयः सायका विप्रवर्जम् ॥ ५५ ॥

जनकः—ततस्ततः ? ।

कञ्चुकी—तेनाथ मथि[3]तातिबलपार्थिवौजसा साक्षेपमिदमुदीरयाञ्चक्रे—

पुंसः पुराणस्य धनुः पुराणं, भग्नं त्वयाऽपि व्रणितं घुणैस्तत् ।
यद्यस्ति शक्तिस्तव तन्मुरारेरधिज्यमिष्वासमिदं कुरुष्व ॥ ५६ ॥

इत्यभिधाय धनुरर्पितम् ।

जनकः—(सोद्वेगम्) [4]विषमा खलु रामभद्रपौरुषपरीक्षा ।

शतानन्दः—अमर्षणश्च परीक्षकः ।

जनकः—भवतु ।

हरिदत्तः—ततस्ततः ? ।

कञ्चुकी—ततश्च—

निवार्यमाणोऽपि स साध्वसेन, पित्रा [5]सबाष्पेक्षणया च मात्रा ।
आदाय रामः सहसैव नीचैश्चकार चापं च मदं च तस्य ॥ ५७ ॥

सर्वे—(सहर्षमुच्चैःस्वरम्) साधु रामभद्र !, साधु दिलीपकुलप्रदीप !, साधु दुरवगाहसाहसनिधे !, साधु जनक ! ।

हरिदत्तः—चक्रपाणिचापसमारोपणादनन्तरं किमध्यवसितं रामभद्रेण ? ।

कञ्चुकी—यत् तस्य धीरोदात्ततायाः[6] संवदति । तथापि व्यक्तं विज्ञप्यते—

कुर्वाणेऽपि विरूक्षणां नृपकुलक्षोदैकदक्षे मुना-
वुद्भूताद्भुतकौतुकेषु जगतीपालेषु पश्यत्स्वपि ।
सीतायां सभयस्थितावपि पुरो रामेण[7] धृत्वा धनु-
र्न क्रुद्धं न च गर्वितं न ललितं किन्तु स्थितं पूर्ववत् ॥ ५८ ॥

---

1 पुरस्तात् दे० । 2 क्षारणा उपालम्भः आरोपो वा । 3 मथिताखिलपार्थिवकुलेन साक्षेप° भा० । 4 विषमे भा० । 5 सज्याध्येक्षणया भा० । 6 °याः समुचितम् । तथापि भा० । 7 °ण धन्वा धनु° दे० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

शतानन्दः—किमेकमुपश्लोक्यते रामभद्रचरितेषु ?।

जनकः—किमारब्धं संरब्धवता तेन स्वधितिध्वजेन ?।

कञ्चुकी--तदनन्तरं रामविमुक्तमार्गणेन वि[1]गुणीकृतपरलोकगतिः स भगवान्

[2]स्तुवन् विलक्षेण मुखेन रामं, नम्रेण तेनाप्यनुनीयमानः।
जगाम गेहं जमदग्निसूनुः, शान्तोग्रतेजा इव जातवेदाः ॥ ५९ ॥

जनकः—(शतानन्दं प्रति सहर्षम्) भगवन्! श्रुतं श्रोतव्यम्। [3]तदेतया जामातुरभ्युदयवार्त्तया सान्तःपुर-पौरमात्मपुरं प्रमोदयामः।

(इति निष्क्रान्ताः सर्वे)

॥ प्रथमोऽङ्कः ॥

विद्वत्तामुचितज्ञतामुपशमं मूर्त्तिप्रसत्तिं यशः-
सम्पत्तिं परमोपकारपरतामौदार्यमोजस्विताम्।
नाहं वक्तुमलं तदेतदखिलं श्रीवस्तुपालस्य तद्,
देवं स्तौमि तमेव येन ससृजे सोऽयं गुणिग्रामणीः ॥ ६० ॥

---

1 विफलीकृत° भा० 2 स्तवन भा० 3 तदेनु जामातु° दे०।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

द्वितीयोऽङ्कः ।

(ततः प्रविशति राजपुरुषः ।)

[राजपुरुषः]—(समन्तादवलोक्य) अये ! [1]कथं प्रभातप्रारम्भः ? । तथाहि—

महोत्सवः पङ्कजिनीवनानां, रथाङ्गनाम्नां सुकृतावतारः ।
बोधोपलब्धिस्तमसि स्थितानां, विभासते सैष विभातकालः ॥ १ ॥

सम्प्रति हि—

प्रागद्रितो द्रुतमपाकुरुते जपाभा,
प्राभाकरी किरणधोरणिरन्धकारम् ।
राजीवराजिरपि राजति मुक्तबन्धा,
स्वं धाम मन्दयति चन्दनगौरमिन्दुः ॥ २ ॥

(पुरो विलोक्य) तदहमहस्करं भगवन्तमुपतिष्ठे । (सविनयमञ्जलिं बद्ध्वा)

सृष्टिसूत्रमिदं स्रष्टुर्विस्पष्टं विवृणोति यः ।
तं मार्गमपवर्गस्य पूषणं प्रणिदध्महे ॥ ३ ॥

अपि च—

सुधाकरसुधारस[2]प्रसभपानपीनात्मनां,
चकोरकुलयोषितां प्रसभपीतशीतज्वराः ।
कृतत्रिभुवनञ्जिलावतमसावसानाः प्रगे,
जयन्ति जगदीक्षणक्षणकराः खरांशोः कराः ॥ ४ ॥

(इति परिक्रामन् स्मृतिमभिनीय सशिरःप्रकम्पम्) अहो ! महती तत्रभगवतो मैत्रावरुणस्य तपोवननिवासिनां प्रत्यूषसमये निजनिजकार्यसम्पादनतत्परता । तथाहि—

स्नात्वा तीर्थजलेन केऽपि बटवः कुर्वन्ति सन्ध्याविधिं,
मन्त्रान् केचिदधीयते, विदधते दोहं गवां केचन ।
सम्मार्जन्ति च होमहर्म्यमपरे, त्रेतानलानुद्धृता-
नन्ये प्रज्वलयन्ति पल्लवयति प्रातर्जुहू[3]षामृषौ ॥ ५ ॥

---

1 कथं प्रातःप्रार° दे० 2 °प्रसरपान° दे० । 3 °र्जुहौषा° भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तदिदानीं राजकुलमेव गच्छामि । (इति परिक्रम्याऽऽलोक्य च) कथं प्रत्यासन्नमेव राजकुलम् ? । (निर्वर्ण्य)

प्रासादेऽत्र वसुन्धराधरपतेः प्रातःप्रबुद्धद्विप-
क्षिप्तोच्छृङ्खलपादशृङ्खलरवैरोजस्वितूर्यस्वने ।
तद्वक्त्राम्बुजमीक्षितुं क्षितिभुजामागच्छतां संहत-
च्छत्रच्छन्नमिलातलं न लभते सम्पर्कमर्कत्विषाम् ॥ ६ ॥

(पुनर्निपुणं निरूप्य) कथमयं कुमाररामभद्रस्य प्रसादवित्तको नन्दिभद्रनामा राजकुलादित एवाभिवर्त्तते ? । ☞ [1]तदेनमाहूय महाराजदशरथकुमाररामभद्र-लक्ष्मणयोः प्रवृत्तिमवगच्छामि । (इति नन्दिभद्रमाह्वयति ।) ☜

(ततः प्रविशति नन्दिभद्रः ।)

नन्दिभद्रः--(श्रुत्वा पुरो विलोक्य) अये ! स एष महाराजदशरथस्य यथार्थवर्णो विनयन्धरो मामितः समाकारयति । (इत्युपसृत्य परस्परं हस्तमेलनं कुरुतः ।)

नन्दिभद्रः—सखे ! क सम्प्रति पर्युत्सुक एव (? इव) प्रचलितोऽसि ? ।

विनयन्धरः—समर्थितं पार्थिवादेशद्वयमावेदयितुं राजकुले ।

नन्दिभद्रः—किं तदादेशद्वयम् ? ।

विनयन्धरः—प्रथमस्तावदयं पुरवासिनां प्रति—

भङ्क्त्वा भर्गशरासनं जनकभूर्येनोपयेमे, स च
भ्रूभङ्गो भृगुपुङ्गवस्य नमितः सम्पीड्य चापं हरेः ।
रामस्याऽऽगम[2]नोद्यतस्य निनदत्तूर्यं पठन्मागधं,
सानन्दप्रजमुच्छ्रितध्वजपटं कर्त्तव्यमेतत् पुरम् ॥ ७ ॥

अपरश्च भगवतो वशिष्ठस्याऽऽकारणाय तदाश्रमगमनम् ।

नन्दिभद्रः—ततस्तेन भगवता समाहूतेन किमभिहितम् ? ।

विनयन्धरः—यदिदानीं कुमाररामभद्रस्य दैवप्रतिकूलता काऽपि वर्त्तते तद् वयमिहैव तत्प्रतिविधानसावधानाः स्वशिष्यं जानूकर्ण्यमेव तत्र प्रेषयिष्यामः । त्वं तु क्वेदानीं प्रस्थितोऽसि ? ।

1 हस्तचिह्नान्तर्वर्त्त्ययं पाठः भा० नास्ति । 2 °गमनेऽद्य तस्य भा० ।

नन्दिभद्रः—अद्यतनरजनीसमये सानन्दपौरजनप्रवर्त्त्यमानखण्डपरशुकोदण्डखण्डन-परशुरामपराजयप्रभृतिनिजपौरुषवर्णनाकर्णनलज्जमानमानसः कुमाररामभद्रो महाराजदशरथमेवं विज्ञपयितुं मामिह प्राहिणोत्—

भग्नं जीर्णं त्रिनयनधनुर्यन्मया दैवयोगाद्,
[1]यः संसोढः शिशुरिति रणे रैणुकेयेन चाहम् ।
लोकः प्रीत्या तदपि किल मे पौरुषं भाषमाणो,
वार्यः कार्या न खलु महतां गर्हणा निर्निमित्तम् ॥ ८ ॥

विनयन्धरः—नन्दिभद्र ! बालभावादपि जानामि जानकीजानेः प्रकृतिमिमाम्—

लोकम्प्रीणानपि निजगुणान् धर्ममार्गाध्वनीनः,
काकुत्स्थोऽयं न खलु वच[2]साऽभ्यर्चयत्यर्चनीयान् ।
अन्येषां तु प्रकटपुलकः स्तौति मन्दानपीमान्,
केयं हन्त ! स्फुरति महतां वामवृत्तिः प्रवृत्तिः ? ॥ ९ ॥

तदिदानीं किं कुरुते कुमाररामभद्रः ? ।

नन्दिभद्रः—अद्य [3]कुमारभरते शत्रुघ्नसहिते मातामहमन्दिरमुपेयुषि तत्प्रवासवैमनस्येन दुर्मनायमानां देवीं केकयराजदुहितरमात्मदर्शनेन प्रमोदयितुं महत्येव प्रभाते कुमाररामभद्रस्तत्र गतवान् । तदनन्तरं निजमनोविनो[4]दनाय लीलोद्याने जिगमिषुरासीत् । (पुनर्विमृश्य) विनयन्धर ! ज्ञायते किमप्यनतिचिरप्रोषितस्य वशिष्ठमुनेराकारणकारणम् ? ।

विनयन्धरः—किमवबुध्यते ? । दुर्बोधाः खलु राजकार्यगतयः ।

नन्दिभद्रः—ननु भवाननवरतमासन्नवर्त्ती तस्य रघुचक्रवर्त्तिनः, निपुणमाकारेङ्गितज्ञश्च, तत् कथं परिज्ञातमपि कार्यमस्माकमपलपसि ? ।

विनयन्धरः—न सम्यगवगच्छामि । परमेवं वितर्क्यते—सम्प्रति हि महाराजदशरथः—

शरीरे वैराग्यं श्रयति शिथिल[5]श्रोतसि यथा,
यथाऽयं वेदान्तश्रुतिषु नृपतिः पुष्यति रतिम् ।

---

1 सद्यः सोढः दे० । 2 °साऽप्यर्चय° भा० । 3 कुमाररामभरते भा० । 4 °नोदाय भा० । 5 °थिलः श्रो° भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

[1]यथा चित्ते किञ्चिद् विमृशति च रामं स्पृशति च,
ध्रुवं तन्न्यस्तश्रीर्वनगमनमाकाङ्क्षति तथा ॥ १० ॥

नन्दिभद्रः—(सचमत्कारं नखच्छोटिकां दत्त्वा) विनयन्धर! नूनमेतदेव चिकीर्षति महाराजदशरथः। यदिदं महर्षीणामाकारणं पौर-जानपदप्रधानपुरुषाणां च समवायकरणं सुमन्त्र-वामदेवप्रभृतिभिरमात्यैः सह सुचिरं पर्यालोचनं चेति। समुचितं चैत[2]दिदानीं महाराजस्य।

जरसोऽपि जरा यत्र सम्राट् सज्जोऽस्तु मुक्तये।
रामस्तु भुक्तये यस्मिन् यौवनस्यापि यौवनम् ॥ ११ ॥

परमपरं पर्यनुयोज्यमस्ति—यदसौ कुमाररामभद्रस्य राज्याभिषेकमहोत्सवः सर्वजनसम्मतः, न चात्र कोऽपि प्रत्यूहकर्त्ता वितर्क्यते, [3]तत् कथमप्रकाशितप्रयोजनं प्रधानपुरुषाणामाकारणम्? व्यपदेशान्तरेण च पुरशोभाप्रवर्त्तनम्?। ननु व्यक्तमेव किमिति नोद्घुष्यते?—प्रभाते रामभद्रस्य राज्याभिषेको भविष्यतीति।

विनयन्धरः—(विहस्य) नन्दिभद्र! सरलाशयो भवान्। न वेदिता नीतिमार्गस्य। कल्याणकार्याणि हि प्रत्यूहबहुलानि भवन्ति। तदेतानि निष्पादितान्येव प्रकाश्यन्ते।

नन्दिभद्रः—तथ्यमेवैतत्। तदिदानीमहमपि कुमाररामभद्रसमी[4]पमुपसर्पामि। भवान् पुनर्महाराजसमीपम्। (इति निष्क्रान्तौ)

॥ विष्कम्भकः ॥

(ततः प्रविशति रामभद्रः प्रतीहारी लीलोद्यानपालश्च।)

रामः—(सोत्कण्ठमुद्यानपालं प्रति) मालाधर! तदिदानीमपि न विसरत्यस्मदीयहृदयम्, यत् किल प्रवासावसरे बाष्पकुण्ठीकृतकण्ठेन विनयसम्पुटीकृतपाणिना चाभिहितं वत्सभरतेन।

मालाधरः—देव! तदादिश्यताम्।

रामः—तातपादप्रणामादनन्तरं मामुपसृत्य वत्सभरतः सप्रश्रयमेवमुक्तवान्—

1 यथा किञ्चित् कि° दे०। 2 °तदिदं महा° दे०। 3 तत् किमप्र° दे०। 4 °मीपमनुस° दे०।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तातस्तातः सा सवित्री सवित्री, रामेणैव स्वं तु मन्ये सनाथम् ।
तन्निर्वास्यो देव ! नाहं स्वचित्तादभ्यर्थ्यैवं मां प्रणम्य प्रतस्थे ॥ १२ ॥

मालाधरः—देव ! सूर्यवंशोत्पत्तेरव्यभिचारिणी वशिष्ठोपदिष्टविद्यासङ्क्र[1]मस्य सदृशी स्वाभाविकविवेक-स्नेहसौरभेण सुरभीकृता परस्परं स्नेहवृत्तिर्दशरथनन्दनानाम् । सम्प्रति पुनरपरत्र—

अप्येकपितृजातानामप्येकस्तन्यपायिनाम् ।
दृश्यते विरला क्वापि भ्रातॄणामेकचित्तता ॥ १३ ॥

प्रतीहारी—[1]देव ! विसेसदो राम-लक्खणाणं सत्तुग्घ-भरदाणं अन्नुण्णं सिणेह-[2]पउत्ती दीसदि ।

रामः—(परिक्रम्य) मालाधर ! कथय कि[3]यति दूरे लीलोद्यानम् ? ।

मालाधरः—प्राप्ता एव तद्द्वारम् । तदवधारयतु देवः—

उपनयति कुसुमगन्धं गन्धवहः [4]सह मरन्दबिन्दुलवैः ।
श्रूयन्ते च स्पष्टाः पर्यटदर[5]घट्टखाट्काराः ॥ १४ ॥

(इति सर्वे लीलोद्यानप्रवेशनं नाटयन्ति ।)

रामः—(समन्तादवलोक्य सहर्षम्)

लीलोद्यानमिदं मुदे मम फलश्रेणीनमत्पादपं,
कूजत्कोकिलमस्खलन्मधुकरं माद्यन्मयूरं पुरः ।
[6]यन्मध्ये प्रियबान्धवेन मधुना सार्द्धं विधत्ते शिवा-
रुद्धैकार्द्धशरीरशङ्करतपश्चर्योपहासं स्मरः ॥ १५ ॥

मालाधरः—देव ! प्रत्यूषकालविशेषिता लीलोद्यानशोभा विभाव्यताम्—

द्विगुणमरुणिमानं पल्लवाः पादपानां,
दधति सति विभाते भास्कराभीशुभिन्नाः ।
उपहितमिहिकाम्भःसीकरालीकराला,
सकुसुमकलिकेव भ्राजते पत्रपङ्क्तिः ॥ १६ ॥

---

१ देव ! विशेषतः राम-लक्ष्मणयोः शत्रुघ्न-भरतयोः अन्योन्यं स्नेहप्रवृत्तिः दृश्यते ।

---

1 °मसदृशी स्वाभाविकसौरभेण भा० । 2 °पइत्ती दे० । 3 किमतिदूरे भा० । 4 समकर° भा० । 5 °घट्टषाट्का° भा० । 6 यन्मध्यश्रियबा° भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

रामः—मालाधर ! दर्शय द्राक्षामण्डपस्य पन्थानम्, यथा तत्रोपविश्य देव्याः समागमनं प्रतिपालयामः ।

मालाधरः—इत इतो देवः । (इति परिक्रम्य द्राक्षाम[1]ण्डपतले यथोचितमुपविशन्ति ।)

रामः—(पवनस्पर्शमभिनीय सानन्दम्)

चूतैः कन्दर्पदूतैः, सरसकिशलयाह्लादिलोकैरशोकैः,
शालैः प्राप्तप्रवालैर्विहितमधुकरश्रेणिसङ्गैर्लवङ्गैः ।
गानैश्च श्लाघ्यमानैः परभृतवयसामत्र कान्ते वनान्ते,
वायुस्तापार्त्तिजायुः शिशिरयति हृतस्वेदनीरं शरीरम् ॥ १७ ॥

(पुनः स्मृतिमभिनीय प्रतीहारीं प्रति) प्रभावति ! चिरकालादपि [2]नावलोक्यते प्रियवयस्यो माण्डव्यः ।

प्रतिहारी—(विहस्य) देव[1] ! यदा भिउडिबंधभीसणायारो गिहीदकोअंडचंडहत्थो कोवारुणलोअणजुअलो आगच्छंदो फरसुरामो दिट्ठो तक्कालपहुदि तद्दंसणपणट्ठो अज्जमंडव्वो दाणिं पि ण दिट्ठिगोयरो भोदि ।

रामः—(सुदूरमलोक्य) मालाधर ! कोऽयं सहकारकाननात् त्वामनुसरन् वानर [3]इव विलोक्यते ? ! य एष पश्य—

निष्कारणमधिरोहणमवरोहणमंह्रिपेषु कुर्वाणः ।
निजचित्तादपि चपलः प्लवङ्गमोऽयं समभ्येति ॥ १८ ॥

मालाधरः—देव ! चिरकालपरिचयविश्रम्भादनभिशङ्कमानो वानरः सोल्वणनामा मम समीपमागच्छति ।

रामः—अहो ! महदाश्चर्यं यन्नर-वानरयोः परस्परं विश्रम्भः ।

मालाधरः—देव ! नैतदद्भुतम् । निरन्तरवनवासाभ्यासान्नर-वानरयोरपि मैत्री सम्भवति ।

---

१ देव ! यदा भ्रुकुटिबन्धभीषणाकारः गृहीतकोदण्डचण्डहस्तः कोपारुणलोचनयुगलः आगच्छन् पर्शुरामो दृष्टः तत्कालप्रभृति तद्दर्शनप्रनष्टः आर्यमाण्डव्यः इदानीमपि न दृष्टिगोचरो भवति ।

---

1 °ण्डपे य° दे० । 2 न विलो° दे० ! 3 इवाऽऽलो° भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

(प्रविश्य वानरो मालाधरसमीपमुपसर्पति ।)

(नेपथ्ये)

सहि [1]हंसिये ! दंसेहि लीलुज्जाणस्स पंथाणं ।

रामः—(श्रुत्वा) मालाधर ! [2]नियतमियं देवी जनकसुता समागच्छति । तदितो गत्वा लीलोद्यानस्य मार्गमदृष्टपूर्वं दर्शय प्रियतमायाः ।

मालाधरः—यदादिशति देवः । (इति वानरेणानुगम्यमानः परिक्रामति ।)

रामः—(सानुरागमात्मगतम्) अहो ! रमणीयतमा काचिदवस्था सम्प्रति प्रियतमायाः । यतः—

मुक्ता कृत्रिमपत्रकेलि[3]रलकन्यासे प्रयत्नः परः,
प्रौढिं [4]च क्रमणे क्रमेण लभते लीलागतिर्नेत्रयोः ।
वक्षस्तः सिचयाञ्चलं विचलितं वेगान्निधत्ते च य-
न्मध्येऽसौ तनुमध्यमा विहरते तन्मौग्ध्य-वैदग्ध्ययोः ॥ १९ ॥

अपरं च—

शय्यायां स्वयमेत्य नोपविशति प्रोक्ताऽपि भूयो मया,
ब्रूते नाभिमुखी, रुणद्धि च बलान्नाभिस्पृशं मे करम् ।
वैदेही रहसि स्थिता न सहते दीपप्रभावैभवं,
तद् बाल्ये विरमत्यपि प्रियतमा नापत्रपां मुञ्चति ॥ २० ॥

(ततः प्रविशति सीता स्कन्धावलम्बितताम्बूलभाण्डा हंसिका च ।)

सीता—(मार्गद्वयमवलोक्य) सहि हंसिए ! इमिणा मग्गेण गंतव्वं ? एदिणा वा ? ।

हंसिका—[3]पियसहि सीदे ! अहं पि फुडं न याणामि ।

मालाधरः—(उपसृत्य प्रणम्य च) देवि ! इत इत आगम्यताम् ।

(सीता वानरं दृष्ट्वा भयं नाटयति ।)

---

१ सखि हंसिके ! दर्शय लीलोद्यानस्य पन्थानम् ।
२ सखि हंसिके ! अनेन मार्गेण गन्तव्यम् ? एतेन वा ? ।
३ प्रियसखि सीते ! अहमपि स्फुटं न जानामि ।

---

1 हंसिए ! भा० । 2 नियतं देवी भा० । 3 'लिमल' भा० । 4 चक्रिमणि क्रमेण भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

हंसिका—(सत्रासम्) हीमाणहे ! वाणरो वाणरो। (इति व्याहरन्ती पलायते ।)

मालाधरः—(विहस्य सीतां प्रति) देवि ! न भेतव्यम् न भेतव्यम् । खेलनकमसावस्माकं वानरः, तदिदं कौतुकमवधार्यताम् । (वानरं प्रति) अरे सोल्लण ! सहकारपादपादितः फलमादाय समर्पय देव्यै ।

(वानरस्तूर्णमुत्प्लुत्य तथाकरोति ।)

(सीता वानरमायान्तमवलोक्य सभयं पश्चादपसर्पति ।)

मालाधरः—देवि ! निशङ्कमादीयतामिदं फलम् ।

(सीता भयेन वेपमाना फलमादत्ते ।)

मालाधरः—(दूरमवलोक्य) हंसिके ! निःशङ्कमागम्यताम्, यथा तत्रापि कपिरेष फलं प्रयच्छति ।

हंसिका—(सभयम्) माला[2]हर ! पियसहीए सीदाए य्येव एस वाणरो फलप्पदो भोदु । अहं पुण जाव एसो ताव णाऽऽगमिस्सं ।

सीता—[3]मालाहर ! अण्णदो पेसीयदु एस वाणरो ।

मालाधरः—आदेशः प्रमाणम् । (इत्यभिधाय वानरमन्यतः प्रेषयति ।)

(वानरोऽपि द्रुतमुत्प्लुत्य निष्क्रान्तः ।)

मालाधरः—देवि ! इत इतः । कुमाररामभद्रो द्राक्षामण्डपे भवदागमनं प्रतीक्षमाणो वर्त्तते, तदागम्यतामिति ।

(सर्वे द्राक्षामण्डपा[2]भिमुखं परिक्रामन्ति ।)

रामः—(सीतामवलोक्य सानुरागमात्मगतम्)

किं कुर्मः ? सकलं विलोकितमिदं, पृष्टाश्च शिष्टाः, किम-
प्यस्याः क्वापि पुनः समोत्तमगुणं नादर्शि नाश्रावि वा ।
तत् तुल्यं तुहिनांशुनाऽपि वदनं, नेत्रद्वयं पङ्कजै-
[3]रप्योष्ठं सुधयाऽपि, चम्पकरुचाऽप्यङ्गं बत ! ब्रूमहे ॥ २१ ॥

---

१ अरे ! वानरः वानरः ।

२ मालाधर ! प्रियसख्यै सीतायै एव एष वानरः फलप्रदो भवतु । अहं पुनः यावदेषः तावद् नागमिष्यामि ।

३ मालाधर ! अन्यतः प्रेष्यतां एष वानरः ।

---

1 मालाधर ! भा० । 2 °पमभि° भा० । 3 °रप्योष्ठस्तुधया भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

किञ्चास्याः—

वक्त्रं विधाय विधिना विधिवन्मृगाक्ष्याः,
प्रक्षालितं करसरोजयुगं तु येन ।
पीयूषमित्यनुपदं व्यपदिश्यमान-
मानन्दहेतुरुदकं जगतस्तदेव ॥ २२ ॥

(प्रकाशम्) देवि ! जनकराजात्मजे ! इदमासनमास्यतामिति ।

(सर्वे यथोचितमुपविशन्ति ।)

हंसिका—(पश्चादवलोक्य सभयं सीतां प्रति) [१]सहि सीदे ! एस पुणो वि वाणरो समागच्छदि । (इति पलायितुमिच्छति ।)

सीता—(दृष्ट्वोपलक्ष्य च सस्मितम्) [२]हंसिए ! ण [1]खु एस वाणरो, अज्जउत्तस्स पियवयस्सो अज्जमंडव्वो एस इत्थ समागच्छदि ।

(ततः प्रविशति विदूषकः ।)

विदूषकः—(पुरो विलोक्य) [३]कधं एस पियवयस्सो जणयरायतणयासंजुत्तो दक्खामंडवतले चिट्ठदि ? । ता इत्थ गमिस्सं । (इत्युपसृत्य) [2]सत्थि तुम्हाणं । (इत्यभिधायोपविशति ।)

रामः—वयस्य माण्डव्य ! चिरादवलोकितोऽसि ।

विदूषकः—[४]वयस्स ! जं चिरादो वि दिट्ठु म्हि तं परमं मंगलं ।

रामः—कुतः कारणात् ? ।

विदूषकः—[५]तुज्झ[3] पाणिग्गहणमहूसवे मिहिलाणयरं गदो । 'जामादुयस्स पिय-

१ सखि सीते ! एष पुनरपि वानरः समागच्छति ।

२ हंसिके ! न खलु एष वानरः, आर्यपुत्रस्य प्रियवयस्यः आर्यमाण्डव्यः एषोऽत्र समागच्छति ।

३ कथं एष प्रियवयस्यः जनकराजतनयासंयुक्तः द्राक्षामण्डपतले तिष्ठति ?। तदत्र गमिष्यामि । स्वस्ति युष्मभ्यम् ।

४ वयस्य ! यत् चिरादपि दृष्टोऽस्मि तत् परमं मङ्गलम् ।

५ तव पाणिग्रहणमहोत्सवे मिथिलानगरं गतः । 'जामातृकस्य प्रियमित्रम्' इति कृत्वा जनकपरिजनवितीर्णबहुमोदकभक्षणेन तथा कथमपि मन्दाग्निरहं सञ्जातः, यथा निजब्राह्मण्याः पुण्यैः जीवितोऽस्मि ।

1 क्खु भा० । 2 सच्छि । ह(?उ)म्हाण° भा० । 3 अज्ज । पाणि° दे० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

मित्तु' त्ति कडुय जणयपरि[1]यणविइन्नबहुत्तमोदगभक्खणेण तहा [2]कहं पि मंदग्गी अहं सं[3]जादो जहा णियत्रंभणीए पुण्णेहिं जीविदु म्हि ।

रामः—वयस्य ! तर्हि वडवाग्नेरपि कदाचिदुदराग्निमान्द्यं सम्भाव्यते ।

मालाधरः—(विदूषकं प्रति साहङ्कारम्) मयि विद्यमाने न भेतव्यं रोगेभ्यो भवता ।

विदूषकः—[1]मालाहर ! किं विज्जो भवं ? ।

मालाधरः—

वैद्यराजोऽस्मि विद्यायाः कुर्वे गर्वं तु नान्यवत् ।
रोगं वा रोगिणं वाऽऽशु नाशयामि न संशयः ॥ २३ ॥

(सर्वे श्रुत्वा हसन्ति ।)

विदूषकः—(सरोषमिव) [2]आं बंभकंटय ! तहिं गच्छ अत्तणो विज्जाए सहिदो तुमं, जदो न पुणो वि समागच्छसि ।

सीता—[3]अज्ज मंडव्व ! जदि तादजणयपरियणेण [4]पभूदमोदयभोयणमुवणीदं, ता कधं [5]पभूदभक्खणादो तुमं ण उवरदो सि ? ।

विदूषकः—(साहङ्कारम्) [4]भोदि जणयनंदणि ! जदि एस पियवयस्सो रामभद्दो [6]पभूदवीरसमरादो उवरमदि ता अहं पि [7]पभूदमोदयभक्खणादो उवरमामि ।

रामः—(स्मित्वा) अहो ! महती प्रतिज्ञा प्रियमित्रस्य । ततस्ततः ? ।

विदूषकः—[5]तदो महदि ज्येव पभादे सत्तट्ठमोदयभक्खणाणंतरं मज्झण्णसंझाविधिं

---

१ मालाधर ! किं वैद्यो भवान् ? ।

२ आः ब्रह्मकण्टक ! तत्र गच्छ आत्मनो विद्यया सहितः त्वम्, यतः न पुनरपि समागच्छसि ।

३ आर्य माण्डव्य ! यदि तातजनकपरिजनेन प्रभूतमोदकभोजनमुपनीतम्, तत् कथं प्रभूतभक्षणात् त्वं न उपरतोऽसि ? ।

४ भवति जनकनन्दिनि ! यदि एष प्रियवयस्यः रामभद्रः प्रभूतवीरसमराद् उपरमति तद् अहमपि प्रभूतमोदकभक्षणाद् उपरमामि ।

५ ततः महति एव प्रभाते सप्ताष्टमोदकभक्षणानन्तरं मध्याह्नसन्ध्याविधिं कृत्वा अत्राऽऽगतोऽस्मि ।

---

1 °यणदिण्ण° भा० । 2 कहं कहं दे० । 3 संवुत्तो जहा भा० । 4-5-6-7 पहूअ° भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कडुय इत्थ[1]मागदो म्हि ।

रामः—वयस्य ! कथं मोदकभक्षणानन्तरं मध्याह्नसन्ध्याविधिः ? ।

विदूषकः—[1]णं खु ओसहभक्खणे मज्झण्णसंझाविहाणमं[2]तरीभोदि ।

रामः—[तत्] कस्य व्याधेरौषधम् ? ।

विदूषकः—[2]णं कधिदं ज्येव मंदग्गी संवुत्तो म्हि ।

रामः—(स्मित्वा सोत्प्रासम्) वयस्य ! जठराग्निकुण्ठत्वे मोदकभक्षणं परमौषधम् ।

☞ **सीता**—[3]हंसिए ! उवणेहि तंबोलं अज्जमंडव्वस्स ।

(हंसिका ताम्बूलभाण्डमपश्यन्ती वैलक्ष्यं नाटयति ।) ☜

सीता—[4]णं पाडिदं कहिं पि ? ।

मालाधरः—देवि ! वानरभयात् पलायमानया हंसिकया ताम्बूलभाण्डमितः पातितम् । (इत्यङ्गुल्या दर्शयति ।)

सीता—[5]हंसिए ! तुमं सयं ज्येव [4]गहित्तमागच्छ ।

हंसिका—[6]बीहेमि वाणरादो । ण गमिस्सं ।

मालाधरः—देवि ! तिष्ठतु हंसिका । अहमेव समानीय समर्पयिष्यामि । (इति तथाकरोति ।)

विदूषकः—(साहङ्कारमात्मानं दर्शयन्) [7]हंसिए ! एदस्सिं वीरपुरिसे [5]सण्णिहट्टिदे कुदो तुज्झ भयावयासो ? ।

प्रतीहारी—(विहस्य) [8]अज्ज मंडव्व ! परसुरामदंसणक्खणे परिक्खि[6]दपोरिसो भवं ।

---

१ न खलु औषधभक्षणे मध्याह्नसन्ध्याविधानमन्तरीभवति ।

२ ननु कथितमेव मन्दाग्निः संवृत्तोऽस्मि ।

३ हंसिके ! उपनय ताम्बूलं आर्यमाण्डव्याय ।

४ ननु पातितं कुत्रापि ? ।

५ हंसिके ! त्वं स्वयं एव गृहीत्वाऽऽगच्छ ।

६ बिभेमि वानरात् । न गमिष्यामि ।

७ हंसिके ! एतस्मिन् वीरपुरुषे सन्निधस्थिते कुतस्तव भयावकाशः ? ।

८ आर्य माण्डव्य ! परशुरामदर्शनक्षणे परीक्षितपौरुषो भवान् ।

---

1 °त्थ आग° भा० । 2 °तरायीभोदि भा० । 3 हस्तचिह्नान्तर्वर्त्ती पाठः दे० नास्ति । 4 गहिअमा° भा० । 5 सविहिट्ठिदे भा० । 6 °दपोरसो दे० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

विदूषकः—(सक्रोधम्) [1]आ दासीएधूदे ! ण याणासि तुमं, मह महाबंभणस्स सावोदगेण परसुरामकोवग्गी उवसमं गदो।

रामः—मालाधर ! दर्शय सकलमप्येतदुद्यानमिति।

(सर्वे लीलोद्यानम(? ना)वलोकनार्थमुत्थाय परिक्रामन्ति।)

मालाधरः—देव[1] ! विलोक्यतां तावदितः—

अशोक[2]श्रेणीयं नवकिशलयोल्लासरुचिरा,
विराजत्युन्निद्रं बकुलमुकुलानां मुखमिदम्।
परागः पुन्नागद्रुमसुमनसामेष च पुरो,
मरुद्भिर्वल्लीनामपि भवति हल्लीसकमितः॥ २४॥

रामः—(समन्तादवलोक्य) अये ! वसन्तावतार इव। तथाहि—

माकन्देषु फलोदयादिह भवत्यू[3]नः प्रसूनागमः,
प्रीताः पञ्चमगीतिगर्भितमितः कूजन्ति पुंस्कोकिलाः।
शोभां बिभ्रति किंशुकाः शुकमुखच्छायासखैः कोरकैः,
उन्निद्रं कुरुते स्मरं च मधुरः पुष्पन्धयानां ध्वनिः॥ २५॥

मालाधरः—देव ! मनोरमत[4]ममेतदवधार्यताम्—

निर्विच्छेदच्छदसमुदयाच्चम्पकानां व[5]नान्त-
र्नेतर्नेतः सरसिजसखं नेत्रमन्यत्र नेयम्।
मध्ये यस्य द्युतिपतिकरागोचरत्वादशान्त-
ध्वान्ते दीपा इव विरचिताः कोरकालिच्छलेन॥ २६॥

रामः—मालाधर! यथाऽयं पाटलापटलपरिमलस्तथा [6]मन्ये निदाघसमयेनापि समायातम्। पश्य—

दिष्ट्या दृष्टः स प्रविष्टः पृथिव्यां,
कुर्वन् कर्णोत्तंसभूषां शिरीषैः।

---

१ आः दास्याःपुत्रि ! न जानासि त्वम्, मम महाब्राह्मणस्य शापोदकेन पर्शुरामकोपाग्निः उपशमं गतः।

---

1 देवि ! भा०। 2 °कस्य श्रेणी नव° दे०। 3 °त्यूना प्रसूनागमप्रीतिः पञ्चमरागगर्भित° दे०। 4 °तरमे° भा०। 5 वनान्तान्नेत° भा०। 6 मन्ये ग्रीष्मसम° भा०।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तापार्त्तानां यत्र यच्छत्यनूनां
यूनां प्रीतिं शीतमम्भः करम्भः ॥ २७ ॥

सीता—(रामं प्रति) [1]अज्जउत्त! इत्थ बाढं संतावो वट्टदि, ता अण्णदो गच्छम्ह। (इति सर्वे परिक्रामन्ति ।)

मालाधरः—स्वामिन्! अपरेऽपि नूतमृतवो देवसेवायै निजनिजरूपमुल्लासयन्तः समायाता एव। इतस्तावत् तापात्ययस्वरूपमवधार्यताम्—

जयति जगति प्रौढामोदं कदम्बकदम्बकं,
स्फुटति कुटजश्रेणी, वेणीभवन्ति दिशां घनाः ।
[1]हरिहयहरिज्जाते वाते प्रसर्पति सर्पभुक्-
कुलसुलभया रत्या केषां न नृत्यति मानसम्? ॥ २८ ॥

विदूषकः—(विलोक्य सहर्षम्) [2]ही ही! एस सयल[2]मच्चलोयजीविदकारणं वरिसारत्तो सं[3]पत्तो, ता गायिस्सं णच्चिस्सं (इति रे[4]ल्लुणुकान् ददानो नृत्यति ।)

(सर्वेऽप्यवलोक्य हसन्ति ।)

मालाधरः—देव! स एष प्रकटीकृतखञ्जरीटपेटको हंसावतंसितकमलाकरः शरत्समयः । तथाहि—

मयूरीणां रीणा श्रुतिविषयमायाति न रुतिः,
गणोऽयं भृङ्गीणां रणति कृतसप्तच्छदपदः ।
प्रसर्त्ति पाथोऽपि [5]प्रथयति यथा सम्प्रति तथा,
शरत्कालः केलीरुचिरिह वनान्ते विचरति ॥ २९ ॥

(अन्यतो विलोक्य च) कुमार रामभद्र! सुकुमारलवलीलतावितानफलोत्तालः स एष हेमन्तकालः । यः किल—

तोये शीते स्फीतबिम्बद्युतीन्दौ,
मन्दीकुर्वन्नादरं चन्दनेऽपि ।

---

१ आर्यपुत्र! अत्र बाढं सन्तापो वर्त्तते, तदन्यतः गच्छामः ।

२ आश्चर्यम् आश्चर्यम्, एष सकलमर्त्यलोकजीवितकारणं वर्षारात्रः सम्प्राप्तः तद् गास्यामि नर्त्तिष्यामि ।

---

1 हरहरिहरि° दे० । 2 °मत्तलो° भा० । 3 संवुत्तो भा० । 4 रेल्लुकान् भा० । 5 प्रसरति दे० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

एणाक्षीणामेष पुष्यत्यनेहाः,
स्नेहाधिक्यं पावकिन्यां हसन्त्याम् ॥ ३० ॥

रामः—मालाधर ! अपरमप्यत्र विमृश्यताम्—

शीतलं यदनिलं जनस्त्यजन्, प्रज्वलन्तमनलं निषेवते ।
तद् ध्रुवं समय एव गौरवे, कारणं न गुणसम्पदः पुनः ॥ ३१ ॥

(पुनरन्यतो विलोक्य सीतां प्रति) प्रिये ! पश्य शिशिरापगम-वसन्तागमरमणीयतमा समयलक्ष्मीः । इह हि—

लभन्ते सौभाग्यं किमपि हरिणाङ्कस्य किरणाः,
पिकाः शब्दायन्ते स्वगतममृतस्यन्दिवचसः ।
चलन्त्यद्य श्वो वोपवनपवनाश्चन्दनगिरे-
रवामं कामस्य स्फुरति च शुभाशंसि नयनम् ॥ ३२ ॥

अपरं च—

श्रीखण्डशैलपवमानविवर्द्धमान-
मानग्रहो मनसिजस्त्रिजगज्जयाय ।
कुन्दानि मन्दमकरन्दमदानि मुक्त्वा,
चापे च पेशलरसं बकुलं विधत्ते ॥ ३३ ॥

सीता—(भ्रमरबाधां नाटयन्ती रामं प्रति) अज्जउत्त[1] ! एस कुसुमिदलदाओ परिहरिय मह वयणाहिमुहो शिलीमुहो परिब्भमदि । (इति राममुपसर्पति ।)

रामः—देवि !

मल्लीषु नोल्लसति, नाटति पाटलासु,
नीपान्यपास्यति, विमुञ्चति चम्पकानि ।
नाम्भोरुहे भ्रमति, केतकमेति नायं,
भृङ्गः कृशाङ्गि ! भवदाननगन्धलुब्धः ॥ ३४ ॥

सीता—(सभ्रूभङ्गम्) कधमिदो[2] वि एस महुयरो मामणुसरदि ?। (इति करसरोरुहेण निवारयति ।)

रामः—(दृष्ट्वा स्वगतम्)

---

१ आर्यपुत्र ! एष कुसुमितलताः परिहृत्य मम वदनाभिमुखः शिलिमुखः परिभ्रमति ।
२ कथमितोऽपि एष मधुकरः मामनुसरति ? ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

मुग्धाया अपि कान्ताया व्युत्पत्तिं गमिता परम् ।
भ्रूलीला मधुमत्तेन स्मरेण भ्रमरेण च ॥ ३५ ॥

(पुनर्भ्रमरं प्रति)

भ्रातश्चक्रे भ्रमर ! भवता किं तपः ? क्व प्रदेशे ?,
के वा देवाः श्रुतिसुखकृता रञ्जिता गुञ्जितेन ? ।
यत् कान्तायाः प्रसभमभयस्ताड्यमानोऽपि लीला-
पद्मेनैवं स्पृशसि वदनामोदलोलं कपोलम् ॥ ३६ ॥

(प्रकाशं पुनर्मालाधरं प्रति) मालाधर ! मध्याह्नकालकठोरीकृतकिरणजालो भगवान् गभस्तिमाली । सम्प्रति हि—

घर्माम्भःसम्भवा श्रीर्विलसति दयिताभालमालम्ब्य किञ्चित्,
सच्छायाः श्रान्तकायः श्रयति च निचयः पक्षिणां वृक्षशाखाः ।
पादैः पूष्णः कदुष्णं शिशिरयति सरस्तीरनीरं समीरः,
क्षीरक्षोणीरुहाधः स्थितिमिह दधते गोकुलान्याकुलानि ॥ ३७ ॥

तद् दर्शय क्रीडातडागिकापदवीम्, यथा तत्रोपविश्य मध्यन्दिनमतिवाहयामः ।

विदूषकः—[1]भो वयस्स ! [1]उवत्थिदा भोयणवेला, ता गमिस्सं । (पुनः प्रतीहारीं प्रति) भोदीए पभावदि ! देहि मे हत्थावलंबणं । ण खु बुभुक्खाए चलिदुं सक्कुणोमि ।

प्रतीहारी—(विहस्य) [2]अज्ज मंडव्व ! इत्थ थूलोदरदा अवर[2]ज्झति, न उणो बुभुक्खा ।

रामः—प्रभावति ! यथा रोचते प्रियवयस्याय तथा विधीयताम् । (इति प्रभावत्या दत्तहस्तावलम्बो विदूषको निष्क्रान्तः ।)

मालाधरः—स्वामिन् ! इतः समागम्यतामिति ।

(सर्वे परिक्रामन्ति ।)

मालाधरः—देव ! विलोक्यताम्—

---

१ भो वयस्य ! उपस्थिता भोजनवेला, तद् गमिष्यामि । भवति प्रभावति ! देहि मे हस्तावलम्बनम् । न खलु बुभुक्षया चलितुं शक्नोमि ।

२ आर्य माण्डव्य ! अत्र स्थूलोदरता अपराध्यति, न पुनः बुभुक्षा ।

---

1 उवस्थिदा भोयणवेला, ताऽऽग° भा० । 2 °ज्झदि, ण उण भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

इयं सा हंसालीकलितकमला केलिसरसी,
रसद्भिः सानन्दं जलविहगवृन्दैः कृतपदा ।
गभीरे यन्नीरे हिमसमयम[1]न्तःस्थितमितः,
समुद्धर्तुं शक्तो न हि तुहिनमुक्तोऽपि सविता ॥ ३८ ॥

तदस्यास्तीरतरुच्छायायामुपविश्यताम् । (इति तथाकुर्वन्ति ।)

रामः—(सीतां प्रति) प्रिये वैदेहि ! दृश्यता[2]मियं क्रीडातडागिका—

दुग्धस्निग्धजला तरङ्गतरला संसक्तरक्तोत्पला,
तीरोत्तुङ्गनगा विहङ्गसुभगा प्राप्तप्रमोदाध्वगा ।
उद्भ्रान्तभ्रमरा विराजिशफरा नश्यन्निदाघज्वरा,
सेयं तुल्यरसीकरोति सरसी किं नाऽऽवयोश्चेतसी ? ॥ ३९ ॥

सीता—(सस्पृहमवलोक्य) अज्जउत्त[१] ! पिक्ख पिक्ख खेलंतरायहंसमिहुणेहिं वि[3]सट्टकंदुट्टवणेहिं मणोहारिणी एसा कासारिया ।

रामः—(अपवार्य) प्रिये ! भवदालोकनकृतार्थीकृतलोचनस्य मम किमेतया पुनरुक्तवस्तुशोभा[4]विभूषितया निभालितया ? । यतः—

त्वदधरमधुरं पयस्त्वदक्षिद्वयहसितानि [5]पुरः सरोरुहाणि ।
तव गतिविजिताश्च राजहंसास्तव भ्रुकुटीकुटिला तरङ्गभङ्गिः ॥ ४० ॥

(पुनः सोपरोधम्)

बाले ! विलोकय दिगन्तरमन्तरायो,
माऽस्तु त्वदीयवदनेन्दुभयादकाले ।
संयोगसम्मदकथासु रथाङ्गनाम्ना-
मम्भोरुहां च हसतां सह राजहंसैः ॥ ४१ ॥

हंसिका—(दूरमवलोक्य रामं प्रति) कुमार[२] रामभद्द ! एस को वि पुरिसो समागच्छदि ।

---

१ आर्यपुत्र ! प्रेक्षस्व प्रेक्षस्व—खेलद्राजहंसमिथुनैः विकसितनीलकमलवनैः मनोहारिणी एषा कासारिका ।

२ कुमार रामभद्र ! एष कोऽपि पुरुषः समागच्छति ।

---

1 °मत्र स्थि° दे० । 2 °मिति क्रीडा° दे० । 3 बिससकुंदुअच्चणेहिं मणोहारिणी एसा सरिया (बिसशकुन्तार्चनैः मनोहारिणी एषा सरित्) दे० । 4 °शोभाभिभूतया ? । यतः दे० । 5 पुरा दे० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

रामः—([1]दृष्ट्वोपलक्ष्य च) कथमयं विनयन्धरः सम्प्राप्तः ? ।

(प्रविश्य)

विनयन्धरः—(प्रणम्य) कुमार ! महाराजदशरथस्त्वामाह्वयति ।

रामः—(विमृश्य ससम्भ्रमम्) विनयन्धर ! कथं तातपादाः समाकारयन्ति ? । (सीतां प्रति) प्रिये ! त्वमपि मातुः कौशल्यायाः समीपमुपसर्प । तातादेशश्रव[2]णानन्तरं वयमपि तत्राऽऽगमिष्यामः ।

(सीता हंसिकया सह निष्क्रान्ता ।)

रामः—मालाधर ! त्वमप्युद्यानपालनव्यापारतत्परो भव ।

मालाधरः—यदादिशति देवः । (इति निष्क्रान्तः ।)

रामः—(समुत्थाय परिक्रामन्) विनयन्धर ! किं कुर्वन्ति तातपादाः ? ।

विनयन्धरः—कुमार ! निजाश्रमादागतं लिखितपत्रहस्तं देवरातामिधानं महामुनेर्विश्वामित्रस्य शिष्यं सत्कारपूर्वं विसृ[3]ज्य तत्रभवतो वशिष्ठस्य प्रियशिष्येण जानूकर्ण्येन समं संलपन्तः सन्ति ।

रामः—अपि ज्ञायते कोऽपि लिखितार्थः ? ।

विनयन्धरः—तदेतल्लिखितमवधारयतु देवः । (इत्यर्पयति ।)

रामः—(गृहीत्वा वाचयति ।)

स्वस्ति, स्वाश्रमतः पतिः शमवतां श्रीगाधिपुत्रः पुरे,
साकेते सुकृतैकसक्तमनसं श्रीरामतातं नृपम् ।
आशीर्वादमुदीर्य जल्पति यथा[4] कार्यं च यत् किञ्चन,
प्रारब्धं भवताऽस्ति मन्दगतिना भाव्यं न तस्मिन्निति ॥ ४२ ॥

(पुनर्विमृश्य) किं नु नाम तत् कार्यम् ? यदर्थे भगवान् विश्वामित्रस्तातपादानेवं त्वरावतः करोति ।

विनयन्धरः—(विहस्य) तत्रावधारितपादः कुमारः स्वयमेव तत् कार्यमवगमिष्यति ।

रामः—विनयन्धर ! जानामि भगवन्तं जानूकर्ण्यम्, कः पुनरयं देवरातो नाम ? ।

विनयन्धरः—अवधारयतु कुमारः—

---

1 (दृष्ट्वा सोपलक्षं च) दे० । 2 °णादन° भा० । 3 °ज्य भगवतो दे० । 4 तथा दे० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

शुनःशेफो नाम्ना मुनिरयमजीगर्त्ततनयः,
क्रतौ हारिश्चन्द्रे नृपसुतपशौ यं किल पिता ।
ददौ तद्रक्षार्थं तदनु [1]नुतितुष्टेन हरिणा,
हविष्यान्मुक्तोऽसौ [2]कुशकसुतसूनुः स्वयमभूत् ॥ ४३ ॥

तदनन्तरं च—

विश्वामित्रः पुत्रमादाय दोर्भ्यां,
कृत्वोत्सङ्गे हर्षबाष्पाम्बुवर्षी ।
पश्चादेनं देवराताभिधानं,
मध्ये तेषामृत्विजां व्याजहार ॥ ४४ ॥

रामः—(स्मृत्वा सचमत्कारम्) यः किल मन्त्रस्तुतिपरितोषितप्रजापतिप्रभृतिदेवताप्रसादादपास्तयूपबन्ध[3]नं पशुबन्धवर्जितमाञ्जसवं नाम यज्ञं ददर्शेति श्रूयते ।

विनयन्धरः—अथ किम् ? । (पुनरग्रतो विलोक्य) कुमार ! स एष महाराजदशरथः पुरतो जानूकर्ण्यसहितो वर्त्तते ।

(ततः प्रविशति यथानिर्दिष्टो दशरथो जानूकर्ण्यश्च ।)

दशरथः—भगवन् जानूकर्ण्य !

किमाख्यामस्तेषामविषयमनोभिः स भगवान्,
स्वजन्मा यैर्जन्मावधि विधिवदेकः प्रणिहितः ।
नमस्यः सोऽपि स्यान्निवसति जराजर्जरवयाः,
प्रयागप्रत्यन्तप्रसृतसलिलायां सरिति यः ॥ ४५ ॥

जानूकर्ण्यः—राजन्नजराजनन्दन ! सुकृतसम्पादनीया खल्वियं सामग्री । तथाहि—

सरस्वत्यां स्नानं, शिरसि हरिशेषाः सुमनसः,
प्रसन्ना हृद्वृत्तिः, शतपथकथावर्णनरसः ।
मुनीनामाराध्या परिषदरिषड्वर्गजयिनी,
विना पुण्यैरेषा न भवति मनीषा तनुभृताम् ॥ ४६ ॥

रामः—(उपसृत्य) तात ! त्वदपत्यं रामभद्रः प्रणमति । (इति दशरथं प्रणम्य) भगवन् ! नमस्तुभ्यम् । (इति जानूकर्ण्यं प्रणमति ।)

---

1 मुनितुष्टेन भा० । 2 कुसुक° दे० । 3 °न्धनः पशुबन्धव° दे० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

जानूकर्ण्यः—स्वस्ति भवते ।

राजा—(सहर्षम्) वत्स रामभद्र ! इहोपविश्यताम् । (इ[1]त्यात्मसमीपमुपवेशयति ।)

जानूकर्ण्यः—(उभावपि निर्वर्ण्य स्वगतम्)

राजा राजत्यनेनायं सुतेनान्तिकवर्त्तिना ।
प्ररोहेणाऽऽत्मतुल्येन वटवृक्ष इवोन्नतः ॥ ४७ ॥

राजा—भगवन् मैत्रावरुणशिष्य !

उत्पत्तिः शिशिरेतरद्युतिकुले, विद्यागुणस्त्वद्गुरोः,

(पुनः सलज्जम्)

जित्वाऽपि स्वयमाहवे दितिसुतान् विष्णुर्ददौ मे यशः ।

(रामं दर्शयन्)

सोऽयं शक्तियुतः सुतश्च, यदिह प्राप्यं तदाप्तं मया,
तन्नित्यं प्रणवाभिधेयमधुना लब्धुं समीहे महः ॥ ४८ ॥

जानूकर्ण्यः—महाराज ! न हि प्रश्रयवशादनुचितमभिधातुमर्हसि । तथाहि—

स्वर्गौकसामधिपतिर्धृतचण्डचाप-
मारोप्य वीरसमरावसरे पुनस्त्वाम् ।
सज्जीकरोति न गजं कुलिशं न धत्ते,
किन्तु द्विषां स लभते विभवं भुवं च ॥ ४९ ॥

तदिदानीमात्मचिकीर्षितसम्पादनाय समायातः समयो महाराजस्य । पश्य—

आद्ये विद्याः कुलगुरुमुखात् सङ्गृहीताः समस्ताः,
त्राता धात्री भुवनविजयश्रीर्द्वितीयेऽद्वितीये ।
तार्त्तीयीके वयसि तु सितच्छत्रमारोप्य पुत्रे,
पुण्यारण्यप्रणयनिपुणैर्भूप ! भाव्यं भवद्भिः ॥ ५० ॥

राजा—(रामं शिरस्याघ्राय) वत्स ! सज्जय निजस्कन्धबन्धमधुना वसुन्धराभा[2]रोद्वहनाय । यतः—

एतैः प्रवीरचरितैः [3]प्रचुरानुरागात्,
त्वामात्मनाऽप्यनुसिसीर्षति [4]राजलक्ष्मीः ।

---

1 °त्याहूय समीपे समुप° भा० । 2 °भारोद्धरणाय भा० । 3 प्रवरा° दे० । 4 राज्यल° दे० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सा प्राप्य सम्प्रति ममानुमतिं कृतार्थी-
भूयान्मया च जरता रमतां तपःश्रीः ॥ ५१ ॥

(रामः तूष्णीमधोमुखस्तिष्ठति ।)

राजा—(रामस्य चिबुकमुन्नमय्य) वत्स ! किमुदासीन[1]तामस्मदीये वचसि समालम्बसे ? ।

रामः—(सविनयम्) तात !

समीहिता कस्य न राज्यलक्ष्मीस्त[2]त्रापि चित्रांशुकुलोद्भवाऽसौ ।
मनस्तु तस्यामपि मुक्तभावं, त्वत्पादसेवास्वनुरज्यते मे ॥ ५२ ॥

राजा—(विहस्य) वत्स ! न जानासि निजपूर्वजानां त्रिभुवनविख्यातमिदं कुलव्रतम् । तथाहि—

यावन्मूर्द्धनि मूर्द्धजाः पिकरुचिं गृह्णन्ति तावद् गृहे
स्थातुं, पातुमिलां, विलासमनया कर्त्तुं यतन्ते श्रिया ।
शुभ्रत्वं तु गतेषु तेषु तदनु स्थित्वा वने पावने,
शिष्टोद्दिष्टममी शमेन गमयन्त्युष्णांशुवंशोद्भवाः ॥ ५३ ॥

जानूकर्ण्यः—कुमार रामभद्र ! सर्वथा तदेत[3]दनुलङ्घनीयं गुरुवचः ।

(नेपथ्ये)

वैतालिकः—देव ! सुखाय भवते भवतु सायन्तनः सन्ध्यासमयः । सम्प्रति हि—

अर्थाम्भोभिर्वरुणनगरीवासिनां वासरेन्द्रे,
पादोष्माणं शमयति वियद्वर्त्मखेदोपनीतम् ।
देशे देशे दिशि दिशि तमः कोल-काकोलकाय-
च्छायाचौरं विहरति मुहुर्बन्धुरं बन्धुकीनाम् ॥ ५४ ॥

अपि च—

अनीदृशीमात्मदशां विमृश्य, सैष प्रतापी सविताऽपि सम्यक् ।
[4]तेजो निजं राज्ञि नवे निवेश्य, यियासतीवाऽस्तगिरेर्वनान्तम् ॥ ५५ ॥

---

1 °ताऽस्मदीये वचसि समालम्ब्यते ? भा० । 2 °त्रापि [ति]ग्मांशु° भा० । 3 °दलङ्घ° भा० । 4 तेजो नवं राज्ञि दे० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

(प्रविश्य)

कञ्चुकी—देव ! विज्ञापयति केकयराजसुता यदत्र पादोऽवधार्यतामिति ।

राजा—शिखाबल ! किमिदानीमध्यवस्यति देवी ? ।

कञ्चुकी—देव ! कुमाररामभद्रराज्याभिषेकाभ्युदयवार्त्ताप्रमुदितैः पुरनिवासिभिः प्रवर्त्त्यमानां नगरशोभां विभावयितुं चन्द्रशालाधिरूढा बहिःप्रदेशादागतया मन्थरया सह किमपि पर्यालोच्य मामिह प्रहितवती ।

राजा—वत्स ! गच्छामो वयं देव्या भरतमातुः समीपम् । त्वमपि वध्वा सीतया सहितो राज्याभिषेकव्रतग्रहणाय प्रगुणीभव ।

रामः—यदादिशति देवः । (इति उत्थाय सर्वे निष्क्रान्ताः)

॥ द्वितीयोऽङ्कः समाप्तः ॥

सत्कविकाव्यशरीरे दुष्यदगददोषमोषणैकभिषग् ।
श्री**वस्तुपाल**सचिवः सहृदयचूडामणिर्जयतु ॥ ५६ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तृतीयोऽङ्कः ।

(ततः प्रविशति उत्तरीयाञ्चलाच्छादितवल्कलयुगला पत्रहस्ता मन्थरा ।)

मन्थरा—अज्ज मह चिरकालसंव[1]ड्ढिदो फलिदो मणोरहपायवो । (इति हर्षनाटितकेन परिक्रम्य) पेसिद म्हि देवीए केगईए अज्जसुमंतसमीवं । जहा—कुमाररामभद्दो रहमारोविय तुवरिद[2]मित्थ समाणीयदु त्ति । ता संपादि[3]दमेदं मए । (पुरो विलोक्य) एसा सुबुद्धिया दुदियं विय मह हियय इदो य्येव आगच्छदि, ता पडिवालयिस्सं ।

(ततः प्रविशति सुबुद्धिका ।)

सुबुद्धिका—(सानन्दम्) [2]सुप्पभादा भयवदी रयणी अउज्झाए, अहवा सयलाए ज्जेव पुहईए, जं अज्ज कुमाररामभद्दस्स रज्जाहिसेयमहूसवो हविस्सदि त्ति । संपयं खु पउर-जणवदलोएहिं लद्धनिहाणेहिं विय पमोदपूरिदेहिं पूरिदाओ नयररत्थाओ । ता गडुय नयरसोहं पिक्खिस्सं । (पुरो विलोक्य) अये ! कधं एसा अज्जा मन्थरा ? । (इत्युपसृत्य) अज्जे ! कहिं पत्थिदाऽसि ? ।

मन्थरा—[3]देवीए केगईए समीवं ।

सुबुद्धिका—[4]अज्जे ! संपदि विसेसदो हरिसिय व्व लक्खीयसि ? । अहवा अस्सिं रामभद्दस्स रज्जाहिसेयमहूसवे किं अवरं पि हरिसकारणं पुच्छीयदि ? ।

---

१ अद्य मम चिरकालसंवर्द्धितः फलितः मनोरथपादपः । प्रेषिता अस्मि देव्या कैकेय्या आर्यसुमन्त्रसमीपम् । यथा—कुमाररामभद्रः रथमारोप्य त्वरितमत्र समानीयतामिति । तत् सम्पादितमेतद् मया । एषा सुबुद्धिका द्वितीयं इव मम हृदयम् इत एव आगच्छति, तत् प्रतिपालयिष्यामि ।

२ सुप्रभाता भगवती रजनी अयोध्यायाम्, अथवा सकलायां एव पृथिव्याम्, यद् अद्य कुमाररामभद्रस्य राज्याभिषेकमहोत्सवो भविष्यतीति । साम्प्रतं खलु पौर-जनपदलोकैः लब्धनिधानैः इव प्रमोदपूरितैः पूरिताः नगररथ्याः । तद् गत्वा नगरशोभां प्रेक्षिष्ये । अये ! कथं एषा आर्या मन्थरा ? । आर्ये ! कुत्र प्रस्थिताऽसि ? ।

३ देव्याः कैकेय्याः समीपम् ।

४ आर्ये ! सम्प्रति विशेषतः हृष्टा इव लक्ष्यसे ? । अथवा अस्मिन् रामभद्रस्य राज्याभिषेकमहोत्सवे किं अपरं अपि हर्षकारणं पृच्छयते ? ।

---

1 °संवड्ढिदो दे० । 2 °रियमित्थमा° भा० । 3 °दमेवेदं । पुरो भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

मन्थरा—[1]सुबुद्धिए ! अवरं पि चिट्ठदि ।

सुबुद्धिका—[2]किं णु तं ? ।

(मन्थरा कर्णे कथयति ।)

सुबुद्धिका—(क्षणं विचिन्त्य) [3]कधं देवीए केगईए गिहिदो एस दे मंतो ? ।

मन्थरा—[4]अणिच्छंती वि बलादो गाहिदा ।

सुबुद्धिका—[5]किं बलं ? ।

मन्थरा—[6]पढमं तेहिं तेहिं वयणोवण्णासेहिं पडिबोहिदा[1] वि जदा न पडिबुज्झदि, तदो मए बालत्तणम्मि सिद्धजोइ[2]णीसयासादो लद्धमोहणमंताहिमंतिदं कडुअ तंबूलं दिण्णं । तस्स चव्वणाणंतरं मोहिदहियियाए तीए मह वयणं पडिवण्णं ।

सुबुद्धिका—[7]कधं एस मंतो महाराए वि संचरिदो ? न वेति ? ।

मन्थरा—[8]संचरिदो ज्येव ।

सुबुद्धिका—[9]कहं चिय ? ।

मन्थरा—[10]पुव्वं कि[3]ल महाराएण देवीए दुवे वरा सयं पडिवण्णा, ता तं [4]ज्येव वरजुअलं देवीए महारायसयासादो जायिदं ।

---

१ सुबुद्धिके ! अपरं अपि तिष्ठति ।

२ किं नु तत् ? ।

३ कथं देव्या कैकेय्या गृहीतः एष ते मन्त्रः ? ।

४ अनिच्छन्त्यपि बलाद् ग्राहिता ।

५ किं बलम् ? ।

६ प्रथमं तैस्तैः वचनोपन्यासैः प्रतिबोधिताऽपि यदा न प्रतिबुध्यते ततः मया बालत्वे सिद्धयोगिनीसकाशाद् लब्धमोहनमन्त्राभिमन्त्रितं कृत्वा ताम्बूलं दत्तम् । तस्य चर्वणानन्तरं मोहितहृदयया तया मम वचनं प्रतिपन्नम् ।

७ कथं एष मन्त्रः महाराजेऽपि सञ्चरितः ? न वा ? इति ।

८ सञ्चरित एव ।

९ कथमिव ? ।

१० पूर्वं किल महाराजेन देव्यै द्वौ वरौ स्वयं प्रतिपन्नौ, तत् तदेव वरयुगलं देव्या महाराजसकाशाद् याचितम् ।

---

1 °हिदा ण पडिवज्जदि तदो भा० । 2 °णीए सया° भा० । 3 किर भा० । 4 ज्जेव भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सुबुद्धिका—[1]अज्जे[1] ! जदि न कुप्पसि ता भणामि किं पि ।

मन्थरा—[2]भण, मा[2] संक ।

सुबुद्धिका—[3]भवदीए अत्तणो [3]सरिसं मंतिदं । न रहुरायकुलसरिस्सं केगय[4]राय-कुलसरिच्छं वा ।

मन्थरा—[4]सुबुद्धिए ! दाणिं तुमं पडिबोहयंतीए मह कालक्खेवो होदि त्ति ता गमिस्सं। (इति द्रुततरं निष्क्रान्ता ।)

सुबुद्धिका—(सोद्वेगम्) [5]हा महाराय ! [5]रहुरायकुलकमलरायहंस ! नियवयण-पासे निवडिदो सि । हा देवि कोसल्ले ! [6]सल्लिदहियया कया सि दुट्ठदासीए । हा रामभद्द ! निक्खित्तो सि दुत्तरे वसणसायरे । हा जणयरायनंदणि ! कहं हविस्ससि ? । हा भयवं दिणणाह ! कधं तुज्झ वि वंसो दुव्विहिघुणघुणिदो संजादो ? । (इति रोदिति । पुनर्वि-मृश्य) ता किं दाणिं णयरसोहावलोयणेण ? (इति व्यावृत्य निष्क्रान्ता ।)

(ततः प्रवेशकः)

(ततः प्रविशति कौशल्या रामभद्रः सुमन्त्रश्च ।)

सुमन्त्रः—(सौत्सुक्यम्) कुमार रामभद्र ! द्रुततरमुत्सह्यतां राजकुलगमनाय । समारुह्यतामयं काञ्चनस्यन्दनः ।

कौशल्या—(रामं शिरस्याघ्राय) [6]अज्ज सुमंत ! रामभद्दपिदुणो महारायस्स

---

१ आर्ये ! यदि न कुप्यसि तद् भणामि किमपि ।

२ भण मा शङ्कस्व ।

३ भवत्या आत्मनः सदृशं मन्त्रितम् । न रघुराजकुलसदृशं केकयराजकुलसदृशं वा ।

४ सुबुद्धिके ! इदानीं त्वां प्रतिबोधयन्त्या मम कालक्षेपो भवतीति तावद् गमिष्यामि ।

५ हा महाराज रघुराजकुलकमलराजहंस ! निजवचनपाशे निपतितोऽसि । हा देवि कौशल्ये ! शल्यितहृदया कृताऽसि दुष्टदास्या । हा रामभद्र ! निक्षिप्तोऽसि दुस्तरे व्यसन-सागरे । हा जनकराजनन्दिनि । कथं भविष्यसि ? । हा भगवन् दिननाथ ! कथं तवापि वंशः दुर्विधिघुणघुणितः सञ्जातः ? । तत् किमिदानीं नगरशोभावलोकनेन ? ।

६ आर्य सुमन्त्र ! रामभद्रपितुः महाराजस्य समादेशः इत्थं त्वां त्वरयति ? कुलपुरुषता-सम्पादितः स्नेहो वा ? ।

---

1 अज्जा ! भा० । 2 नीसंका भा० । 3 सरिस्सं भा० । 4 केगइरायसरिस्सं वा भा० । 5 रहुकुल° भा० । 6 ससल्लि° भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

समादेसो [1]इत्थं तुमं तुवरावेदि ? कुलपुरिसदासंपादिदो सिणेहो वा ?

सुमन्त्रः—देवि ! यावदहं कृतप्राभातिकक्रियो राजकुलं प्रति प्रस्थितः तावत् त्वरिततरमागत्य मन्थरयेति कथितम्—यन्महाराजसमीपस्थिता देवी केकयराजात्मजा समादिशति–समानीयतां रामभद्रः । तदहमिहागतोऽस्मि ।

कौशल्या—(रामं शिरस्याऽऽघ्राय सहर्षम्) [1]जाणामि, पुत्तव[2]त्सला मह पियसही ।

रामः—(निःश्वस्य) आर्य सुमन्त्र !

तस्थे सुखमेव मया धात्रीं बिभ्रत्सु तातपादेषु ।
सम्प्रति तु राज्यचिन्तागहनगतेनैव भवितव्यम् ॥ १ ॥

सुमन्त्रः—कुमार ! निरन्तरं गुर्वादेशवशंवदानां भवादृशानां हृदयवृत्तिर्न कदाचिदपि स्वातन्त्र्यमनुसरति ।

कौशल्या—(रामं प्रति) [2]जाद[3] ! गुरुयणवयणसंपादणे गिहीदव्वदु ज्जेव भवं, तो किमेवं विमरसीयदि ? ।

सुमन्त्रः— कुमार रामभद्र !

सवित्री तव सावित्री साक्षाद् धाता च ते पिता ।
तत् कस्मा[4]देतयोराज्ञा विलम्बेन विडम्ब्यते ? ॥ २ ॥

तदुत्थीयतामिति ।

(सर्वे तथाकुर्वन्ति ।)

सुमन्त्रः—(कौशल्यां प्रति) देवि दशरथदयिते ! भवत्याऽप्युपात्तमङ्गलसम्भारया तत्र सुमित्रा-वैदेहीभ्यां सह समागन्तुमुचितम् ।

कौशल्या—[3]अज्ज सुमंत ! भयवदीणं कुलदेवदाणं सवरियं निव्वत्तिय समागमिस्सं । (इति निष्क्रान्ता)

सुमन्त्रः—कुमार कुशलमते ! स एष महाराजदशरथरथः, समारुह्यताम् ।

---

१ जानामि, पुत्रवत्सला मम प्रियसखी ।

२ जात ! गुरुजनवचनसम्पादने गृहीतव्रत एव भवान्, तत् किमेवं विमृश्यते ? ।

३ आर्य सुमन्त्र ! भगवतीनां कुलदेवतानां सपर्यां निर्वर्त्य समागमिष्यामि ।

---

1 इत्थ भा० । 2 °त्सल्ला भा० । 3 ताद ! गुरुयणवयणसंवादणे (गुरुजनवचनसंवादने) गिहीदव्वदो ज्येव भा० । 4 °स्मादनयोरा° भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

(इत्युभौ तथाकृत्वा परिक्रामतः ।)

सुमन्त्रः—आयुष्मन् ! पश्य पश्य भवदीयाभ्युदयप्रमोदनिवर्त्तितकर्त्तव्यान्तरैर्नगरनिवासिभिरुद्भासितामेतां नगरशोभाम् । तथाहि—

सौधान्युद्धृततोरणानि, तरुणीवर्गश्च भर्गप्रिया-
तुल्यश्रीः प्रतिमन्दिरं प्रमुदितः सम्भूय गायत्ययम् ।
रथ्येयं पृथुलाऽप्यजायत तथा पुंस्कोटिभिः सङ्कटा,
नास्यां नाथ ! यथा तिलोऽपि गलितः प्राप्नोति पृथ्वीतलम् ॥३॥

(तथाकुर्वन्नङ्गुल्या निर्दिश्य) आयुष्मन् ! पश्य पश्य प्रचुरप्रमोदानुरागहृतहृदयानां नगरनिवासिनीनामिदमध्यवसितम्—

समुद्धर वसुन्धरां चिरमिति प्रयुक्ताशिषः,
किरन्ति कुसुमानि ते शिरसि साधु वृद्धाः स्त्रियः ।
इमाश्च हृदयङ्गमाः पुरपुरन्ध्रयस्त्वन्मुखे,
जितस्मरशिलीमुखाः प्रतिदिशं दिशन्ते दृशः ॥ ४ ॥

(इति परिक्रम्य पुरो विलोकयन्) स एष महाराजदशरथप्रासादः प्रगुणितप्रभूताभिषेकसम्भारो भरद्वाजप्रमुखमहामुनिमहनीयः परिभाव्यतामायुष्मता ।

सौधेऽत्र नेत्रकमलैः ककुभावतंसा-
नुल्लासयन्ति नृपतिप्रमदाः प्रमोदात् ।
आन्दोलनाच्च मरुतां ध्वजवैजयन्त्यो,
नृत्यन्ति मङ्गलमृदङ्गरवैरिवैताः ॥ ५ ॥

तदवतीर्यतामितः ।

(रामो रथादवतरणं नाटयति ।)

सुमन्त्रः—कस्कोऽत्र भोः ! ? ।

(प्रविश्य)

पुरुषः—आर्य ! समादिश्यताम् ।

सुमन्त्रः—भद्र ! गृहाण स्यन्दनमेनम्, अश्वांश्च विरमय । (इति रथमर्पयति ।)

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

(पुरुषो रथं गृहीत्वा निष्क्रान्तः ।)

सुमन्त्रः—कुमार रामभद्र ! तदेतदग्रे देव्या भरतमातुश्चतुःशालम्, यत्रासौ रघुचक्रवर्त्ती वर्त्तते । तदिदं प्रविशाव इति ।

(उभौ तथा कुरुतः ।)

रामः—(पुरोऽवलोक्य ससम्भ्रमम्) आर्य [1]सुमन्त्र ! किमपि मन्त्रयमाणाविव पुरतः पितरौ लक्ष्येते । तदसाम्प्रतमावयोर्गन्तुम् ।

सुमन्त्रः—(निपुणं निरूप्य) कुमार ! सम्प्रति प्रकोपवती देवी विभाव्यते । तथाहि—

मलिनवसना निस्ताम्बूला निराभरणप्रभा,
शिरसि दधती वेणीभूतं शिरोरुहसञ्चयम् ।
चरणपतितेऽप्यस्मिन् नाथे मुखं च पराङ्मुखं,
विरचयति यद् देवी दूरादभूत् तदमर्षभूः ॥ ६ ॥

तदियं यावन्महाराजस्य प्रणयवचनामृतेन प्रशान्तकोपानला[2] भवति तावदिहैवावस्थीयताम् । यतः—

एषा विशेषदयिता कृ[3]तविप्रियाय,
प्रायः प्रियाय न चिराय करोति रोषम् ।
नीत्वाऽपि रात्रिमपरत्र दिनाधिनाथे,
प्राप्ते कियत् कमलिनी विनिमीलिताऽऽस्ते ? ॥ ७ ॥

(इत्युभौ स्तम्भान्तरितौ तिष्ठतः ।)

(ततः प्रविशति यथानिर्दिष्टा कैकेयी, तां च प्रसादयन् राजा मन्थरा च ।)

राजा—(सोपरोधम्)

देशं कृशाङ्गि !, हरिणाक्षि ! हिरण्यराशिं,
मत्तेभगामिनि ! महेभघटां च [4]मत्ताम् ।
स्वैरं गृहाण गृहिणित्वमिदं नु देवि !,
मां मास्म कारय न शर्म न येन धर्मः ॥ ८ ॥

---

1 सुमन्त ! भा०। 2 °ला न भ° भा० । 3 विहिताप्रियाय दे० पाठान्तरम् । कृतमन्यवेऽपि भा० । 4 मत्तः दे० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

[1]अपरं च--

पाणिग्रहात् प्रभृति मौलिधृतत्वदाज्ञे,
दीनानने च रचिताञ्जलि याचमाने ।
कृत्वा कृपां [2]मयि विजीर्यति देवि ! कार्या-
दस्मान्निवर्त्तय मनः प्रणतोऽस्मि पादौ ॥ ९ ॥

(इति [3]पादयोर्निपतति ।)

सुमन्त्रः—कथमतिक्रान्तमर्यादो यादोनिधिरिव[4] देव्याः प्रणयकोपः ? यदियं कृतप्रणाममपि प्राणेश्वरं नानुरुध्यते । (पुनर्दृष्ट्वा विमृश्य च) कुमार रामभद्र ! विप्रकृष्टप्रदेशतया न स्फुटा वचनोपलब्धिः, परमिङ्गितैरपि वितर्क्यते-- यत् किमप्यभीष्टमर्थं याचते देवी, तदप्रियत्वान्नृपतिरदातुकामो मुहुर्मुहुरेवं देवीं प्रसादयति ।

रामः--आर्य सुमन्त्र ! नियतमियं मध्यमाम्बा वनगमनाभिलाषिणस्तातपादाननुगन्तुमना [5]आगृहीतवती सुतविन्यस्तपत्नीकं वनप्रस्थानपक्षमाक्षिपन्ती तातपादैर्मुहुर्मुहुरेवमनुनीयते।

सुमन्त्रः--कुमार ! सर्वोऽपि स्वहृदयानुसारेण परहृदयमपि वितर्कयति, परं नैतदहं मन्ये । न ह्येतावत्प्रयत्नसम्पादनीयोऽयमर्थः । तथाहि--

धृत्वा मूर्धनि यत् पदद्वयमयं देवीं मुहुर्याचते,
यच्चैषाऽपि पतिव्रता वितनुते पत्युर्वृथा प्रार्थनाम् ।
भूपृष्ठे लुठति प्रियावगणितो यद् भूपतिः साऽप्यमुं,
तादृक्षं यदुपेक्षते तदपरं किञ्चिद् विधित्सुर्विधिः ॥ १० ॥

राजा—(देवीं प्रति अञ्जलिं बद्ध्वा)

वप्तुर्विद्धि कुलं कलङ्कवि[6]कलं, नम्रं पुरः पश्य मां,
कौशल्याप्रणयं प्रमाणय, परां रामस्य भक्तिं स्मर ।
धिग् ! दासीवचसा विमुह्य महतामस्तुत्यमेतन्निजं,
शीलं शैलसुतानुसारिचरिते ! किं निर्मिमीषे मृषा ? ॥ ११ ॥

कैकेयी—(मन्थरां प्रति) [1]मन्थरे ! पुणो पुणो वि एवमत्ताणयं किलेसयंतो

---

१ मन्थरे ! पुनः पुनः अपि एवमात्मानं क्लेशयन् प्रतिबोध्यतां आर्यपुत्रः ।

---

1 अपि च भा० । 2 मयिक्लि जीर्यति भा० । 3 पादयोः प° भा० । 4 °रिव प्रकोपः भा० । 5 आग्रहवती भा० । 6 °विमलं, नम्रं पुनः पश्य दे० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पडिवोहीयदु अज्जउत्तो ।

मन्थरा—(राजानं प्रति) देव ! जं ज्येव तुम्हेहिं पसण्णेहिं वरदुवयं पडिवन्नं तं ज्येव देवी इत्थं पत्थेदि ।

राजा—ननु प्राणानसौ प्रार्थयति इति किं न ब्रवीषि ? । (पुनर्देवीं प्रति सकरुणम्) देवि ! [1]प्रमाणीकुरु मे प्रार्थनाम् । सञ्चिन्तय स्वाभाविकमात्मसच्चरितम् । ननु प्रकृति-कोमलानि कुलबालिकानां हृदयानि, तत् किमिदानीं मदीयदुर्दैववशान्निरनुक्रोशतामेवमाश्रिताऽसि ? । (इति पुनः [2]पादयोर्निपतति ।)

कैकेयी—(अपवार्य मन्थरां प्रति) [2]समओ दाणिं रामभद्दसमागमणस्स, ता गमिस्सं ।

मन्थरा—[3]एवं भोदु । अहं ज्येव कज्जसेसं समत्थिय समागमिस्सं ।

(कैकेयी निष्क्रान्ता ।)

राजा—(उत्थायाऽवलोक्य च सवैलक्ष्य-विषादम्) कथं निर्दाक्षिण्यहृदया मां निराशीकृत्य प्रचलितैव चण्डी ? । (पुनः सनिर्वेदमात्मानं प्रति) हा दशरथ ! हतक !

किं गर्भ एव विलयं न गतोऽसि पाप ! ?,
व्यापन्नवानसि न किं ननु बाल एव ? ।
लग्ना करेऽत्र किमियं भुजगीव भार्या ?,
दत्तं वरद्वयमिदं भवता किमस्यै ? ॥ १२ ॥

(इति दीर्घं निःश्वसन्नधोमुखस्तिष्ठति ।)

सुमन्त्रः—(विलोक्य) कुमार ! प्रस्थिता देवी, तदवसरः साम्प्रतं महाराज-[3]समीपोपसर्पणाय । (इत्युभौ परिक्रामतः ।)

मन्थरा—(दृष्ट्वा राजानं प्रति) [4]देव ! समागच्छदि कुमाररामभद्दो ।

राजा—(श्रुत्वा व्याकुलतां नाटयन्नाकाशे कैकेयीमुद्दिश्य)

---

१ देव ! यदेव युष्माभिः प्रसन्नैः वरद्वयं प्रतिपन्नं तद् एव देवी इत्थं प्रार्थयति ।
२ समय इदानीं रामभद्रसमागमनस्य, तद् गमिष्यामि ।
३ एवं भवतु । अहं एव कार्यशेषं समर्थ्य समागमिष्यामि ।
४ देव ! समागच्छति कुमाररामभद्रः ।

---

1 प्रम्पणं कुरु भा० । 2 पादयोः प० भा० । 3 समीपमुप० भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

[1]शतकोटिघटितहृदये ! हतोऽहमधुना त्वया तथा न यथा ।
शक्नोमि सुतस्य मुखं द्रष्टुं स्वं च प्रदर्शयितुम् ॥ १३ ॥

(इति मूर्च्छितः पतति ।)

रामः—(सहसोपसृत्य राजानमाश्वासयन् मन्थरां प्रति) आर्ये मन्थरे ! किमिदम् ? ।

मन्थरा—[१]कुमार रामभद्द ! देवीविण्णत्तेण महारायेण एदं तुम्हाणं समप्पाविदं । (इति पत्रकं वल्कलयुगलं च समर्पयति ।)

रामः—(गृहीत्वा पत्रकमात्मगतं वाचयति ।)

वरौ पुरा केकयराजपुत्र्याः, प्रत्तौ मया प्रार्थयतेऽधुनाऽसौ ।
साम्राज्यमेकेन तयोः स्वसूनोरन्येन रामस्य........

(इति वाचयित्वा) कथमर्द्धलिखित[2]मेव मुक्तम् ? । (पुनर्विमृश्य प्रकाशम्) हुं ! परिज्ञातो वाक्यशेषः ।

सुमन्त्रः—(ससम्भ्रमम्) कुमार ! कीदृशो वाक्यशेषः ? ।

रामः—([3]प्रकाशम्) पुनः किम् ?—

वरौ पुरा केकयराजपुत्र्याः, प्रत्तौ मया प्रार्थयतेऽधुनाऽसौ ।
साम्राज्यमेकेन तयोः स्वसूनोरन्येन रामस्य वनप्रवासम् ॥ १४ ॥

सुमन्त्रः—(सविषादम्) हा ! किमेतदापतितम् ? ।

रामः—(सहर्षं [4]पत्रकं शिरसि कृत्वा मन्थरां प्रति) आर्ये !

किं याचते तातमुखेन माता, स्वमर्थमाज्ञाकृति तत्सुतेऽस्मिन् ? ।
मूर्ध्ना मयाऽम्बावचनं गृहीतं, सा मे गुरुभ्योऽपि गरीयसी यत् ॥ १५ ॥

मन्थरा—(सहर्षमात्मगतम्) [२]कयं कायव्वं, जदो रामभद्दभणिदं कया वि नऽण्णहा भोदि । ता गमिस्सामि । (इति गन्तुमिच्छति ।)

सुमन्त्रः—(मन्थरां प्रति सरोषम्) अयि ककुत्स्थकुलकृत्ये ! कियन्ति वर्षाणि रामभद्रेण वनमनुभवनीयम् ? ।

---

१ कुमार रामभद्र ! देवीविज्ञप्तेन महाराजेन एतद् युष्मभ्यं समर्पितम् ।

२ कृतं कर्त्तव्यम्, यतः रामभद्रभणितं कदाऽपि नान्यथा भवति । तद् गमिष्यामि ।

---

1 शतकोटिः वज्रम् । 2 °तमिह मुक्तम् भा० । 3 (प्रकाशं पुनः वाचयति) वरौ भा० । 4 प्रतिकं भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

मन्थरा—[1]चउद्दह ! (इत्यभिधाय निष्क्रान्ता ।)

सुमन्त्रः—(राजानं प्रति) देव ! समाश्वसिहि समाश्वसिहि ।

राजा—(समाश्वस्य रामोत्सङ्गे वल्कलानि विलोक्य सविषादम् ।) कथमुपक्रान्तैव दुष्टदासिकया मम प्राणापहरणप्रकरणप्रस्तावना ? । हा वत्स रामभद्र ! कथं भविष्यामि ? । (इति पुनर्मूर्च्छितः पतति ।)

रामः—देव ! समाश्वस्यतां समाश्वस्यताम् । किमस्थाने शोकहुताशनाय स्वात्मानमाहुतीकरोति महाराजः ? ।

सुमन्त्रः—(राजान[1]मवलोक्य सास्रम्) अहो ! [2]दुर्घटेऽपि वस्तुनि घटनापाटवं दुष्टदैवस्य । तथाहि—

एकच्छत्रामवति जगतीं यश्चतुःसिन्धुसीमा-
मध्यास्ते च त्रिदिवपतिनाऽप्येकमेवाऽऽसनं यः ।
हा ! धिक् कष्टं सुचरितरतिर्निर्मिमीतेऽत्र सोऽयं,
तोये तुच्छे तिमिरिव मुहुर्वर्त्तनोद्वर्त्तनानि ॥ १६ ॥

देव ! समाश्वसिहि समाश्वसिहि ।

राजा—(समाश्वस्य सविषादमञ्जलिं [3]बद्ध्वा आकाशे)

मातः क्षिते ! तपन तात ! विभो नभस्वन् !,
सर्वं हि वित्थ तदिदं वदत प्रसह्य ।
का दुर्दशेयमधुना मम वर्त्तते ? य-
न्मूर्च्छाऽऽशु गच्छति न गच्छति जीवितव्यम् ? ॥ १७ ॥

(पुनः स्मृत्वा) हा प्रिये रामभद्रजननि ! स्वयमुत्पादितव्यापादितमनोरथा विहिताऽसि दशरथहतकेन । (इति सास्रमधोमुखस्तिष्ठति ।)

(ततः प्रविशति कौशल्या साक्षतपात्रा सुमित्रा सीता च ।)

कौशल्या—(सहर्षं सीतायाश्चिबुकमुन्नमय्य) [2]जादे ! अज्ज तुमए पट्टमहादेवीए भोदव्वं ।

---

१ चतुर्दश ।
२ जाते ! अद्य त्वया पट्टमहादेव्या भवितव्यम् ।

---

1 °नमालो भा० । 2 दुर्घटितेऽपि दे० । 3 बध्नन्नाका° भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सीता—(सप्र[1]मोदं सलज्जम्) [१]अज्जयाणं पसायेण ।

(नेपथ्ये क्षुत्शब्दमाकर्ण्य [2]सर्वा विषादं नाटयन्ति ।)

सुमित्रा—(सोद्वेगमात्मगतम्) [२]जहा मंगलासंसणखणे छीअसद्दो तहा तक्केमि-सविग्घा विय समीहिदा सिद्धी। (प्रकाशम्) सव्वं पि दुरिदमंतरीयदु कुलदेवयाण-मणुग्गहेण । (इति सर्वे (? सर्वाः) परिक्रामन्ति ।)

सीता—(पुरो विलोक्य सलज्जं कौशल्यां प्रति) [३]अज्जे ! इत्थ गुरुयणाणं दिट्ठि-गोयरं परिहरन्ती इध ज्येव चिट्ठिस्सं ।

कौशल्या—[४]एवं [3]करीयदु ।

(सीता स्तम्भान्तरिता तिष्ठति ।)

कौशल्या—(परिक्रामन्ती पुरो विलोक्य ससम्भ्रमं सुमित्रां प्रति) [५]सहि सुमित्ते ! अण्णरससण्णिविट्ठ व्व इत्थ अज्जउत्तो लक्खीयदि ता किं[4] ण्णिदं ? ।

सुमित्रा—[६]देवि ! अज्जसुमंतो वि अम्हे पिक्खिय विसण्णवयणो धरणितलं पिक्खिदुं पइट्टो । एस ज्येव गडुय पुच्छीयदु ।

(इत्युभे पर्याकुले परिक्रामतः)

सुमन्त्रः—(दृष्ट्वा सखेदं राजानं प्रति) देव्याविमे समागच्छतः ।

राजा—(विलोक्य शोकव्याकुलतां नाटयन्) सुमन्त्र ! किमिदानीमपरेण ? दर्शय दशरथहतकस्य प्राणपरित्यागमार्गम् ।

---

१ आर्याणां प्रसादेन ।

२ यथा मङ्गलाशंसनक्षणे क्षुत्शब्दः तथा तर्कयामि–सविघ्ना इव समीहिता सिद्धिः । सर्वमपि दुरितमन्तरीयतां कुलदेवतानामनुग्रहेण ।

३ आर्ये ! अत्र गुरुजनानां दृष्टिगोचरं परिहरन्ती इह एव स्थास्यामि ।

४ एवं क्रियताम् ।

५ सखि सुमित्रे ! अन्यरससन्निविष्ट इव अत्र आर्यपुत्रः लक्ष्यते तत् किं न्विदम् ? ।

६ देवि ! आर्यसुमन्त्रः अपि अस्मान् प्रेक्ष्य विषण्णवदनः धरणितलं प्रेक्षितुं प्रवृत्तः । एष एव गत्वा पृच्छयताम् ।

---

1 °प्रमोदल°, भा० । 2 सर्वे दे० । 3 कीरदु भा० । 4 किं णेदं भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सुमन्त्रः—(सखेदम्) देव ! को नाम सम्प्रति प्राणपरित्यागमार्गमार्गणाय प्रगुणो न भवति ? परं सर्वथा शरीरवद्भिः सोढव्यैव दृढप्रहारता कृतान्तहतकस्य । येनाधुना—

पिता गन्ताऽरण्ये, नृपतिरिह रामोऽद्य भविता,
प्रवर्त्त्यैवं वार्त्तामथ विदधता तामपरथा ।
सुधासिन्धोर्मध्ये भुवनमिदमाधाय विधिना,
ततस्तप्ते तैले कलितखलशीलेन निहितम् ॥ १८ ॥

(इत्युभावधोमुखौ तिष्ठतः ।)

कौशल्या—(सुमन्त्रमुपसृत्य) [1]अज्ज सुमन्त ! किं दाणिं पमोदावसरे दुक्खावत्थेयमणुहवीयदि ? ।

सुमन्त्रः—(ऊर्ध्वमवलोक्य) देवि ! यद् दैवोऽनुभावयति तदेवानुभूयते ।

कौशल्या—(साशङ्कम्) [2]अवि कुसलं वत्सभरदस्स सत्तुग्घसहिदस्स ? ।

सुमन्त्रः—देवि ! सर्वस्यापि कुशलम्, न पुनर्दशरथमनोरथस्य ।

राजा—प्रिये ! न केव[1]लं दशरथमनोरथस्य, दशरथस्यापि ।

सुमित्रा—(भयेन वेपमाना) [3]अज्ज सुमंत ! किं पि फुडमजंपंतो अम्हे वहुयरं पज्जाउलीकरेसि ? ।

सुमन्त्रः—(सखेदमात्मगतम्) का गतिरिदानीम् ? । (इति विमृश्य) भवतु, किमन्यत् करोमि ? । (प्रकाशमाकाशे)

वाणि ! वक्तुमिदमाशु मुञ्च मे,

(कौशल्यां प्रति)

त्वं च देवि ! हृदयं [2]दृढं कुरु ।

(एतदेव सुमित्रां प्रति)

सोऽयमप्रतिविधानदुर्धरस्त्वां यदेति वचनाशनिर्मम ॥ १९ ॥

---

१ आर्य सुमन्त्र ! किमिदानीं प्रमोदावसरे दुःखावस्थेयमनुभूयते ? ।
२ अपि कुशलं वत्सभरतस्य शत्रुघ्नसहितस्य ? ।
३ आर्य सुमन्त ! किमपि स्फुटमजल्पन् अस्मान् बहुतरं पर्याकुलीकरोषि ।

1 केवलं मनोरथानाम्, दशरथस्यापि भा० । 2 दृढीकुरु भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

(उभे सम्भ्रान्तचित्ते तिष्ठतः ।)

सुमन्त्रः—देवि ! पूर्वप्रतिपन्नौ वरौ महाराजसकाशाद् देवी कैकेयी याचते ।

उभे—[१]के [1]णाम ते ? ।

सुमन्त्रः—एको भरतस्य राज्याभिषेकः, द्वितीयो रामस्य वनवासः । (इति रोदिति ।)

उभे—हा दिव्व ! किमिदं संजादं ? । (इति मूर्च्छतः ।)

सुमन्त्रः—देव्यौ ! समाश्वसितं समाश्वसितम् । (इत्युभे समाश्वसि[2]तः ।)

सुमित्रा—(सबाष्पमाका[3]शे) केगइ[३] ! केगइ ! कामं भोदु जादभरदो राया । किं पुण रामभद्देणावरद्धं ? जेण एसो वणवासदुक्खमणुहावीयदि ।

कौशल्या—सहि[४] सुमित्ते ! ण किं पि रामभद्देणावरद्धं, मए ज्येवावरद्धं, जीए रामभद्दो जणिदु (-त्ति रोदिति ।)

सीता—(श्रुत्वा सविषादम्) हा[५] दिव्व ! पट्टमहाएवित्तणं दंसिय वणवासित्तणं मह मंदभाइणीए समप्पेसि । भोदु, दुलंघणीया भयवदी भविदव्वदि त्ति ।

रामः—(सहर्षं अञ्जलिं बद्ध्वा राजानं प्रति) तात ! नातः परं मम समुचितमिहावस्थातुम् । तदनुजानन्तु मां वनगमनाय तातपादाः ।

(सर्वे श्रुत्वा मुक्तकण्ठं रुदन्ति ।)

रामः—(सर्वान्[4] समाश्वासयन्) क एष भवतामका[5]रणे करुणारसाम्भोधिमध्ये झम्पापातः ? । ननु समुचितमेव विरचितमिदं भगवत्या नियत्या । तथाहि—

---

१ कौ नाम तौ ? ।

२ हा दैव ! किमिदं सञ्जातम् ?

३ कैकेयि ! कैकेयि ! कामं भवतु जातभरतो राजा । किं पुना रामभद्रेणापराद्धम् ? येन एषः वनवासदुःखमनुभाव्यते ।

४ सखि सुमित्रे ! न किमपि रामभद्रेणापराद्धम्, मया एवापराद्धम्, यया रामभद्रः जनितः ।

५ हा दैव ! पट्टमहादेवित्वं दर्शयित्वा वनवासित्वं मह्यं मन्दभागिन्यै समर्पयसि । भवतु, दुर्लङ्घनीया भगवती भवितव्यतेति ।

---

1 णाम ? त्ति दे० । 2 °सिते भा० । 3 °काशे) केगइ ! पकामं भा० । 4 °र्वानाश्वा° भा० । 5 °रणं करु° भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

वप्तुः सत्यं भवतु वचनं, प्रीतिमाप्नोतु माता,
भ्राताऽसौ मे [1]भजतु भरतो भारमुर्वीतलस्य ।
रामः कामं नवनवमहातीर्थसेवाप्तपुण्यः,
स्थित्वाऽरण्ये मुनिभिरनघैः सङ्गमङ्गीकरोतु ॥ २० ॥

राजा—(रामं करे गृहीत्वा सोपरोधम्) वत्स ! वक्तुकामोऽस्मि[2] किमपि ? ।

कौशल्या—(सेर्ष्यम्) [१]जाणिदं मए जं अज्जउत्तो वत्तुकामो ।

राजा—प्रिये ! किं तत् ? ।

कौशल्या—[२]तुवरिदं ज्येव मह णयरं परिहरीयदु त्ति ।

राजा—(सखेद-वैलक्ष्यम्) देवि ! सत्यम्, कृतोऽस्मि दुर्दैवहतकेन साम्प्रतमेवंविधानां वचसामहमाश्रयः ।

रामः—(कौशल्यां प्रति) अम्ब ! किमिदमसाम्प्रतं सम्प्रति मद्वात्सल्यादभिधीयते ?। (पुनरपि राजानं प्रति) देव ! समादिश्यतां विवक्षितम् ।

राजा—[3]वत्स ! मया तावद् भवते स्वराज्यं मनसा पूर्वमेव प्रदत्तम् । तदनु च तया दुष्टदासीमन्त्र[4]परतन्त्रितया कैकेय्या वरद्वयं याचितम् । तदहमेव वनं गमिष्यामि । भवान् पुनः (इत्यर्द्धोक्ते सुमन्त्रमुख[5]मवलोकयति ।)

सुमन्त्रः—(अभिप्रायमुन्नीय) कुमार ! भवान् पुनः पितृदत्तमात्मराज्यं बलादपि गृह्णन् नापराध्यति ।

सुमित्रा—[३]जाद ! सोहणं मंतेदि अज्जसुमंतो ।

रामः—(विहस्य) आर्य [6]सुमन्त्र ! किमिदमुदीर्यते ? । यतः—

उत्पद्य वंशे तुहिनेतरांशोरधीत्य विद्याश्च गुरोर्वशिष्ठात् ।
किं तत् करिष्ये भविताऽद्य येन, पि[7]ताऽस्तसत्योऽस्तमनोरथाऽम्बा ? ॥ २१ ॥

कौशल्या—(सकरुणमञ्जलिं बद्ध्वा राजानं प्रति) [४]जंदि अज्जउत्तो समादि-

---

१ ज्ञातं मया यद् आर्यपुत्रः वक्तुकामः । २ त्वरितं एव मम नगरं परिहियतामिति । ३ जात! शोभनं मन्त्रयति आर्यसुमन्त्रः । ४ यदि आर्यपुत्रः समादिशति तदहमपि रामभद्रेण समं वनगमनं करोमि । न खलु शक्नोमि पुत्रकमेकाकिनं वने परिहृतं प्रेक्षितुम् ।

---

1 वहतु भा० । 2 °स्मि सम्यक् कि° भा० । 3 वत्स रामचन्द्र ! मया दे० । 4 परतन्त्रया भा० । 5 °मुखमालो° भा० । 6 सुमन्त भा० । 7 °ताऽप्यस° भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सदि ता अहं पि रामभद्देण समं वणगमणं करोमि। ण खु सक्कुणोमि पुत्तयमे[1]गायिणं वणे परिहिदं पेक्खिदुं।

सुमित्रा—[1]देवि ! कधं जादरामभद्दो एगाई ? जस्स लक्खणसरिसो सहयरो भोदि ?।

रामः—(कौशल्यां प्रति) अम्ब ! किमनात्मसदृशमिदमुदीर्यते ?। यतः—

जनकेन जनन्या वा सूनुना बन्धुना[2]ऽपि किम् ?।
भर्त्तैव दैवतं स्त्रीणां स्मृतं हि स्मृतिकर्तृभिः॥ २२॥

राजा—(सबाष्पमाकाशे) हतकैकेयि ! सुमित्रावचनमेवंविधमाकर्ण्य किं न लज्जया विदीर्णहृदया भविष्यति भवती ?।

सुमन्त्रः—न तावदयं पितृभ्यामप्रहितो वनगमनाध्यवसायाद् विरमति। तदस्य प्रतिबोधाय कुमारलक्ष्मणमनवगमितमन्थरावृत्तान्तमिहाऽऽकारयामि। स ह्यस्य प्रियतरो भ्राता सचिवश्च। (प्रकाशम्) कस्कोऽत्र भोः ! ?।

(प्रविश्य)

कञ्चुकी—एषोऽस्मि।

सुमन्त्रः—शिखाबल ! इतस्तावत्। (कर्णे एवमेव।)

(कञ्चुकी निष्क्रान्तः)

कौशल्या—(सास्रं सुमित्रां प्रति) पि[2]यसहि सुमित्ते ! एक्को दाव मह पुत्तो रामभद्दो दिव्वेण णिव्वासिदो। अवरं पुण मह पुत्तयं लक्खणं तुमं णिव्वासिदुं पयट्टा सि।

(ततः प्रविशति गृहीतधन्वा सम्भ्रान्तो लक्ष्मणः कञ्चुकी च।)

लक्ष्मणः—(सावेशम्)

का माता ? श्रवसोर्वचांसि कुरुते दासीजनोक्तानि या,
कस्तातः ? प्रमदाप्रतारितमतिर्जानाति कृत्यं न यः।

---

१ देवि ! कथं जातरामभद्रः एकाकी ? यस्य लक्ष्मणसदृशः सहचरो भवति।

२ प्रियसखि सुमित्रे ! एकः तावद् मम पुत्रः रामभद्रः दैवेन निर्वासितः। अपरं पुनः मम पुत्रकं लक्ष्मणं त्वं निर्वासयितुं प्रवृत्ताऽसि।

---

1 °गागिणं भा०। 2 °ना च कि° भा०।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कश्चायं भरतः ? श्रि[1]या ह्यविधिना यो रज्यते, दुर्णय-
व्याषेधार्थमधिज्यधन्विनि मयि श्रीरामभृत्ये स्थिते ॥ २३ ॥

रामः—(दृष्ट्वा) वत्स लक्ष्मण ! स्वभावगम्भीरो भवान्, तत् किमर्थमस्थाने सम्भ्राम्यसि ? । ननु [2]साधु विहितमिदं विधिना–" वप्तुः सत्यं भवतु वचनं०" [श्लो० २०] (इत्यादि पठित्वा) तदिदानीमिहावस्थितेन भवता——

मातॄणां तातपादानां कार्या दुःखप्रतिक्रिया ।
भूपे च भरते भक्तिर्विधेया विधिवत् त्वया ॥ २४ ॥

लक्ष्मणः—आर्य ! न सम्यगभिहितम् । यतः–

विना दिनाधिनाथेन दृश्यते यदि वासरः ।
रहितो रामभद्रेण वीक्ष्यतां लक्ष्मणोऽपि तत् ॥ २५ ॥

सुमित्रा—(सहर्षम्) [१]साहु सुअ लक्खण ! साहु !, तए जेट्ठभाउयाणुगामिणा तणयरयणेण विहूसिया संपदि सुमित्ता ।

सुमन्त्रः—न केवलं सुमित्रा, भूतधात्री च ।

रामः—वत्स लक्ष्मण ! तदुत्सह्यतां प्रस्तुतसंविधानाय । (इत्युत्थाय वल्कले परिदधाति ।)

(सर्वे दृष्ट्वा मुक्तकण्ठं रुदन्ति ।)

राजा—(सखेदमात्मानं प्रति)

हृदय ! हृदय ! दीने मय्यनुक्रुश्य सूनु-
व्यसनघन[3]निपातैश्चूर्णतामेहि तूर्णम् ।

(विलोक्य) कथं वज्रघटितमिवेदमद्यापि न विदीर्यते ? । (पुनराकाशे बद्धाञ्जलिः)

भवतु यम ! नमस्या तुभ्यमभ्यर्थये त्वां,
अपहर हतकं मे जीवितं जीवितेश ! ॥ २६ ॥

(इति मूर्च्छां नाटयति ।)

---

१ साधु सुत लक्ष्मण ! साधु ! त्वया ज्येष्ठभ्रात्रनुगामिना तनयरत्नेन विभूषिता सम्प्रति सुमित्रा ।

---

1 श्रियामवधिना राज्येन यो रज्यते, व्याषेधार्थमधिज्यधन्विनि दे० । 2 साधु संविहितमिदं विधिना चैतत्—" वप्तुः भा० । 3 °नविघातै° भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सुमन्त्रः—देव ! समाश्वसिहि समाश्वसिहि ।

राजा—(समाश्वस्य) [1]सुमन्त्र ! किमाश्वासयसि ? । मया हि पापीयसा समाश्वस्य साम्प्रतमेतदेव विधातव्यम् । तथाहि—

द्रष्टव्यं मुखमेतयोर्दयितयोः शोकाश्रुमिश्रेक्षणं,
श्रोतव्याः पुरवासिनामसुखिनां धिक्कारगर्भा गिरः ।
दुर्दासी च दुरङ्गना च वचसा वाच्या कदाचिन्मया,
तन्मे सम्प्रति जीवितेन किमहो ! ? मृत्युर्महीयान् मम ॥ २७ ॥

रामः—(शिरस्यञ्जलिं बद्ध्वा सविनयम्) तात ! एष गच्छामि (इति पदान्तरे स्थित्वा पुनर्विनिवृत्त्य च राजानं प्रति सोपरोधम्)

याचे किञ्चित् तात !,

(पुनः कौशल्यां प्रति)

मातस्तथा त्वां, स्मारं स्मारं मत्प्रवासं युवाभ्याम् ।
नैवाम्बायां सर्वथा मध्यमायां, तत्पुत्रे वा वैमनस्यं विधेयम् ॥ २८ ॥

(इति पादयोर्निपतति ।)

राजा—(सबाष्पगद्गदम्) वत्स विनयैकनिकेतन ! सर्वं करिष्ये यदि जीविष्यामि ।

सीता—(दृष्ट्वा) [1]कधं पत्थिदो ज्जेव्व अज्जउत्तो ? । अहं पि एदिणा समं ज्येव्व गमिस्सं । (इति हस्तसंज्ञया कञ्चुकिनमाकारयति ।)

कञ्चुकी—(गत्वा सीतावचनमादाय राज्ञे निवेदयति) देव ! सेयं वधूर्जनकराजात्मजा पत्या सह वनगमनोद्यता देवपादान् प्रणमति । (इत्यङ्गुल्या दर्शयति ।)

(सीता [2]दूरस्थिता सर्वान् प्रणमति ।)

राजा—(विलोक्य) हा [3]दुर्विधे ! नाद्यापि दशरथकदर्थनाकौतुकेषु कृतार्थता भवतः । हा स्नुषे ! हा सीरध्वजनन्दिनि ! स्त्रीत्वेऽपि पतिपराधीना वरं भवती, न पुनः पुरुषत्वेऽपि [4]पत्नीपराधीनोऽहम् । (पुनः सुमित्रां प्रति) प्रिये ! निवार्यतामियं वधूरनर्थबहुलस्य वनगमनस्याध्यवसायात् ।

---

१ कथं प्रस्थित एव आर्यपुत्रः ? । अहमपि एतेन समं एव गमिष्यामि ।

---

1 सुमन्त ! किं मां समाश्वा° भा० । 2 दूरस्था स° भा० । 3 दुर्विधे ! किमद्यापि न दश° भा० । 4 प्रियापरा° भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सुमित्रा—[1]जं आणवेदि अज्जउत्तो (त्ति सीतासमीपं गत्वा पुनरागत्य च) अज्जउत्त! बहुयरं पडिबोहिदा वि सुण्हा ण विरमेदि वणगमणादो। एवं च विण्णवेदि—

तं मह घरं पि रण्णं तणयरयणो ण जत्थ ससुरस्स।
रण्णं पि घरसरिच्छं गच्छंतीए समं पइणा ॥ २९ ॥

(रामः सर्वान् प्रणम्य सीता-लक्ष्मणाभ्यां सह प्रस्थितः।)

देव्यौ—(विलोक्य बलाद् बाष्पं निगृह्णन्त्यौ तान् प्रति) [2]रक्खंतु तुम्हे वणदेवदाओ। णिव्विग्घं च तुम्हाणं वणगमणं भोदु।

सुमन्त्रः—(देव्यौ निर्वर्ण्य सकरुणातिरेकम्) अहह!—

वनाय पुत्रद्वितयेऽपि गच्छत्यमङ्गलत्वाद् विनिवारितोऽपि।
तदम्बयोरम्बकवारिपूरः, श्रवत्ययं प्रश्रयकैतवेन ॥ ३० ॥

रामः—वत्स लक्ष्मण!

तदेतद् दुःखमेकं मे यदद्य भरतो मया।
नाऽऽश्लिष्टो नानुशिष्टश्च प्रजापालनकर्मणि ॥ ३१ ॥

लक्ष्मणः—आर्य! मन्थरैवानुशासिष्यति।

रामः—ननु किमेवमसूयागर्भमभिधत्से?। तथाहि—

वत्सस्य वेत्सि भरतस्य शुभं स्वभावं,
दोषं मृषा तदिह किं मनुषे मनीषिन्!?।
कल्पान्तरेऽपि हि न लक्ष्मण! लक्ष्मपङ्क-
पिण्डेन चण्डरुचिमण्डलमाविलं स्यात् ॥ ३२ ॥

लक्ष्मणः—(सवितर्कमात्मगतम्)

कुर्यादिदं न भरतोऽपि जनन्यसौ वा,
नैतद् विशुद्धिमति सम्भवति द्वयेऽस्मिन्।
तत् केन नाम कृतमीदृशमाः! किमन्यै-
र्धातैव निश्चितमचिन्त्यगतिश्चकार ॥ ३३ ॥

---

१ यद् आज्ञापयति आर्यपुत्रः। आर्यपुत्र! बहुतरं प्रतिबोधिताऽपि स्नुषा न विरमति वनगमनात्। एवं च विज्ञपयति—

तद् मम गृहमपि अरण्यं तनयरत्नं न यत्र श्वशुरस्य।
अरण्यमपि गृहसदृशं गच्छन्त्याः समं पत्या ॥

२ रक्षन्तु युष्मान् वनदेवताः। निर्विघ्नं च युष्माकं वनगमनं भवतु।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

रामः—(नेपथ्यार्द्धे स्थित्वा रचिताञ्जलिः)

भास्वद्गोत्रचरित्रचित्ररुचिर प्रासाद ! तुभ्यं नम-
स्त्वां वन्दे सुकृतानुरक्तजनतामेध्यामयोध्यापुरि ! ।
आपृच्छे पुरवासिनः ! सविनयं युष्मानिहाऽऽयुष्मति,
क्ष्माभारं भरते समुद्धरति [1]वः स्वस्त्यस्तु, गच्छाम्यहम् ॥ ३४ ॥

(इति सर्वानापृच्छ्य सीता-लक्ष्मणाभ्यां सह निष्क्रान्तः ।)

कञ्चुकी—(सनिर्वेदम्) किं नाम [2]चिरं जीवित्वा मया मन्दभाग्येन साधितम् ? । यदिमामश्रुतपूर्वां ककुत्स्थकुलस्य दुरवस्थामवलोकयामि । भवतु । रामभद्रमनुव्रज्य समागमिष्यामि । (इति निष्क्रान्तः ।)

देव्यौ—[१]हा वत्स रामभद्द ! हा वत्स लक्खण ! हा महासयि सीदे ! तुम्हेहिं [3]परिच्चत्ताणमम्हाणमंधयारीभूदो [4]मच्चलोओ (त्ति मुखं पिधाय रुदितः ।)

राजा—(सनिर्वेदमात्मानं दर्शयन्) सुमन्त्र ! पश्य दशाविपर्ययमस्य पापीयसो जनस्य—

या दध्रे हृदि वल्लभेत्यजनि सा भल्ली, सुतश्चन्दन-
स्यन्दोऽभून्मम यः स एव दहति स्वान्तं वनान्तं व्रजन् !
मृत्युर्यः स्वयमेति सोऽद्य भजते नाऽऽमन्त्र्यमाणोऽपि मां,
तन्नावैमि कुकर्मणः परिणतं कस्येदमीदृक् फलम् ? ॥ ३५ ॥

(नेपथ्ये महानाक्रन्दः ।)

सुमन्त्रः—(श्रुत्वा सखेदमात्मगतम्) हा ! धिक्, कुमाररामभद्रप्रवासाव-लोकनदुःखितानां पौरलोकानां महीयानयं [5]परिदेवितध्वनिः । महाराजशोकहुताशनस्य पूर्णाहुतिर्भवति ।

(प्रविश्य)

कञ्चुकी—(राजानं प्रति सशिरःप्रकम्पम्) देव ! श्रूयतां द्वितीयस्य निजतनूजस्य माहात्म्यातिशयः ।

---

१ हा वत्स रामभद्र ! हा वत्स लक्ष्मण ! हा महासति सीते ! युष्माभिः परित्यक्तानामस्माकमन्धकारीभूतो मर्त्यलोकः ।

---

1 च भा० । 2 चिरजीवित्वान्मया दे० । 3 परियत्ता° भा० । 4 मत्तलो° भा० । 5 परिदेवनध्व° भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

(राजा तूष्णींस्थित एव कञ्चुकिनो मुखमवलोकयति ।)

सुमन्त्रः—शिखावल ! विज्ञप्यताम् ।

कञ्चुकी—इतः स्थानात् [1]प्रव्रजतः कुमाररामभद्रस्यानुवर्त्तिनीं विदेहचक्रवर्त्ति-दुहितरमवलोक्य त्वरिततरमूर्मिलाऽपि कुमारलक्ष्मणमनुगन्तुं प्रवृत्ता ।

राजा—(श्रुत्वा) हा सम्बन्धिन् सीरध्वज ! त्वमपि मदीयदुःखोत्सवे निमन्त्रितोऽसि विधात्रा । ततस्ततः ? ।

कञ्चुकी—(शिरस्यञ्जलिं बद्ध्वा) देव !

श्रीरामभद्रादपि सात्त्विकाय, नमः सुमित्रातनयाय तस्मै ।
अनुव्रजन्ती दयिताऽपि येन, भ्रूसंज्ञयैवाऽऽत्मवधूर्निषिद्धा ॥ ३६ ॥

कौशल्या—(किञ्चिदिवाऽऽश्वस्य) [१]एदं पि सोहणं जं वत्सलक्खणेणं अत्तणो वहू वणमणुसरंती णिवारिदा ।

राजा—(सखेदोत्कण्ठं कौशल्यां प्रति) देवि ! तमेवमुच्चैस्तरं वातायनमधिरुह्य प्रवसतोर्वत्सयोरवलोकनेन क्षणमेकमात्मानमुज्जीवयामि इति ।

(सर्वे तथाकुर्वन्ति ।)

कञ्चुकी—(अङ्गुल्या निर्दिशन्) परिभाव्यतामितः सीतालक्ष्मणानुगते नगरा-न्निष्क्रामति रामभद्रे—

हाकारगर्भवदनाः सदनान्यपास्य,
पौराङ्गनाः कनककुण्डलशून्यकर्णाः ।
रामस्य साश्रुकरुणाश्चरणौ प्रणम्य,
सीताप्रवासविरतिं मुहुरर्थयन्ते ॥ ३७ ॥

(पुनरन्यतो दर्शयन्) इदमप्यवधार्यताम्—

आधाय स्कन्धबन्धे स्रुव-चमस-जुहूमुख्यहोत्राङ्गपात्र-
प्राग्भारं भूरिभारोद्धृतिपटुबटुकोपात्तवैतानभाण्डाः ।
प्रायश्चित्ताभिशङ्काप्रसभनियमितप्रोच्छलद्बाष्पधाराः,
कान्ताराय व्रजन्तं तव तनुजमितोऽनुव्रजन्ति द्विजेन्द्राः ॥ ३८ ॥

---

१ एतदपि शोभनं यद् वत्सलक्ष्मणेन आत्मनो वधूः वनमनुसरन्ती निवारिता ।

---

1 प्रव्रज्यमानस्य कुमार° दे० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

राजा—(सनिर्वेदम्) शिखावल ! [1]निर्वर्णय त्वमेताननुव्रजतः पुरजनानस्मत्प्राणेभ्यो येऽद्यापि [2]पुरोऽस्मिन्नवस्थातुं समीहन्ते । (इति मोहमुपगतः ।)

देव्यौ—(दृष्ट्वा) हा[1] हद म्ह । (इति राजानं पतन्तमवष्टम्भयतः ।)

सुमन्त्रः—(कौशल्यां प्रति) देवि ! बाढमस्वस्थशरीरो राजा । तदितः स्वमावासं नीत्वा शयनीये समारोप्यताम् । (पुनः पार्थिवं प्रति) देव ! केयं विक्लवता ? । ननु धुर्योऽसि धैर्यवताम् ।

राजा—(किञ्चिदिवाऽऽश्वस्य) हा ! राम ! राम ! ([3]इति विलपन् देवीभ्यामवष्टभ्यमानो निष्क्रान्तः ।)

सुमन्त्रः—(समन्तादप्ययोध्यां निध्याय तां प्रति)

मातर्मन्ये नगरि ! गरिमा रामभद्रेण सार्द्धं,
यातस्तेऽपि त्वयि यदधुना वीतगीतोत्सवायाम् ।
आकर्ण्यन्ते ककुभि ककुभि क्रन्दितान्यङ्गनानां,
आलोक्यन्ते पथि पथि तथा लोकशोकाश्रुपङ्काः ॥ ३९ ॥

(पुनः कञ्चुकिनं प्रति) शिखावल ! तदिदानीं भवताऽपि गत्वाऽभिधीयतामार्यवामदेवो यथा कुमारभरतसमाकारणाय दूतं प्रेषयति ।

(प्रासादमालोक्य च सकरुणम्) शिखावल ! सम्प्रति शोकव्याकुलेऽत्र राजकुले—

कीराद्यैः पञ्जरक्षिप्तैः किमेभिः केलिपक्षिभिः ? ।
तस्मादमी विमुच्यन्तां सम्बध्यन्तां च बन्धुभिः ॥ ४० ॥

अहमपि कुमाररामभ[4]द्रमापृच्छ्य समागच्छामि ।

(इति निष्क्रान्ताः सर्वे ।)

॥ तृतीयोऽङ्कः समाप्तः ॥

भवद्दानाख्याने द्रवमयति जाने श्रवणयो-
र्विवर्णः कर्णोऽभूदजनि गलितश्रीर्बलिरपि ।
अनल्पव्युत्पत्तेस्तव सचिवकल्पद्रुम ! पुरो,
विधत्ते वैदग्धीं न च सुरगुरुर्नाऽसुरगुरुः ॥ १ ॥

---

१ हा ! हते स्वः ।

---

1 निर्वेदय भा० । 2 पुरेऽस्मिन्नवस्थातुमी° भा० । 3 इति जल्पन् दे° दे० । 4 °भद्रं समापृ° दे० ।

P. P. Ac. Gunratnasuri M.S.　　Jin Gun Aaradhak Trust

चतुर्थोऽङ्कः ।

(ततः प्रविशति विमानस्थितो गन्धर्वराजः ।)

गन्धर्वराजः—(सौत्सुक्यम्) अद्य मया कनकचूडाभिधानो निजनन्दनश्चिरकालादवलोकनीयः । स हि पूर्वं सङ्गीतकावसरविच्युतो भगवतस्त्रिविष्टपाधीश्वरस्य शापेन महाराजदशरथावसथे क्रीडाशुकतामनुभवन्नासीत् । स च शापो रामभद्रस्य वनप्रवासदिवसावधि मदुपरोधाद् देवेन सुधाशनाधिपतिनाऽप्यनुमेने । तत् [1]कथमिदानीमपक्रान्तेऽपि तस्य प्रवासवासरे निजात्मजं न पश्यामि ? । (इति परिक्रामितकेन दिशोऽ[2]वलोकयन्) अये ! सेयमयोध्या नाम नगरी सहस्रधामसन्तानमानवेश्वराणाम् । (समन्तान्निर्वर्ण्य तां प्रति सखेदम्)

सौन्दर्यं परमं, समृद्धिरधिका, सौराज्यसम्पादितः
पौराणां प्रमदः स कश्चिदमरस्थानेऽपि जाने न यः ।
एवं राघवराजधानि ! शतधा यस्यां त्वयि प्रेक्षितं,
दैवात् सम्प्रति सैव देवि ! भवती दीनां दशामाश्रिता ॥ १ ॥

तदिहावलोकयामि । (इति तथाकरोति ।)

(ततः प्रविशति कनकचूडः ।)

कनकचूडः—अहो ! सुदुस्त्यजा सङ्गतिः सत्पुरुषाणाम् । तथाहि—

यद्यप्यद्य व्युपरतमहाशापपापस्तथापि,
स्मारं स्मारं दशरथकृतं लीलया लालनं तत् ।
सोत्कण्ठोऽपि स्वपुरगतये स्नेहपाशेन बद्धः,
सौधं नैतन्नृपतितरणेस्तस्य [3]शक्नोमि मोक्तुम् ॥ २ ॥

(इति मन्दं मन्दं परिक्रामन्नग्रतो विलोक्य) अये ! कथमेते तातकुमुदाङ्गदपादाः प्रतिदिशं [4]मम विलोकनलोलुपत्वेन दृशं दिशन्तः पुरत एव वर्त्तन्ते ? । तदुपसृत्य प्रणमामि । (इति तथाकृत्वा बाष्पं मुञ्चति ।)

कुमुदाङ्गदः—(दृष्ट्वा सरभसं पुत्रमालिङ्ग्य बाष्पमुत्सृजन्नात्मगतम्) नियतमसौ

---

1 कथमपीदानीमतिक्रान्तेऽपि तस्य प्रवासावसरे भा० । 2 दिशो विलो° भा० । 3 शक्तोऽस्मि मो° भा० । 4 ममावलो° भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

चिरकालादनुभूतं शापदुःखमश्रुपातेन प्रकाशयति । अथवा युक्तमिदम् । यतः—

प्रकटयति हृदय[1]दाहं पुरुषः प्रायेण सज्जने मिलिते ।
ग्रावा दग्धः सलिले पतिते पुनरुद्गमत्यग्निम् ॥ ३ ॥

(प्रकाशम्) अयि वत्स कनकचूड ! विरतशापोपतापः सम्प्रति कुशली भवान् ? ।

कनकचूडः—(सोद्वेगम्) तात ! किमेकाकिनो मे कुशलेन ? मेदिन्यामकुशलिन्याम् ।

कुमुदाङ्गदः—वत्स ! सत्यमेवैतत् । रामभद्रे व्यसनार्णवनिमग्ने कुतः कुशलं प्रजानाम् ? ।

कनकचूडः—तात ! सम्प्रति पुनर्विशेषतो रामपितरि पार्थिवप्रद्योतने लोकान्तरमुपगते ।

कुमुदाङ्गदः—कथं प्रस्थित एव त्रिदिवपथे स पृथिवीपुरन्दरः ? ।

कनकचूडः—अथ किम् ? ।

कुमुदाङ्गदः—(सखेदम्) हा [2]महाभाग दशरथ ! त्वया विना विनाथा खल्वियं वसुमती निराधारश्च धर्मव्यवहारः, विगतसाहायकः सम्प्रति सुरनायकश्च । (इति शोचति ।)

कनकचूडः—तात !

तानेव स्तुमहे महेशमहितां प्रागेव याताः पुरीं,
यस्मादस्तमिते महात्मनि हहा ! तस्मिन्नजस्याऽऽत्मजे ।
स्नात्वा [3]दुस्तरशोकलोकनयनभ्रष्टैर्जलैर्बिभ्रती,
शुभ्रं कीर्त्तिपटं प्रियेण रहिता भूरद्य दृष्टा न यैः ॥ ४ ॥

कुमुदाङ्गदः—वत्स ! कथमिव दिवस्पतिपत्तनप्रणयी स पार्थिवेन्द्रः संवृत्तः ? ।

कनकचूडः—तात ! अद्यैव राघवमनुव्रज्य समायाते तत्र महामन्त्रिणि [4]सुमन्त्रे तद्वचनाकर्णनोद्गीर्णशोकाश्रुधारे शुद्धान्तपरिवारे प्रवर्त्तमाने च निशीथसमये—

श्रुत्वा [5]सुमन्त्रवचनेन सुतप्रणामं,
शापस्य तस्य च विचिन्त्य विपाकवेलाम् ।

---

1 °दाहं प्रायः पुरुषोऽपि सज्जने भा० । 2 महाराज दश° भा० । 3 दुस्त्यजशो° भा० । 4 सुमन्ते भा० । 5 सुमन्तवदनेन भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

हा राघवेति सकृदुच्चरितं नृपेण,
निःश्वस्य दीर्घतरमुच्छ्वसितं न भूयः ॥ ५ ॥

कुमुदाङ्गदः—वत्स ! युक्तमिदम्—यदेते विशुद्धबुद्धयः कर्माणि निर्मूलयितुमुपक्रमन्ते, यत्सम्बन्धादेवंविधानामपि पुरुषविशेषाणा[1]मीदृशमसमञ्जसमाविर्भवतीति। तदनन्तरं च किमभूत् ?।

कनकचूडः—ततश्च देवीं कौशल्यां पत्यपत्यवियोगहृद्रोगाज्जीवितमुत्सृजन्तीमवगम्य भगवता मैत्रावरुणेन निजकलत्रमरुन्धती मूर्त्या वर्त्तमाना तपःसिद्धिरिव तत्प्रतिबोधनाय प्रेषिता। तया च सा महाराजमहिषी बाष्पापनोदपूर्वमेवं बभाषे—अयि वत्से ! केशवांशप्रसविनि ! पतिव्रतापताके ! कृतं शोकावेशेन। यतः—

विधिरयमविधेयस्तत् त्वया सेयमस्य,
प्रहृतिरिह विषह्या कानिचिद् वासराणि।
तदनु तनुजवक्त्रालोकनिःशोकचित्ता,
पुनरनुभवितासि त्वं स्नुषाभक्तिहर्षम् ॥ ६ ॥

(इत्यभिधाय गुरुप[2]त्न्यामुपक्रान्तायामाशातन्तुविलग्नहृदया कोशलेश्वरदुहिता जीवन्मृतप्राया कालयापनां कुर्वाणा वर्त्तते।)

कुमुदाङ्गदः—वत्स ! कृत्स्नकृच्छ्रेषु प्रभ्रश्यतां मर्त्यहृदयानामाशाभिधानमस्त्येव प्रधानमवलम्बनम्। ततस्ततः ?।

कनकचूडः—अथ दशरथविपत्तिदुःखितैः परिजनैः पञ्जराद् विमुक्तेन मयाऽपि शापसम्पादितं तत् कीरशरीरं सरयूसलिले समुत्सृज्य प्राप्तस्वकीयवपुषा निजनिवासग[3]मनोत्सुकेन स्त्रीरूपधारिण्यौ देवराज-धर्मराजनगर्यावयोध्यामध्यतो निष्क्रामन्त्यौ विलोकिते।

कुमुदाङ्गदः—ततस्ततः ?।

कनकचूडः—तात ! यावदहं तयोः परस्परं विश्रम्भभाषितानि शुश्रूषुरनुसरन्नस्मि तावदमरावत्या परेतरा राजधानी इत्यभिदधे—सखि संयमिनि ! सम्प्रति मया पतिवियोगविधुरामयोध्यां प्रतिबोधयितुं सर्वा अपि देव-नरदेवनगर्यः सम्भूय समायाता ददृशिरे। परमत्र नावलोकिता लङ्का। ततः साऽपि तया इति प्रत्यूचे—देवि ! मया समागच्छन्त्या समाकारिता साऽपि नक्तञ्चरेश्वरनगरी। परं साम्प्रतमसौ त्रिभुवनविद्राविणो

---

1 °मीदृशासमञ्जसप्राप्तिर्भवतीति दे०। 2 °त्न्यां परिक्रा° भा०। 3 °मनोन्मुखेन दे०।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

रावणस्य पत्युर्गर्वेण सर्वमपि तृणाय मन्यमाना मामेवमवादीत्—सखि ! किमनरण्यवधविरोधितयाऽस्माकमयोध्यया ?, नागमिष्यामीति ।

कुमुदाङ्गदः—वत्स ! तेन रणाङ्गणावगणितपौलोमीपतिना पौलस्त्येन परिगृहीतानामहङ्कार इति नैतदसाम्प्रतम् । तथाहि—

मूर्द्धानः शिवपूजनाय जनितच्छेदोत्सवाः, बाहवः
कैलाशोद्धृतिदुर्द्धराः सुरकरिक्षोद[1]क्षमोरुक्षमाः ।
प्रत्यङ्गं पृथगेव विक्रमकथा यस्यैवमव्याहताः,
क्रव्यादाधिपतिः स तिष्ठति बलोत्कर्षान्न केषां हृदि ? ॥ ७ ॥

अपि च—

मातुर्मन्मथजित्प्रसादनकथां नामाग्रहेणाग्रतः,
पृच्छन्त्याः स्वपराक्रमप्रकटनव्रीडा[2]दवाचि स्थिते ।
मूर्ध्नि च्छिन्नपुनर्नवेऽस्य न च के तत्पङ्क्तिभेदोद्भवाद्,
दुःखान्निःश्वसदुच्छ्वसच्च सपदि व्याचष्ट शिष्टं शिरः ? ॥ ८ ॥

कनकचूडः—तात ! यद्यप्येवं तथापि लोके पर्यायेण वर्त्तमानासु सम्पत्ति-विपत्तिषु स्वमाहात्म्यनिराकरणमैश्वर्याहङ्कारः परिहार्य एव । तथाहि—

उपचया-ऽपचयौ भवतः शुभा-ऽशुभवशेन सतामसतामपि ।
मदमदभ्रमिहोद्वहतां पुनर्नियत एव विभूतिविपर्ययः ॥ ९ ॥

अपि च—

आरूढाः करिणां स्कन्धे समस्कन्धाः सुशासनैः ।
कति हन्त ! महान्तोऽपि गर्वेणाधो न पातिताः ? ॥ १० ॥

कुमुदाङ्गदः—वत्स ! विरलः कोऽपि महत्याधिपत्ये सति तद्विनाशवशाद् दैन्यमनुभूय स्वभावादेव विनयभाजनं भवति । पश्य—

गर्वान्धाः सति वीक्षन्ते न किञ्चिद् [3]दिव्यतेजसि ।
उलूका इव पश्यन्ति तस्मिन्नुपरते पुनः ॥ ११ ॥

वत्स ! तदनन्तरं निवेदय ।

---

1 °क्षमा रक्षसः दे० । 2 °डावनम्रस्थिते भा० । 3 दिनतेजसि भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कनकचूडः—तयोरथ देवनगर्योर्निज[1]निजावासं प्रति प्रस्थितयोरहमयोध्यासविधे शत्रुघ्नसहितमविदितवृत्तान्तं कुमारभ[2]रतमागच्छन्तमालोकितवान् ।

कुमुदाङ्गदः—(ससम्भ्रमम्) कथमविदितवृत्तान्तो भरतः समागतः ? । (पुनः सकरुणम्) हा महासत्त्व भरत ! किमिहागतः श्रोष्यसि वक्ष्यसि वा ? । ततस्ततः ? ।

कनकचूडः—ततः कुमारभरतेन चिन्ताचान्तचेतसा शत्रुघ्नस्तदैतदभिदधे—वत्स शत्रुघ्न ! साम्प्रतमहं दुःस्वप्नदर्शनाद् आर्यमरण-रामराज्याभिषेकश्रवणाच्च विष-पीयूषयोरास्वादनमेककालमनुभवन्नस्मि । तथाहि—

तापयत्यसुखवह्निना मुहुः, शर्मवारिणि मुहुश्च मुञ्चति ।
अद्भुतार्थघटनापटुः स्फुटं, लोहटङ्कमिव मामयं विधिः ॥ १२ ॥

ततश्च 'कीदृशो दुःस्वप्नः ?' इति सम्भ्रमवति शत्रुघ्ने पर्यनुयुक्तो भरतः पुनरेवमभ्यधत्त—वत्स ! यद्यपि दुःस्वप्नोऽयमनाख्येयः तथापि तत्प्रतीकारजिज्ञासया कथयामि । अद्य किल स्वप्ने—

पिता दृष्टः श्लिष्टः पिकनिकरकान्त्या वनितया,
मुखं मातुर्मध्या कलुषरुचि केनापि च कृतम् ।
नदे मग्नोन्मग्नो रघुपतिरभूद् गोमयमये,
तनुस्तैलेनाक्ता जनकतनुजायाश्च, किमिदम् ? ॥ १३ ॥

कुमुदाङ्गदः—ततस्ततः ? ।

कनकचूडः—तात ! तद्वचनमाकर्ण्य शत्रुघ्नोऽपि साशङ्कः 'सकलकुटुम्बानिष्टसूचकोऽयं दुःस्वप्नः' इति स्वगतं विचिन्त्य च प्रकाशं पुनरुवाच—आर्य ! श्रीकण्ठवैकुण्ठप्रभृतिदेवताभिधानसङ्कीर्त्तनेन पवित्रेतिहासश्रवणेन च दुःस्वप्नोऽयं शुभोदर्कः सम्पद्यताम् । तदनन्तरं च तावुभावपि निजदर्शनपराङ्मुखम[3]श्रुमुखं च पुरीपरिसरलोक[4]मवलोक्य विशेषादुद्विग्नमानसावभूताम् ।

कुमुदाङ्गदः—ततस्ततः ? ।

कनकचूडः—[5]अथैतयोः कुलकुशलप्रश्नप्रतिवचने कृतमौनमपि जनमादरेण पर्यनुयुञ्जानयोरेकेन केनापि स निखिलोऽपि राजवृत्तान्तः समावेदितः ।

---

1 °जनिवासं भा० । 2 °रतं समाग° भा० । 3 °मधोमुखं भा० । 4 °लोकं विलो° भा० । 5 तदेतयोः कुशल° भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कुमुदाङ्गदः—(सखेदम्) हा ! कथमेतयोरपि हृदये समारोपितेयमङ्गारशकटी। ततः किमध्यवसितं भरतेन ?।

कनकचूडः—ततः—

मातुश्च मन्थरायाश्च पितुश्चाऽऽकर्ण्य तत् तथा ।
त्रपा-प्रकोप-शोकानां भाजनं भरतोऽभवत् ॥ १४ ॥

अपरमपि हृदयोद्वे[1]गकरमिदमावेद्यते—

दूरान्निरस्य भरतेन तदाऽऽत्मधैर्य-
मस्तोकशोकविकलेन तथा व्यलापि ।
गम्भीरगह्वरगुरुप्रतिशब्ददम्भा-
दाभिर्यथा प्ररुदितं हरिदङ्गनाभिः ॥ १५ ॥

कुमुदाङ्गदः—(सखेदम्) हा सरलस्वभाव भरत ! निरपराधो निगृह्यसे कृतान्तहतकेन ।

कनकचूडः—ततः कः खलु[2] तस्य विधेरभिप्रायपरिज्ञानप्राज्ञो भवितुमर्हति ?। यः किल—

अवदतामपि दुर्वचनं क्वचिन्निदधतामपि साधुपथे पदम् ।
जनयति व्यसनं तदसौ विधिर्भवति यन्महतामपि दुस्तरः ॥ १६ ॥

कुमुदाङ्गदः—वत्स ! किमेवंसति विहितं शत्रुघ्नेन ?।

कनकचूडः—तात ! यत् किल लक्ष्मणानुजेन विधीयते। तथापि व्यक्तं विज्ञपयामि—

रामं प्रव्रजितं वने, पितृवने यातं च तातं नृपं,
श्रुत्वा शोकसमाकुलेन मनसा दूरादयोध्यां त्यजन् ।
पाणेर्यस्य कृपाणिकां गलतलात् पाशं बलान्निघ्नता,
शत्रुघ्नेन निवारितः कथमपि भ्राता स्वघाताग्रहात् ॥ १७ ॥

कुमुदाङ्गदः—साधु सौमित्रे ! [3]साधु विहितं भवता, यदयं शोकावेशेन स्वघातपातकमाचरन् निजाग्रजन्मा निवारितः। ततस्ततः ?।

---

1 °गकारिणमिद° भा० । 2 °लु विधेस्तस्याभिप्रा° भा० । 3 सुविहितं भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कनकचूडः—ततस्तावयोध्यायामप्रविश्यैव रामानुगमनार्थं प्रस्थितौ । तदनु च तातपादानहमवलोकितवानस्मि ।

कुमुदाङ्गदः—वत्स ! तदिदानीं पवित्रतीर्थावलोकनेन स्वात्मानं कृतार्थयन्तस्त्वद्दर्शनोत्कण्ठितकुटुम्बजनं निजनगरमेव गच्छाम इति ।

(उभावाकाशे विमानेन परिक्रामतः ।)

कनकचूडः—तात ! प्रणम्यतामियं भगवती साकेतसीमन्तिनीकेलिदीर्घिका सरित् ।

कुमुदाङ्गदः—(तथाकृत्वा पुनः सविनयम्)

नदी मुदे स्तात् सरयूरियं मे, [1]महीभुजां भानुकुलोद्भवानाम् ।
श्रेयःश्रिये यज्जलविप्रुषश्च, भवन्ति मैत्रावरुणाशिषश्च ॥ १८ ॥

कनकचूडः—(पुनरन्यतो विलोक्य) तात ! सेयं महास्रवन्ती तमसा नाम, तदभिवन्द्यताम् ।

कुमुदाङ्गदः—(तां प्रति सप्रश्रयम्)

वन्दे तव प्रवाहं तमसे ! तमसेऽवनीयमशुभवताम् ।
यस्मिन् निमज्ज्य न पुनर्भवप्रवाहे पुमान् पतति ॥ १९ ॥

(पुनरग्रतो गच्छन्नवलोक्य सहर्षम्) वत्स ! सफलीक्रियतामियमात्मनो नयनद्वयी भगवत्या भागीरथ्याः प्रवाहावलोकनेन । (शिरस्यञ्जलिं बद्ध्वा तां प्रति)

मातर्महापातकवातदक्षे !, दक्षात्मजावल्लभवैजयन्ति ! ।
अनेकजन्मोपचितैस्तपोभिर्मयाऽद्य मन्दाकिनि ! वन्दिताऽसि ॥ २० ॥

कनकचूडः—(कृताञ्जलिस्तां प्रणम्य सप्रमोदम्)

यातैव पातककथा नरकव्यथानां,
क्षीणः क्षणोऽवगणिताश्च कृतान्तदूताः ।
विध्वस्तदुस्तरपुनर्जननप्रसङ्गे !,
गङ्गे ! गताऽसि यदि दृष्टिपथं कथञ्चित् ॥ २१ ॥

कुमुदाङ्गदः—(निपुणं निरूप्य) वत्स ! योऽयं जह्नुकन्याकूले नेदीयानिङ्गुदीपादपः तन्मूले नियतमेकरात्रमुषितवतः सीतालक्ष्मणसहितस्य रामभद्रस्य सद्यःप्रवासचिह्नान्यभिव्यज्यन्ते । तथाहि—

1 भूमीभुजां भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

प्रत्यग्रं तृणसंस्तरत्रयमिदं, कृत्वाऽनुवृत्तिं जने
याते यानककुभ्नतां पुनरसावार्द्रः करीषोत्करः ।
शोषं पोषति नाधुनाऽपि पथिकस्त्रैणाऽश्रुधाराकृतः
पङ्कोऽयं, विहगा मृगाश्च त इमे तूष्णीं तथैवाऽऽसते ॥ २२ ॥

(पुनरन्यतो दर्शयन्) वत्स ! तदेव निषादाधिपतेर्गुहस्य शृङ्गवेरं नाम नगरं नयनयोरानन्दमुत्पादयति । (पुनः ससम्भ्रमम्) परमत्र क्षत्रियगणाः कुतोऽपि कारणात् प्रथमं समराय संरभ्य पश्चादुपशान्ततदारम्भा इव विभाव्यन्ते । तथाहि—

कवचनिचयं मुञ्चन्त्येके निजाङ्गनिवेशितं,
शरधिषु शरान् न्यस्यन्त्यन्ये शरासनसंहितान् ।
अयमधिपतिः पुर्याः शौर्यप्रियान् पृतनाजनान्,
उपरतरणोत्साहः प्राह प्रयात गृहानिति ॥ २३ ॥

तत् कथमेतदवगमिष्यामः ? ।

कनकचूडः—(दूरादवलोक्य) तात ! नगरमध्यात् कश्चिदभिमुखः पुरुषः समाग[1]च्छन्नस्ति । तदेतस्मादेव वृत्तान्तमुपलप्स्यामहे । (इति विमानादवतीर्य परिक्रामति ।)

(ततः प्रविशति पुरुषः ।)

पुरुषः—(सनिर्वेदम्) अहह ! [2]मिथ्याभिशापहुताशनेन दन्दह्यमानमानसस्य कुमारभरतस्य [3]सम्प्रति काऽपि महती दुरवस्था वर्त्तते । यदसौ रामगमनमार्गपर्यनुयोगेऽपि नगरजनं मौनिनमाकलय्य सविषादमेवं जगाद—

स्तुतेर[4]नर्होऽद्य कृतोऽस्मि मात्रा, मुहुर्मुहुर्व्याहरतां जनानाम् ।
धिक्कारवाक्यान्यपि निष्ठितानि, तिष्ठन्त्यमी तन्मयि बद्धमौनाः ॥ २४ ॥

(इति परिक्रामन्नग्रतो विलोक्य ससम्भ्रमम्) अये ! कोऽयं पुरुषविशेषो विमानादवतीर्य मामभ्येति । तदेनं प्रणमामि । (इति तथाकरोति ।)

कनकचूडः—(उपसृत्य) भद्र ! कथय । कुतः कारणादयं समरसमारम्भः ? कुतश्च विरामः ? इति ।

पुरुषः—महाभाग ! गुहनामा रामभद्रस्य प्रियमित्रमत्र शृङ्गवेरनगरे नरेश्वरः ।

---

1 °च्छति । त° दे० । 2 °थ्याभितापदन्द° दे० । 3 सम्प्रति महती काऽपि दुःखावस्था वर्त्तते । तदसौ भा० । 4 °नर्होऽस्मि कृतोऽद्य मात्रा भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

स च—

कैकेयीतनयः समं पृतनया रामाय वामाशयः,
सोऽभ्येतीति भृशं बभूव भरतद्रोहे गुहः साग्रहः।
पश्चात् तं च शुचिं विचिन्त्य विनयान्नीचं निरस्तासिना,
हस्तेनापनिनाय सादरमसौ म्लायन्मुखस्तन्मुखात् ॥ २५ ॥

कनकचूडः—ततस्ततः ?।

पुरुषः—तदनन्तरमसौ कृतप्राघूर्णकादिसत्कारः पुनरपि भरतं प्रत्येवमुवाच—

वीर ! व्यधीयत मया हृदयं विरुद्धं, शुद्धाशये यदधुना त्वयि रामभक्त्या।
तन्मृष्य[1]तामिति नमन्नमुनोपगूढः, सैष व्यमुञ्चत निषादपतिर्विषादम् ॥२६॥

कनकचूडः—ततस्ततः ?।

पुरुषः—ततश्च भरतः प्रियसुहृदि गुहे विहितविश्वासस्तामात्मीयहृदयवेदनामुन्मुद्रयन् कैकेयीमुद्दिश्य क्रोधावेशादिदमाचचक्षे—

न स्त्रीत्व-मातृत्वभयं स्वभर्तृविनाशनिघ्नां मम निघ्नतस्ताम्।
माताऽमुना मे निहतेति जातरोषात् पुनः सैष बिभेमि रामात् ॥ २७ ॥

ततस्तेन निषादाधिपतिना पर्यवस्थापितहृदयस्तदुपनीताभिस्तरीभिः सुरतरङ्गिणीमुत्तीर्य भरतो भरद्वाजाश्रमदर्शनपवित्रितश्चित्रकूटकटके कृतकुटीररामपादप्रणमनार्थं प्रतस्थे।

कनकचूडः—भद्र ! तदधुना निष्प्रत्यूहं समीहितसिद्धये साधयतु भवान्।

(पुरुषः प्रणम्य निष्क्रान्तः।)

(कनकचूडोऽपि पुनर्विमानमारुह्य जन[2]कायेममर्थमावेदयन् परिक्रामति।)

कुमुदाङ्गदः—(पुरो विलोक्य सानन्दम्) वत्स ! सेयं कलिन्दशैलसम्भवा शैवलिनी विलोक्यते, तन्नमस्यताम्। (इति तथाकुर्वन् तां प्रति)

कालिन्दि ! यस्त्वयि नभोमणिसम्भवायां,
स्नानं करोत्यनिमिषीभवति ध्रुवं सः।
तीर्थे त्यजन् सुखमसून् जगदेकमातः !,
चत्तातबिम्ब................मिदं यदेति ॥ २८ ॥

---

1 °तामिति वदन्नमुनो° भा०। 2 °काय तमर्थं° भा०।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

(सप्रश्रयमञ्जलिं बद्ध्वा)

केलिं कालिन्दि ! यः कृष्णे प्रवाहे कुरुते तव ।
स वेगेन हतोद्वेगः कृष्णः स्यादिति नाद्भुतम् ॥ २९ ॥

कुमुदाङ्गदः—(दूरतो दर्शयन्) वत्स ! स एष संसारज्वरापहारी पवित्रतैकपात्रं प्रयागप्रदेशः । यत्र किल—

गाहन्ते त्रितयमिदं महानदीनामग्नीनां त्रितयमुपासते च तेऽमी ।
देवानां त्रितयमृषिव्रजा यजन्ते, वेदानां त्रितयमधीयते च नित्यम् ॥३०॥

अपरं च भगवता भरद्वाजेन परिगृहीतस्य भूविभागस्य सौभाग्यपरभागः परिभाव्यताम्—

देशोऽयं दिशति दृशोर्मम प्रमोदं,
होमाग्निप्रसृमरधूमधूसरोऽपि ।
यन्मध्ये मुनिनिवहाः प्रवाहनित्ये,
संसारे विहितविरक्तयो वसन्ति ॥ ३१ ॥

कनकचूडः—(दृष्ट्वा) तात ! सत्यमाश्रमपदमेवैतत् । तथाहि—

वृक्षाः पुष्पफलोज्ज्वलाः, मृगकुलान्यत्रासमत्राऽऽसते,
क्रीडन्ते क्रतुकर्मभिश्च शिशवः, कीर्णा कुशैः काश्यपी ।
यागाभ्यागतजम्भजिद्द्विरदनस्तम्भश्रियं बिभ्रतां,
यूपानां पटलेन सङ्कुलतटा सेयं श्रवन्ती पुरः ॥ ३२ ॥

कुमुदाङ्गदः—(निपुणं निरूप्य) वत्स ! सोऽयमपर इव परमेष्ठी नैष्ठिकनिवहश्रेष्ठः कृष्णाजिनोपरि विरचितासनः सर्वतो धर्मैकबन्धुभिस्तपोधनैरुपास्यमानो भगवान् भरद्वाजः । किञ्च—

निर्जलं जाह्नवीस्नानमश्वमेधः क्रियां विना ।
यस्मिन् नमस्कृतेऽपि स्यान्महर्षिः सैष वन्द्यताम् ॥ ३३ ॥

(इति विमानस्थितावेव तथाकृत्वा परिक्रामतः ।)

कुमुदाङ्गदः—(पुरो विलोक्य सानन्दम्) वत्स ! सोऽयं समीपवर्त्ती चित्रकूटनामा शिलोच्चयचक्रवर्त्ती लोचनयोरवलोकनकुतूहलमुत्पादयति । तथाहि—

गानैः किन्नरयोषितां फलभरभ्राजिष्णुभिः पादपैः,
केषामेष मनांसि नापहरति श्रीचित्रकूटाचलः ? ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

त्रैलोक्याभ्युदयप्रदेन विदितो रामेति नाम्ना हरि-
मन्ये यत्र वसन् न वेत्ति विरहं वैकुण्ठ-साकेतयोः ॥ ३४ ॥

तदस्यैव शिखरशाखाप्ररूढपादपच्छायासु क्षणमेकं विश्रम्य रम्यप्रदेशानवलोकयामः । (इति विमानादवरुह्य तथाकुरुतः ।)

कनकचूडः—(समन्तान्निर्वर्ण्य)

वाचालितः क्वचन केकि-पिकप्रणादैः,
प्रच्छादितः क्वचन वारिधरैर्धरोऽयम् ।
आमोदितः क्वचन चम्पकवृक्षलक्षैः,
प्रक्षालितः क्वचन निर्झरवारिभिश्च ॥ ३५ ॥

(पुनरन्यतो विलोक्य) वत्स ! मुनिकुमारकादितः समागच्छतः सुव्यक्तमेतदुपलप्स्यामहे ।

(ततः प्रविशति मुनिकुमारकः ।)

मुनिकुमारकः—(श्रमावस्थानुरूपं परिक्रामन्) सोऽहमधुना साकेताभिमुखं प्रचलन्तीं दशरथवरूथिनीं चिरमूर्ध्वं पश्यन् अतिशयेन परिश्रान्तोऽस्मि । तदिहैव विटपितले विश्रामसुखमनुभवामि । (इति गच्छन्नग्रतो विलोक्य) अये ! दिव्यशरीरधारिणौ कावपि पुरुषौ पुरतो दृश्येते । तद् भवतु, उपसर्पामि इति ।

(सर्वे यथोचितसमुदाचारं कृत्वोपविशन्ति ।)

कुमुदाङ्गदः—(मुनिकुमारकं प्रति) सौम्य ! परिश्रान्त इवावलोक्यसे, तदपनीत-खेदो निवेदयितुमर्हसि । कोऽयं व्योमविभागव्यापी पांशुपूरः ? इति ।

मुनिकुमारकः—महाभाग ! युष्मदीयदर्शनामृतेनैव निरस्तखेदः कथयामि—सम्प्रति हि रामभद्राज्ञया रघुराजधानीरक्षणार्थं प्रस्थितस्य शत्रुघ्नस्य सैन्यसमुत्थापितो रेणुरयं गगनाङ्गणमवगाहते ।

कनकचूडः—भरतस्येति वक्तव्यम् ।

मुनिकुमारकः—न हि न हि, शत्रुघ्नस्यैव ।

कुमुदाङ्गदः—सौम्य ! भवानविदितवृत्तान्तानस्मानशेषमपि भरतोदन्तमवबोधयतु ।

मुनिकुमारकः—महाभाग ! श्रूयताम् । भरद्वाजाश्रमात् कुमारभरतः सपुरोहितामात्य-भ्रातृमातृकः प्रवाहत्रयपवित्रितजगत्त्रिकायाः सिद्धसिन्धोरस्मिन्नेव रोधसि समावासितवान् ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तदनन्तरं यावदसौ पूज्यपुरुषैः प्रयुज्यमानोऽपि लज्जया रामभद्राय निजमाननं दर्शयितुमशक्नुवन्नग्रतः परिक्रामति, तावद् भगवता मैत्रावरुणेन तदवस्थासूचकं श्लोकद्वयं समर्प्य रामभद्रसमाकारणाय स्वशिष्यः प्रेषितः ।

कुमुदाङ्गदः—ततस्ततः ? ।

मुनिकुमारकः—ततश्च रामभद्रोऽपि कुलपुरोहितशिष्यसमर्पितं श्लोकद्वयं सबहुमानमादाय वाचितवान्—

उच्चैः पश्यति चेत् तदाऽन्वयगुरुर्देवोऽस्ति तत्रार्यमा,
नीचैर्यद्यवलोकते तदवनिः, सीता सवित्री पुरः ।
चक्षुर्न प्रददाति दिक्षु यदिमाः सत्पूरुषैः पूरिता,
ह्रीतो राम ! भवन्तमेव भरतश्चित्तस्थमन्विष्यति ॥ ३६ ॥

अपरं च—

नाश्नाति किञ्चन, न केन सह ब्रवीति,
निद्राति न क्वचन, किञ्चन वीक्षते न ।
कार्यान्तरादुपरतो भरतो मुहुस्त्वा-
मध्येति निःश्वसति मुञ्चति चाश्रुपूरम् ॥ ३७ ॥

तत् त्वया स्वयमागत्य निरपराधोऽयमगाधे दुःखमहोदधौ निमज्जन्नुद्धरणीयः । इति वाचयित्वा वशिष्ठवचनप्रतीतेः स्वकुटुम्बावलोकनोत्कण्ठी सीतासौमित्रिसखो रामः स्वयमेव तत्र जगाम ।

कनकचूडः—तदनन्तरं च किमभूत् ? ।

मुनिकुमारकः—अथ शोकावस्थोचितमुपविष्टेषु शिष्टवर्गेषु—

निवेदिते पार्थिवपुङ्गवान्ते, वान्ते क्षणाम्भःप्रसरैश्च कैश्चित् ।
हा तात ! हा वल्लभ ! हाऽधिपेति, जाताः [1]क्षितश्रोत्रबिला विलापाः ॥३८॥

कुमुदाङ्गदः—(सखेदम्) अहह ! सोऽयमपरो [2]रामभद्रस्य कृशानाविन्धनप्रक्षेपः । ततस्ततः ? ।

मुनिकुमारकः—ततश्च विहितापस्नाननिवापादिक्रियेषु सीतारामसौमित्रिषु संसारासारताप्रका[3]शनैः पुराणेतिहासप्रपञ्चैः प्रतिबोधयत्सु तपोधनप्रधानेषु प्रत्यासन्नोपविष्टं लक्ष्मणं प्रति [4]भरतेन सखेदमित्थमिदधे—

---

1 क्षत° भा० । 2 °रामभद्रस्य कृच्छ्रकृशानोरिन्धन° भा० । 3 °शकैः पुराणेतिहासवचनैः भा० । 4 भरतः स° भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

नेत्रे निमील्य, निमील्य[1] पापिनं मा-
मालोक्य मा त्वमपि लक्ष्मण ! पातकी भूः ।
त्वां प्रेक्ष्य साम्प्रतमहं पुनरार्यपाद-
सेवाप्रवृद्धसुकृतं सुकृती भवामि ॥ ३९ ॥

ततस्तेनापि तं प्रत्येवमूचे—
अनार्यमेतत् त्वयि नाऽऽर्य ! कर्म, सम्भाव्यते पङ्क्तिरथप्रसूतौ ।
(पुनर्वशिष्ठं दर्शयन्)
प्रतीतिरेषैव परा महर्षिर्यदेष ते पुष्यति पक्षपातम् ॥ ४० ॥

कुमुदाङ्गदः—ततस्ततः ? ।

मुनिकुमारः—तदनु च रामभद्रो भरतमालिङ्ग्य सस्नेहोपचारमिव व्याजहार—वत्स विशुद्धाशय ! किमेवमधोमुखस्तिष्ठसि ? इति भरतस्य मुखमुन्नमितवान्। ततश्च—

उद्भूतं भरतस्य बन्धुविरहाद् बाष्पं, निरादीनवे
दीनं जल्पति चात्र तत्करुणया रामस्य च प्रोद्गतम् ।
गाढोद्गारमुपाचकार सहजस्नेहोत्थि[2]तान्तर्व्यथं,
भ्रातृद्वन्द्वदशावलोकनगलन्नेत्रः सुमित्रासुतः ॥ ४१ ॥

कुमुदाङ्गदः—सौम्य ! सदृशमेतत् सहजसौहार्दस्य । ततस्ततः ? ।

मुनिकुमारः—ततश्च भरतरामभद्रयोः परस्परमात्माभिप्रायसमर्थनसंवादेन यदभूत् तदाकर्ण्यताम् ?—

कैर्नाम न प्रमुदितं तदिदं विलोक्य,
वृत्तं तयोर्दशरथात्मजयोस्तदानीम् ? ।
पादौ विधृत्य च विधृत्य करौ च राज्य-
मेकः समर्पयति नाऽऽद्रियते द्वितीयः ॥ ४२ ॥

तदीदृशे सति तयोः सत्त्वैकनिरतयोर्भगवता भास्करान्वयसौवस्तिकेन मिथो व्यवस्था कृता—रामभद्रस्य स्ववचन[3]प्रतिज्ञातश्चतुर्दशवर्षावधिर्वन[4]वासः, भरतस्य च रामचरणशुश्रूषा-भिलाषिणो महर्षिशरभङ्गप्रेषितस्य तत्पादुकाद्वितयस्योपासनम्, शत्रुघ्नस्य साकेतपरिरक्षणमिति।

कनकचूडः—ततस्ततः ? ।

---

1 °य तात! मा मामालो° भा० । 2 °स्थितं तद्विधभ्रातृ° भा० । 3 °परिज्ञा° दे० । 4 °वनप्रवासः दे० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

मुनिकुमारः—तदनन्तरं भरतोऽपि तत्पादुकाद्वितयमादाय तदिदं प्रतिज्ञातवान्, यद्—मया रामभद्रानुगामिनैवायोध्यायां प्रवेष्टव्यमिति ।

कनकचूडः—ततस्ततः ? ।

मुनिकुमारः—ततस्तत्कालमेव जटावल्कलधारी नन्दिग्रामगमनार्थमापृच्छमानो [भरतः] जानकीरमणस्य चरणौ प्रणमन्नश्रु[1]प्रवाहेण प्रक्षालितवान् ।

कुमुदाङ्गदः—(सानन्दम्) तदिदं साधु कृतं सुकृतैकरतेन भरतेन । यतः—

मौलौ बभार भरतः किल यज्जटानां,
जूटं तदात्मचरिते मुकुटं बबन्ध ।
रामं नमन्नमुचदश्रुजलं यदासीत्,
तेनास्य वल्गदपरागपरागशान्तिः ॥ ४३ ॥

ततस्ततः ? ।

मुनिकुमारः—ततश्च लक्ष्मणपरिरम्भणादनन्तरं वैदेहीं प्रणमति भरते यदभूत् तदाकर्ण्यताम्—

मूर्ध्ना बद्धजटेन वल्कलभृता देहेन [2]पादानतिं,
कुर्वाणे भरते तथाप्ररुदितं तारस्वरं सीतया ।
येनोद्विग्नविहङ्गसङ्गततरुर्निःसम्मदश्वापदः,
शैलेन्द्रोऽपि किलैष भूरिभिरभूत् [3]साश्रुः पयःप्रश्रवैः ॥ ४४ ॥

ततश्च रामभद्रेण नन्दिग्रामगमनाय भरतः, साकेतपरिरक्षणार्थं सैन्यसहितः शत्रुघ्नश्चानुमेने । तदेवं शत्रुघ्नस्यैव सैन्यसमुत्थापितो रेणुः ।

(नेपथ्ये कलकलः ।)

(सर्वे ससम्भ्रममाकर्णयन्ति)

कनकचूडः—

एको मधुरगम्भीरो [4]रौद्ररूक्षाक्षरः परः ।
शूरयोः श्रूयते शब्दः सोऽयं सङ्ग्रामकामयोः ॥ ४५ ॥

मुनिकुमारः—महाभाग ! साम्प्रतमत्र मुनिजनोपद्रवाय प्रभूता नक्तञ्चराः सञ्चरन्ति । तत् केनापि सार्द्धं रामभद्रस्य युद्धं सम्भाव्यते ।

---

1 प्रवहेन भा० । 2 पादौ नतिं दे० । 3 सास्रः पयःप्रस्रवैः भा० । 4 रौक्षरौद्राक्षरः परः भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कुमुदाङ्गदः—भवतु, निपुणमाकर्णयामः । पुनस्तत्रैव—

हंहो ! वृद्धतपोधनास्तदधुना यात स्वकानाश्रमान्,
अश्रान्तं कुरुत क्रतून्, वितनुत ज्योतिश्च हृद्गोचरम् ।
यद् वैदेहनृपात्मजामपहरन्नेकेन रामेषुणा,
क्रव्यादेष चिराद् विराध इति वः शत्रुः सपत्राकृतः ॥ ४६ ॥

मुनिकुमारः—(श्रुत्वा सानन्दम्) दिष्ट्या जगदनिष्टकारी तपोधनेषु नित्यं कृतापराधो विराधोऽयमधुना विनाशित एव रामभद्रेण । तदिदानीं सत्वरं गत्वा मुनिवृन्दमानन्दयामि । (इति उत्थातुमिच्छन् तौ प्रति) कौ पुनरमानवाकारौ भवन्तौ ? ।

कुमुदाङ्गदः—आर्य ! कुमुदाङ्गदनामा गन्धर्वाधिपतिरहम् । सोऽयं कनकचूडनामा मदीयः पुत्रः ।

मुनिकुमारः—तद् भवद्भ्यामहमपि भगवतो भरद्वाजस्य प्रियशिष्यः सुयज्ञनामा न विस्मरणीयः । (इत्यभिधाय निष्क्रान्तः ।)

कुमुदाङ्गदः—वत्स कनकचूड ! तदिह प्रत्यासन्नस्य रामरूपधारिणो नारायणस्यावलोकनेन लोकोत्तरं सुकृतमर्ज[1]यामः (इत्युत्थाय परिक्रामतः ।)

(ततः प्रविशतः सम्भ्रान्तचित्तौ धनुःपाणी रामलक्ष्मणौ भयेन वेपमाना सीता कृताञ्जलिर्दिव्यपुरुषश्च ।)

रामः—(सीतामाश्वासयन्)

[2]प्रचकितचकोरनयने ! रौद्राकारान्निशाचरादस्मात् ।
किं दिक्षु दिशसि चक्षुर्मृगीव मृगराजतस्त्रस्ता ? ॥ ४७ ॥

सीता—(साश्वासमात्मगतम्) [1]एयस्स दुट्ठरक्खसस्स करप्फंसदूसिदमत्ताणयं अज्जउत्तसरीरसंजोएण पुणो वि पवित्तीकरिस्सामि । (त्ति रामस्य प्रत्यासन्नतरा भवति ।)

पुरुषः—(सविनयमञ्जलिं बद्ध्वा रामं प्रति)

जय जय नयनाभिराममूर्त्ते !, जय जय शौर्यवतां शिरोवतंस ! ।
जय जय भुवनाभिवन्द्यकीर्त्ते !, जय जय वासररत्नवंशरत्न ! ॥ ४८ ॥

---

१ एतस्य दुष्टराक्षसस्य करस्पर्शदूषितमात्मानं आर्यपुत्रशरीरसंयोगेन पुनरपि पवित्रीकरिष्यामि ।

---

1 °याव: भा० । 2 चकिता चको° भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

रामः—(सन्धानात् सायकमुपसंहृत्य पुरुषं प्रति) कस्त्वं भोः! क्रव्यादशरीरमुत्सृज्य दिव्यशरीरमाश्रितवानसि ? ।

पुरुषः—(सविनयम्) अयि नवाम्बुवाहश्याम राम ! तुम्बरनामा गन्धर्वोऽहं वैश्रवणशापेन राक्षसभावमनुभवन्नधुना भवत्कृतनिग्रहानुग्रहेण पुनरप्यात्मस्वरूपं प्रतिपन्नवानस्मि, तन्मर्षणीयमिदमस्मदीयमपराद्धम् ।

रामः—(सबहुमानम्) भद्र ! निजशापप्रशमनार्थमेव त्वमस्माकमपकृतवानसि, न पुनः पापबुद्ध्या ।

तुम्बरः—(सविनयम्) अहो वीरवरेण्य !

इयतैव विद्धि शुद्धं यन्मां स्पृष्टाऽपि नादहद् देवी ।
पापिनमपापिनं वा व्यनक्ति दिव्ये हि वह्निशिखा ॥ ४९ ॥

सीता—(रामं प्रत्यपवार्य) [1]अज्जउत्त ! संपदि सोम्मदंसणं पि एदं पिक्खंतीए मह हिययं अज्ज वि ण भीदिं परिहरदि ।

कुमुदाङ्गदः—(पुरो विलोक्य सानन्दम्) वत्स ! सोऽयमस्मदीयभ्राता तुम्बरश्चिरकालात् काकुत्स्थानुग्रहेण निरस्तराक्षसावस्थः पुरतो वर्त्तते, तदेनमालिङ्गामि । (इति परिक्रामति ।)

(तुम्बरोऽपि तावुपलक्ष्य सानन्दमभ्येतीति ।)

(सर्वे यथोचितमाचरन्ति ।)

लक्ष्मणः—(दृष्ट्वा तुम्बरं प्रति) भद्र ! कावेतौ ? ।

तुम्बरः—अयमस्मदीयो ज्येष्ठभ्राता ।

कुमुदाङ्गदः—मत्सूनुरयं च कनकचूडः । तदहमिदानीं रामभद्रदर्शनमासाद्य सङ्घटितकुटुम्बोऽस्मि संवृत्तः ।

सीता—(सोत्कण्ठमात्मगतम्) [2]ऐयाणं विय अम्हाणं पि कया सजणसंजोओ हविस्सदि ? ।

तुम्बरः—(कुमुदाङ्गदं प्रति) आर्य ! स एष त्रिभुवनैकललामभूतो रामभद्रः ।

---

१ आर्यपुत्र ! सम्प्रति सौम्यदर्शनमप्येतं प्रेक्षमाणायाः मम हृदयं अद्यापि न भीतिं परिहरति ।

२ एतेषामिव अस्माकमपि कदा स स्वजनसंयोगो भविष्यति ? ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कुमुदाङ्गदः—(रामं प्रति सविनयम्)

सिञ्चसीव सुधया विलोचने, ज्योत्स्नया स्नपयसीव मानसम् ।
वीक्षितो वितरसीव वाञ्छितं, संसृतिं लघयसीव राघव ! ॥ ५० ॥

तुम्बरः—देव दिवाकरकुलैकतिलक ! विश्रम्भा[1]देतदनुयुज्यसे—वनवासव्रतकालशेषोऽयमिहैवाऽतिवाहयितव्यः ? स्थानान्तरे वा ?

रामः—गन्धर्वाधिपते ! चिरकालोपभुक्तादितः स्थानात् सम्प्रति दक्षिणां दिशं प्रति [2]प्रस्थातुकामाः स्मः ।

तुम्बरः—समुचितैव दिगियं युष्मादृशामाश्रयकरणाय । यतः—

रम्या दिशां चतसृणामपि दक्षिणाऽसौ,
यस्यामनन्यसदृशं द्वयमेतदस्ति ।
श्रीखण्डमण्डिततनुर्मलयो महाद्रि-
रुन्निद्रमौक्तिककणाऽपि च ताम्रपर्णी ॥ ५१ ॥

कुमुदाङ्गदः—(सप्रश्रयम्) देव ! स्वयमेव कृतार्थीकृतानस्माननुजानातु भवान् निजनगरगमनाय । प्रवृत्ता सम्प्रति सायन्तनी सन्ध्या । तथाहि—

जनयति कनकाधिकेन धाम्ना, दिनगुरुरस्तगिरेः सुमेरुशोभाम् ।
दिशि दिशि नवमेघमेचकानि, नि[3]चयमयन्तितमां तमीतमांसि ॥ ५२ ॥

कनकचूडः—इतोऽपि विलोक्यताम्—

ब्रह्माऽस्त्रं मन्मथस्य, त्रिभुवनवनितामानमीनावकृष्टयै
कैवर्त्तः, कैरवाणां प्रियसुहृदमृतस्रोतसां शैलराजः ।
पान्थस्त्रीणामपथ्यं, रथचरणचमूचक्रवालस्य कालः,
शृङ्गारस्योपकारः, किरति रतिमसावौषधीनामधीशः ॥ ५३ ॥

रामः—निरुपद्रवाः सर्वेऽपि सम्प्रति स्वर्गलोकसुखमनुभवन्तु भवन्तः । वयमपि सन्ध्याविषये प्रयतामहे । (इति निष्क्रान्ताः सर्वे ।)

☞ [4]इति श्रीकुमारसूनोः श्रीसोमेश्वरदेवस्य कृताबुल्लाघराघवे च्छायानाटके ☜

चतुर्थोऽङ्कः समाप्तः ॥

वस्तुपाल ! भवतो भवकान्तादन्तदीधितिवितानसिताभिः ।
कीर्त्तिभिर्जगति कार्त्तिकराकारामणीयकमजस्रमुदेति ॥ ५४ ॥

1 °म्भादेवमनु° भा° । 2 प्रतिष्ठातु° दे० । 3 प्रचय° भा० । 4 हस्तचिह्नान्तर्गतोऽयं पाठः भा० नास्ति ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पञ्चमोऽङ्कः ।

(ततः प्रविशति मारीचः ।)

मारीचः—(सविमर्शम्) अहो ! तपःप्रपन्नानामपि नान्तरायाः [1]पृष्ठं परित्यजन्ति । ☞ [2]यदयं स्वयमागत्य दशाननः कामो रामच्छलनाय मामभ्यर्थितवान् । ☜ कथितश्च ममाश्रमगतेन तेनैव गूढपुरुषमुखादाकर्णितो रामभद्रवृत्तान्तः——यथा चित्रकूटप्रस्थात् प्रस्थितस्य रामभद्रस्याऽत्रिमहर्षिणा सत्कारः कृतः, यथा च तत्पत्न्याऽनसूयया वैदेही शाश्वताङ्गराग[3]वस्त्रादिदानेन सम्भाविता, यथा च भगवता कुम्भसम्भवेन दिव्यायुधानि सम्पादितानि, यथा च पञ्चवटीप्रविष्टेन रामभद्रेण सूर्पणखा विलूनमुखावयवा कृता, यथा तेन जनस्थाननिवासिनो नक्तञ्चराश्च यमनगरातिथि[4]तामनुभाविता इति । तदिदानीं राक्षसेन्द्रदाक्षिण्यादङ्गीकृततद्वचनेन मया किं कर्त्तव्यम् ? । यतः——

त्रिशिरः-खरदूषणादयस्ते, दलिताः केवलदोःसखेन येन ।
विजितेन पुराऽपि राजपुत्रश्छलनीयः स कथं मया बलीयान् ? ॥ १ ॥

(इति चिन्तां नाटयित्वा पुनः सविमर्शम्) अहो ! महतामप्यर्थित्वादपरं न दैन्यनिदानमस्ति । तथाहि——

तद् बाहुवीर्यमवधीर्य निशाचरेन्द्रो,
विस्मृत्य च द्रुहिणवंशसमुद्भवं स्वम् ।
[5]गृध्नुःससाध्वसमना इव रामजायां,
मायाकृते चटुशतं कृतवान् ममापि ॥ २ ॥

(पुरो विलोक्य) कथमसौ राक्षसराजप्रणिधिर्घोराक्षो मम समीपमागच्छति ? ।

(ततः प्रविशति घोराक्षः ।)

घोराक्षः—(पुरो विलोक्य) [१]एसे अज्जमालीचे, ता हं [6]गच्छम्हि । (इति तथाकृत्वा प्रणम्य च) अज्ज ! [7]समातिसति लक्खतेसले महालाए लावने, जधा—तुमए सयमंगीकत-

---

१ एष आर्यमारीचः, तदहं गच्छामि । आर्य ! समादिशति राक्षसेश्वरः महाराजः रावणः, यथा—त्वया स्वयमङ्गीकृतमर्थं कृत्वा वयं उपक्रियामहे ।

---

1 पृष्ठि भा० । 2 हस्तचिह्नान्तर्गतोऽयं पाठः भा० नास्ति । 3 °वस्त्रदा° भा० । 4 'थिभावमनु° भा० । 5 गृह्णन् स° भा० । 6 गच्छामि (त्ति तथा दे० । 7 समादिसदि ल° दे० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

मत्थं कलितून अम्हानमुवकीरतं ।

मारीचः—(विलक्षं स्मित्वा) घोराक्ष !

दैवाधीनो रावणस्योपकारः, स्वस्यैवेदं तूपकर्तुं यतिष्ये ।
आसाद्यन्ते ये तपोभिर्न लोका, रामान्मृत्युं प्राप्य गन्ताऽस्मि तेषु ॥ ३ ॥

घोराक्षः—[1]अज्ज ! किं तुम्हे वि विसातसंजुत्तं व [1]मन्तेध ? ।

मारीचः—[2]वत्साऽसाध्ये कर्मणि दशकन्धरेण प्रयुक्तस्य मम कथं न विषादः ? । तथाहि—

देवेन्द्राद् दशकन्धरं गतवती, तस्माच्च माहिष्मती-
नाथं प्राप्तवती, ततश्च विजयश्रीराश्रिता भार्गवम् ।
निष्क्रम्याथ ततो गतागतपरिश्रान्तेव तस्थौ स्थिरा
काकुत्स्थेऽत्र, जिजीविषुस्तदमुना सार्द्धं विगृह्णातु कः ? ॥ ४ ॥

घोराक्षः—[2]अज्ज [3]यति तुम्हानं पि [4]ईतिसे संदेहे, ता कज्जसिद्धी वि [5]तातिसी संभाविज्जते ।

मारीचः—दैवे प्रतिकूले कुतः कार्यसिद्धिः ? ।

घोराक्षः—[3]अज्ज दिव्वं पतिकूलं [6]कधं जानिय्यते ? ।

मारीचः—वत्स ! अविमृश्यकारिता प्रतापखण्डनमयतेन्द्रियत्वं चेति प्रतिकूलदैव-चिह्नानि । तथाहि—

जामिं सूर्पणखां यदेष विदधे व्यग्रां रघुग्रामणी-
र्दीप्यद्दोःपरिघान् जघान समिति भ्रातॄन् खरादींश्च यत् ।
तन्नैतां वहति त्रपां न च रुषं पञ्चेषुणा वञ्चित-
श्चित्ते किन्तु तदङ्गना[7]पहरणं धत्तेऽधुना रावणः ॥ ५ ॥

किञ्च—

मूर्त्तिर्भूमिभुवः स्वभावसुभगा दत्त्वाऽङ्गरागं पुन-
स्तत्र श्रीरधिका न्यधीयततरामत्रेः कलत्रेण यत् ।

---

१ आर्य ! किं यूयमपि विषादसंयुक्तमिव मन्त्रयथ ? ।
२ आर्य ! यदि युष्माकमपि ईदृशः सन्देहः, तत् कार्यसिद्धिरपि तादृशी सम्भाव्यते ।
३ आर्य ! दैवं प्रतिकूलं कथं ज्ञायते ? ।

---

1 मण्णेध दे० । 2 वत्स ! दुरसाधकर्मणि भा० । 3 जदि दे० । 4 ईदिसे दे० । 5 तादिसी संभाविय्यदि दे० । 6 कधं जानिज्जते भा० । 7 'नाकवलनं धत्ते' भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

काकुत्स्थे स्वयमुग्रधामनि मुनिर्यच्चाऽस्त्रविद्यां ददौ,
तत् पौलस्त्यकुलक्षयाय नियतेः सोऽयं किलोपक्रमः ॥ ६ ॥

[1]एष इदानीं क्वावतिष्ठते दशकण्ठदेवः ? ।

घोराक्षः—[1]अज्ज ! एतस्स लामनिवेसस्स सविहत्थिते [2]कततावसलवे अलक्खिते ज्येव तुम्हेहिं मायापवंचेन कलिस्समानं लामलक्खनापकलिसनं पतिक्खमाने चिट्ठदि । [3]ता मये निवेतितावसले आगंतून [4]सीतापहलनं कलिस्सदि ।

मारीचः—(सोद्वेगचिन्तम्) विरुद्धो हि विधिः । न केवलं विभूतिं, बुद्धिमप्यपकर्षति । तथाहि—

महाग्निहोत्री द्रुहिण[5]स्य पौत्रो, जिह्यक्षतेऽन्यस्य कलत्रमेषः ।
[6]तत्रापि वीरस्य रघूद्वहस्य, छलेन तत्रापि न विक्रमेण ॥ ७ ॥

भवतु, यद् भाव्यं तदवश्यमेव भविष्यति । तदेहि प्रस्तुतकार्याय प्रयतामहे ।
(इति निष्क्रान्तौ ।)

॥ विष्कम्भकः ॥

(ततः प्रविशति यथानिर्दिष्टो रावणः ।)

रावणः—(सवितर्का[7]नुरागम्) अपि नाम सत्यं स्याद् वैदेहीवि[8]षयेऽवभापितमन्यथा ।

तन्वीति चन्द्रवदनेति मृगेक्षणेति,
तुङ्गस्त[9]नीति मधुराऽधरपल्लवेति ।
सीता [10]श्रुताऽथ कथिताऽथ यथा तथेयं,
स्यान्नाम[11] तद् विधिरचिन्त्यविधानशक्तिः ॥ ८ ॥

(पुनः सस्पृहोल्लासमात्मानं प्रति)

रम्भायाः सुभगत्वमङ्गलतया द्वेधाऽप्यधःकुर्वतीं,
द्वेधाऽ[12]प्यब्जपराजयोर्जितमुखीमालिङ्गितुं जानकीम् ।

---

१ आर्य ! एतस्य रामनिवेशस्य सविधस्थितः कृततापसरूपः अलक्षित एव युष्माभिः मायाप्रपञ्चेन करिष्यमाणं रामलक्ष्मणापकर्षणं प्रतीक्षमाणः तिष्ठति । तद् मया निवेदितावसरे आगत्य सीतापहरणं करिष्यति ।

---

1 तद्दिदानीं भा० । 2 कदता° दे० । 3 ततो मये दे० । 4 सीदाप° दे० । 5 °णप्रपौत्रो भा० । 6 तथापि भा० । 7 °नुगतम् दे० । 8 °विषयेऽवरभावितमन्यथा चा भा० । 9 °स्तनेति दे० । 10 स्तुता च क° भा० । 11 °म यद् विधिरचित्यवि° दे० । 12 °प्यक्षपरा° दे० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तत्र क्षत्रबटौ च सङ्घटयितुं निस्त्रिंशदण्डाशनिं,
सज्जाः सम्प्रति बाहवो भवत हे ! लब्धक्षणो रावणः ॥ ११ ॥

(इति मुहूर्त्तमिव स्थित्वा काननमवलोक्य) अये ! कथमसौ मधुमासो मम सेवासमयमवगम्य [1]स्वचिह्नानि प्रकाशयति ? । तदेतानि मदनानलोद्दीपकानि न मे सम्प्रति सीतासक्तमानसस्य सम्मदमुत्पादय[2]न्ति । (इति निवारयति साक्षेपम्)

किं वाचाल ! करोषि रे [3]कलरवं पुंस्कोकिल ! त्वं मृषा ?,
कस्मान्मारुत ! वासि वासितवपुस्त्वं मल्लिकाचम्पकैः ।
पुष्पौघं सहकार ! वारय नवं द्रागेव, सेवाक्षणो
युष्माकं भविता तदा जनकजायुक्तो यदा रावणः ॥ १२ ॥

कथमद्यापि विलम्बते घोराक्षः ? ।

(प्रविश्य सम्भ्रान्तः)

घोराक्षः—[1]भट्टा ! अवसले संपदि अज्जकज्जस्स ।

रावणः—(सहर्षम्) घोराक्ष ! कचिदपकृष्ट एव मारीचेन सीतासमीपतः स रामनामा तापसवटुः ।

घोराक्षः—[2]न केवलं लामे, लक्खने पि ।

रावणः—साधु महाप्राज्ञ मारीच ! साधु । कथमतिवाहितावेतौ ? ।

घोराक्षः—[3]भट्टा ! अज्जमालीचे कंचनहलिनलवं कलितून सीताए पुलते संचलिते । [4]तालिसस्स तस्स तंसनेन संजातकोदुहल्लाए सीदाए भनिते प्रतिस्सवि तस्स चिय चित्तचम्मसंगहनत्थं धनुसं सतूनं गहितून पत्थिते लाहवे ।

रावणः—ततस्ततः ? ।

---

१ भर्त्तः ! अवसरः सम्प्रति आर्यकार्यस्य ।

२ न केवलं रामः, लक्ष्मणोऽपि ।

३ भर्त्तः ! आर्यमारीचः काञ्चनहरिणरूपं कृत्वा सीतायाः पुरतः सञ्चलितः । तादृशस्य तस्य दर्शनेन सञ्जातकुतूहलया सीतया भणितः प्रदृश्य तस्यैव चित्रचर्मसङ्ग्रहणार्थं धनुष्षं सतूणं गृहीत्वा प्रस्थितः राघवः ।

---

1 हस्तचिह्नान्तर्गतोऽयं पाठः दे० नास्ति । 2 °यन्तीति निवारयामि । (साक्षेपम्) भा० । 3 कलकलं पुं° भा० । 4 तातिसस्स भा० ।

घोराक्षः—[1]ता दूलपथं गतस्स तस्स घातनत्थं लाहवेन सले मुक्के। ता सलप्पहालानंतलं विवज्जमानेन संपत्तलक्खसलूवेन मालीचेन तालस्सलमेवं घोसिदं—हा [1]भातुक लक्खन! कसटं कसटं, परित्तायस्स परित्तायस्स।

रावणः—ततस्ततः?।

घोराक्षः—[2]तं च लाहवसद्दं संभावयंतीए जानईए साद्ध[2]सवेवमानहियं[3]याये अनिच्छंते पि लक्खने तेहिं तेहिं कक्कसवयनेहिं दुगंछित्तून लामसयासं पेसिदे। ता दाणिं एकल्ल च्चिय सा लामभारिया चिट्ठदि। अवसले महा[4]लायस्स।

रावणः—(श्रुत्वा सशो[5]कविस्मयहर्ष घोराक्षं प्रति) कथं व्यापादित एव तेन तापसापसदेन मारीचः?। हा मायाचतुर मारीच! सन्तु ते स्वामिभक्तानां लोकाः। (इत्यभिधाय घोराक्षं प्रति) घोराक्ष! दर्शय त्रिभुवनैकाभरणभूतां सीताम्।

घोराक्षः—[3]इतो [6]इतो भट्टा! इति।

(उभौ रामाश्रमाभिमुखौ परिक्रामतः।)

घोराक्षः—[4]भट्टा[7]! एशा जानकि (त्ति अङ्गुल्या दर्शयति।)

रावणः—(दृष्ट्वा सस्पृहम्)

सेयं, नमो भगवतेऽद्भुत[8]सृष्टिकर्त्रे धात्रे,

(स्वात्मानं प्रति)

स्थिरीभव मनः! पुरतः प्रियाऽसौ।

(कामबाधां निरूपयन्नाकाशे)

---

१ ततः दूरपथं गतस्य तस्य घातनार्थं राघवेण शरः मुक्तः। ततः शरप्रहारानन्तरं विपद्यमानेन सम्प्राप्तराक्षसरूपेण मारीचेन तारस्वरं एवं घोषितम्—हा भ्रातृक लक्ष्मण! कष्टं कष्टम्, परित्रायस्व परित्रायस्व।

२ तं च राघवशब्दं सम्भावयन्त्या जानक्या साध्वसवेपमानहृदयया अनिच्छन्नपि लक्ष्मणः तैस्तैः कर्कशवचनैः जुगुप्सित्वा रामसकाशं प्रेषितः। तद् इदानीं एकाकिन्येव सा रामभार्या तिष्ठति। अवसरः महाराजस्य।

३ इत इतो भर्त्तः!।

४ भर्त्तः! एषा जानकी।

---

1 भाउ भाउ ल° दे०। 2 °सविवज्जमान° भा०। 3 °हियय‌काये अनिच्छंतेहिं पि लक्खनेहिं कक्कसवयनेहिं दुभच्छित्तून दे०। 4 °लाहस्स भा०। 5 °कहर्षविस्मयश्च) व्यापादित भा०। 6 इतो भाट्टके! (इति दे०। 7 °ट्टा! पश्य जा° भा०। 8 °तरूपकर्त्रे भा०।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कंदर्प ! संहर शरान् शरणं भवान् मे,

(प्राप्त्युपायं चिन्तयन्)

हे भागधेय ! फलितुं समयस्तवायम् ॥ १३ ॥

तद् घोराक्ष ! गच्छतु भवान् । [1]वयमिह समीहितं साधयामः ।

घोराक्षः—(प्रणम्यापक्रामन्नात्मगतम्) [1]कधं एसे लक्खसेसले सीतं [2]अवहलिस्सति ? त्ति चिट्ठदि मे कोदुहल्लता । ता अलक्खिदे ज्येव हगे पिक्खिस्सं । (इति वृक्षान्तरितः पश्यति ।)

(ततः प्रविशति रामस्याऽऽगमनमार्गमवलोकमाना चकितान्तःकरणा सीता ।)

सीता—(सविनयमञ्जलिं बद्ध्वा) [2]भयवदीओ वणदेवदाओ ! तुम्हाणं पसाएण लक्खणसंजुत्तो कुसलेण समागच्छदु अज्जउत्तो ।

रावणः—(उपसृत्य) अयमहम्, भोः ! विद्यतेऽत्र कश्चिदतिथिसत्काराय ? ।

सीता—(श्रुत्वाऽवलोक्य च ससम्भ्रमम्) [3]कधं अदिधी संपत्तो ? । (इत्युपसृत्य आसनमर्पयति ।)

रावणः—(सविस्मयानुरागमात्मगतम्)

अकुङ्कुमविलेपनाऽप्यनुकरोति रुक्मं [3]तनू-

रनञ्जनमपि प्रियं नयनयोर्द्वयं पक्ष्मलम् ।

अयावकरसोऽप्ययसावरुणरोचिरेवाधरो,

धरादुहितुरङ्गकान्यकृतकां श्रयन्ति श्रियम् ॥ १४ ॥

सीता—(सविनयम्) [4]भयवं ! कुदो आगच्छीयदि ? ।

रावणः—सुभगे ! दक्षिणापथात् ।

---

१ कथं एष राक्षसेश्वरः सीतां अपहरिष्यति ? इति तिष्ठति मे कुतूहलता । तद् अलक्षित एव अहं प्रेक्षिष्ये ।

२ भगवत्यो वनदेवताः ! युष्माकं प्रसादेन लक्ष्मणसंयुक्तः कुशलेन समागच्छतु आर्यपुत्रः ।

३ कथं अतिथिः सम्प्राप्तः ? ।

४ भगवन् ! कुत आगम्यते ? ।

---

1 वयमपि स° दे० । 2 अभिलसति ?, चि° दे० । 3 तनूर्निरञ्जन° भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सीता—तां[1] वीसमीयदु मुहुत्तयं। (इति पद्मिनीपत्रपुटके कृत्वा पाद्यमुपनयति ।)

घोराक्षः—(सीतां निर्वर्ण्य सशिरःप्रकम्पमात्मगतं संस्कृतमाश्रित्य) अहो ! त्रिभुवनवनितासौन्दर्यमदापहारी विदेहदुहितुरेतस्याः शरीर[1]सन्निवेशः । तथाहि—

वचसः स्थिरता, दृशोश्चलत्वं, कुचयोरुद्धततांऽसयोर्नतिश्च ।
उदरस्य दरिद्रता, समृद्धिर्जघनस्य, क्वचनापि नेदृगस्ति ।। १५ ।।

तन्नैतदसाम्प्रतम् यदसौ प्राणानपि पणीकृत्य कोणपाधिपतिः पतिभावमस्यामभिलषति ।

रावणः—(पत्रपुटपानीयेन पादौ प्रक्षाल्य सानुरागमात्मगतम् ।)

चन्द्रोऽह्नि, पद्मं निशि, कोकिलोक्तिः
पौषादिमासेषु न राजते यत् ।
सीतातनौ तन्नियतं तदीय-
सौन्दर्यमर्द्धं निदधे विधात्रा ।। १६ ।।

(सीताऽपि तं गतश्रमं विदित्वा फलाहरणार्थमुटजमध्ये प्रविशति ।)

रावणः—(स्वगतमाकाशे) हंहो मन्मथ ! मैथिलीमुद्दिश्य प्रहरन्नपि[2] सम्मतस्त्व-मस्माकम् । तदुपदिशामः[3] किञ्चित्-—

परिहर हरिणाङ्कं यद् वृषाङ्कप्रघाते-
ऽप्ययमयशसि मग्नं त्वां करोति स्म भुग्नः ।
मदन ! वदनपद्मेनाऽऽयुधेनाऽमुनाऽपि,
त्रिभुवनमपि वश्यं ते भविष्यत्यवश्यम् ।। १७ ।।

सीता—(उटजमध्यात् फलान्यादाय तापसं प्रति) भयवं[2] ! इमाइं फलाइं, गिण्हदु भवं ।

रावणः—(सीतां प्रति सानुरागम्) भद्रे ! न खलु वयं वृक्षफलाभिलाषिणः । किन्तु संसारफलमादातुमिहागताः स्मः ।

(सीताऽप्यविदिताभिप्राया सविस्मयं तापसमवलोकयन्ती तिष्ठति ।)

---

१ तद् विश्रम्यतां मुहूर्त्तम् ।
२ भगवन् ! इमानि फलानि, गृह्णातु भवान् ।

---

1 °र निवे° भा० । 2 °पि न सम्म° भा० । 3 °मः । किं तत् ? दे० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

रावणः—(तादृशीं तामवलोक्य स्वगतम्) अद्याप्यसौ मुग्धा, न विदग्धवचनानां भावार्थमवगच्छति । तदुन्मुद्रयामि किञ्चिदभिप्रायम् । समागमनसमयश्च तस्य दुरात्मनो नृपतिपोतकस्य । (प्रकाशम्) भद्रे !

देवः प्रयत्नातिशयेन शङ्के, व्यधत्त पङ्केरुहकेतनस्त्वाम् ।
स्थाने [1]यदन्ये तु निवेशिताऽसि, तेनाऽबुधेनाऽवकरेऽब्जिनीव ॥ १८ ॥

सीता—(श्रुत्वा सविस्मयेर्ष्यमात्मगतम्) [1]कधं एस तवस्सिजणाणुरूवं न जंपदि ? । (इति किञ्चित् पश्चादपक्रामति ।)

रावणः—(सानुरागम्) देवि ! दशाननोऽहं कन्दर्पकदर्थितस्तव शरणमागतोऽस्मि । इदमप्यवधार्यताम्—

अनङ्गसञ्जीवनमेतदङ्गमालिङ्गितुं नार्हति तापसस्ते ।
अहं पुनः पीनपयोधरे ! त्वत्सम्भोगभोग्योचितमूर्त्तिरस्मि ॥ १९ ॥

अपरं च—

मयि वीरवरे सति त्वमन्यं, पुरुषं नार्हसि [2]बर्हिकेशि ! गन्तुम् ।
त्रपुणि प्रणयं करोति कान्ते !, तपनीयं व्यपनीय सन्मणिः किम् ? ॥२०॥

(इत्यात्मरूपं प्रकाशयति ।)

सीता—(दृष्ट्वा सभयोद्वेगम्) [2]हद्धी ! को एस अयालदारुणो मह उवत्थिदो ? । (इति फलानि भूमौ प्रक्षिप्य भयेन वेपमाना पश्चादपक्रामन्ती दिशो[3]ऽवलोकयति ।)

रावणः—प्रिये ! किमेवमाकुलीभूताऽसि ? । ननु विचारय चेतसा मम त्रैलोक्यविजयिनः प्रीतिपात्रत्वफलम् ।

मम विक्रमभीतभर्तृकाणां, नरदेवोरगदेवसुन्दरीणाम् ।
पतिजीवितभैक्षमिच्छतीनां, भव भद्रे ! भजनीयपादपद्मा ॥ २१ ॥

सीता—(पराङ्मुखीभूय सभयरोषम्) [3]रे निशाचराधम ! किं हालाहलं कवलिदुकामो सि ? । किं वा कयंतवयणप्पवेसमहिलससि ? । ता गच्छ तुवरियं, जाव न लक्खणभाउ समागच्छदि त्ति ।

---

१ कथं एष तपस्विजनानुरूपं न जल्पति ? ।

२ हा धिक् !, क एषः अकालदारुणः मम उपस्थितः ? ।

३ रे निशाचराधम ! किं हालाहलं कवलितुकामोऽसि ? किं वा कृतान्तवदनप्रवेशमभिलषसि ? । तद् गच्छ त्वरितम्, यावद् न लक्ष्मणभ्राता समागच्छति इति ।

---

1 जघन्ये भा० । 2 बर्हकेशि भा० । 3 °शो विलो° भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

रावणः—(सक्रोधानुरागमात्मगतम्) न तावदियं दुःशिक्षिता [1]प्रणयवचनोपचार-ग्राह्या । तदेनां बलादपि गृह्णामि । (इति सीतां पलायमानामपि गृह्णाति ।)

सीता—(सत्रासं वेपमाना) [1]हा अज्जउत्त ! हा लक्खण ! हा तात दहरह ! हा अंब कोसल्ले ! एसा अणाह व्व दुट्ठरक्खसेन हरिज्जामि (इति तारस्वरं रोदिति ।)

रावणः—(सीतां बलादपहृत्य परिक्रामन् तां प्रति) अयि दुर्विदग्धे ! पीयूषमपि बलात् [2]पाय्यते ।

सीता—[2]हा भयवंतो लोयवाला ! हा भयवदीओ वणदेवदाओ ! रक्खध रक्खध मं दुट्ठरक्खसेणं हरिज्जमाणं । (इति सास्रमुच्चैर्विलपति ।)

रावणः—(सीतास्पर्शमभिनीय सानुरागमात्मगतम्) अहो ! सर्वाङ्गसुखावहः प्रियतमाशरीरसंस्पर्शः । (पुनः सवितर्कम्)

कुमारमातुरङ्गे स्यात् किमियं सुकुमारता ? ।
अथवा ग्रावपुत्री सा मार्दवस्याऽऽस्पदं कुतः ? ॥ २२ ॥

(इति परिक्रामति ।)

सीता—(पुनरुच्चैःस्वरम्) [3]एसा जणयरायधूदा महारायदहरहस्स सुण्हा कोसल्ला-तणयस्स धम्मदारा असरणा अहं मंदभाइणी विजुज्जामि । ता अत्थि को वि कहिं पि ? जो मं रक्खसेण हरिज्जमाणं रक्खदि । (इति रोदिति ।)

(ततः प्रविशति पटाक्षेपेण सम्भ्रान्तो जटायुः ।)

जटायुः—(समन्ताद् दिशो[3]ऽवलोकयन्) भोः ! क एष मयि गृध्रराजे स्थिते मत्प्रियसखस्य दशरथस्य स्नुषायामप्रियमाचरति ? । (पुनरग्रतः सीतापहारिणं रावणमवलोक्य सखेदम्) आः ! किं पुलस्त्यापत्यमपि धर्मात् प्रमाद्यति ? । तदिदानीमेतस्य मदनान्ध-कारविधुरीकृतज्ञानदृष्टेः शिष्ट[4]पद्यापरिभ्रष्टस्य सन्मार्गमुपदिशामि । (पुनः सीतां क्रन्दन्तीमवलोक्य

---

१ हा आर्यपुत्र ! हा लक्ष्मण ! हा तात दशरथ ! हा अम्ब कौशल्ये ! एषा अनाथेव दुष्टराक्षसेन ह्रिये ।

२ हा भगवन्तो लोकपालाः ! हा भगवत्यो वनदेवताः ! रक्षत रक्षत मां दुष्टराक्षसेन ह्रियमाणाम् ।

३ एषा जनकराजदुहिता महाराजदशरथस्य स्नुषा कौशल्यातनयस्य धर्मदारा अशरणा अहं मन्दभागिनी वियुज्ये । तदस्ति कोऽपि कुत्रापि ? यो मां राक्षसेन ह्रियमाणां रक्षति ।

1 प्रणयितावच° दे० । 2 पाय्यसे भा० । 3 °शो विलो° भा० । 4 °पथपरि° भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सकरुणम्) अहह !

अनेन नीयमानाऽसौ जानकी क्रूरकर्मणा ।
श्येनेन वर्त्तिकेवाऽऽर्त्ता करुणैः क्रन्दति स्वरैः ॥ २३ ॥

(इति पुरोभूय रावणं प्रति)

निशाचराधीश्वर ! मुञ्च सीतां, यतः स्वयं शम्भुकुलोद्भवोऽसि ।
न मन्मथस्यैव तदेतदस्त्रं, लब्धावकाशस्य विधेश्च विद्धि ॥ २४ ॥

अपि च—

वीरस्त्रीशरणैर्निजप्रहरणैः सत्यं रणप्राङ्गणे,
निर्जिग्ये शमनोऽमनोऽपि तदसौ [1]क्रुद्धं विधत्ते त्वयि ।
तत्त्वत्तश्च[2]रनायक ! स्वविभुतासन्तानधर्मच्छिदे,
दुष्कर्माभिधमेतदायुध[3]महो ! दत्ते किमस्मै भवान् ? ॥ २५ ॥

रावणः—(वीक्ष्योपलक्ष्य च) अये ! वार्द्धकविधुरो जटायुरयमेवं प्रलपति ? । (तं प्रति सावज्ञम्) भो पण्डितम्मन्य जरद्गृध्र ! ममापि त्रैलोक्यविजयिनो रावणस्य पुरतो विभीषिका-गर्भमेवमभिधत्से ? । पश्य—

पराजितपुरन्दरं युधि विधूतधूमध्वजं,
नि[4]तान्तनिकृतान्तकं शमितपाशपाणिप्रभम् ।
प्रभञ्जनविभञ्जनं धनपतिप्रतिष्ठाहरं,
वराक ! दशकन्धरं जगति वेत्ति वीरं न कः ? ॥ २६ ॥

तत् किमेतया गतवयसो वयसस्तत्र मदीयशुभाशुभचिन्तया ? । गच्छ निजकार्याय ।

जटायुः—हंहो राक्षस ! त्रैलोक्याहित ! हितवादिनमपि मामेवमाक्षिपसि ? । तन्निजका[5]र्यार्थमेवमहमागत एवास्मि ।

रावणः—(सावेशम्) किं ते निजकार्यम् ? ।

जटायुः—ननु भवद्भुजपञ्जरात् सीताविमोचनम् ।

सीता—(श्रुत्वा साश्वासमिव) [1]को एस महाभाओ दुक्खदवाणलदद्धं मं वयण-

---

१ क एष महाभागः दुःखदवानलदग्धां मां वचनपीयूषरसेन सिञ्चति ? । हा तात ! परित्रायस्व परित्रायस्व मां म्लेच्छमुखात् । शरणं गताऽस्मि आर्यस्य ।

---

1 क्रुद्धं न धत्ते भा० । 2 °श्वर [हे !] स्वकीयविभुता° भा० । 3 महो ! धत्ते किं° दे० । 4 कृतान्त° दे० । 5 °र्यार्थमह° भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पीयूसरसेण सिंचदि ? । (पुनर्नेत्रे उन्मील्य सकरुणं जटायुषं प्रति) हा ताद ! परित्ताहि परित्ताहि मं मिच्छमुहादो । सरणं गद म्हि अज्जस्स । (इति जटायुरभिमुखं बाहू प्रसारयति ।)

जटायुः—वत्से ! समाश्वस्ता भव । को नाम मयि दशरथमित्रे स्थिते सति तवाप[1]हाराय प्रभविष्णुः ? ।

घोराक्षः—(जटायुषं दृष्ट्वा सविस्मयम्) [1]अहो ! लाहवस्स सकलभूदवग्गाणुलग्गदा, जं पक्खिनो पि तस्स पक्खपातं कुनंति ।

रावणः—(सरोषाट्टहासम्) अहो ! गृध्रकीटस्यावष्टम्भः, यन्मयाऽपि गृहीतां सीतामसौ मोचयितुकामः । (पुनस्तं प्रति) रे पङ्गुसूनो पतङ्गापसद ! सीतामोचनं व्यपदिश्य तव पुनर्निजकार्यमपरमेव साम्प्रतमहं मन्ये । तथाहि—

जरापराभूततनोस्तवाद्य, गन्तुं न तीर्थान्तरमस्ति शक्तिः ।
तदत्र पत्रिन् ! मम खड्गधारातीर्थे त्वमाकाङ्क्षसि देहमोक्षम् ॥ २७ ॥

(इति चन्द्रहासमुल्लालयति ।)

जटायुः—(सक्रोधम्) रे यातुधानाधम !

धारातीर्थे मरणं शरणायातां कुलाङ्गनामवतः ।
श्लाघ्यं ममाद्य, न पुनर्भवतस्तां मायया हरतः ॥ २८ ॥

(इत्युभौ संरम्भं नाटयतः ।)

सीता—[2]हा ताद विहङ्गपुङ्गव ! रक्ख रक्ख मं रक्खसादो । (इति रुदन्ती जटायुषो मुखमवलोकयति ।)

जटायुः—(सीतां प्रति सावष्टम्भम्)

सीते ! भीतेः परिचितिरितश्चेतसो यातु [2]पातं,
यस्त्वां प्राप्तः प्रतिभटभिदालम्पटोऽयं जटायुः ।

(पुनः रावणं प्रति साक्षेपम्)

---

१ अहो ! राघवस्य सकलभूतवर्गानुलग्नता, यत् पक्षिणोऽपि तस्य पक्षपातं कुर्वन्ति ।
२ हा तात विहङ्गपुङ्गव ! रक्ष रक्ष मां राक्षसात् ।

---

1 °पहरणाय भा० । 2 पातुं दे० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

रे रे साध्वीं दशरथवधूं मुञ्च मोहान्ध ! नो चेत्
कर्त्ता क्षोणीमरुणतनयः शोणितां शोणितैस्ते ॥ २९ ॥

(रावणाभिमुखं धावति ।)

रावणः—(सक्रोधं कृपाणमाकर्षन्) साधु सुभटम्मन्य जटायो ! साधु । तदेहि कलहकेलिसहां महीमवतरावः । (इत्युभौ निष्कान्तौ ।)

घोराक्षः—[1]ता पउत्तं जुज्झं पक्खिलायलक्खसलायओ, ता इहट्ठिदे ज्जेव हगे पिक्खिस्सं । (इति तथाकरोति)

(नेपथ्ये)

पुलस्त्यकुलपांसन !

निर्जितोऽसि निर्जरैव खैरेभिरजितेन्द्रिय ! ।
नखैर्मे त्वमिदानीं तु रे जघन्य ! निहन्यसे ॥ ३० ॥

अपि च—

रे रक्षः ! प्रतिपक्षतां मयि गते गन्ताऽसि तूर्णं पुरीं,
धूमोर्णारमणस्य रावण ! ततः पाणौ कृपाणं कुरु ।
मस्तिक्यामिषगर्धिगृध्रपटलत्रोटीकरोटीषु ते,
त्राट्कारं कुरुतां भवन्तु च तवाऽसृक्पानपीनाः शिवाः ॥ ३१ ॥

घोराक्षः—(दृष्ट्वा) [2]कधं गिद्धलायतिक्खनखकुलिसवितालितसव्वंगनीसलंतलुहिलप्पवाहनिवडंतधातुलसपिच्छिले नीलसेले ज्जेव संजादे लक्खसेसले ? । ता पुणो वि पिक्खिस्सं ।

(पुनस्तत्रैव)

रावणः—रे रे मुमूर्षो खगमुखर ! अति हि प्रगल्भसे । पश्य—

अरुणसुत ! मदस्त्रपातजातैर्निजरुधिरैररुणो भवन्निदानीम् ।
पितुरनुगुण एव नन्दनः स्यादिति वचनं विदुषां कुरुष्व सत्यम् ॥ ३२ ॥

(पुनस्तत्रैव)

---

१ तत् प्रवृत्तं युद्धं पक्षिराजरक्षोराजयोः, तद् इहस्थित एव अहं प्रेक्षिष्ये ।

२ कथं गृध्रराजतीक्ष्णनखकुलिशविदारितसर्वाङ्गनिस्सरद्रुधिरप्रवाहनिपतद्धातुरसपिच्छिलः नीलशैल एव सञ्जातः राक्षसेश्वरः ? । तत् पुनरपि प्रेक्षिष्ये ।

I पउत्तं जुज्झं ताव एयानं पक्खिलक्खसनाहानं, ता इह° भा० ।

१२

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

हे चन्द्रहास ! सहसा गमय त्वमेत-
मत्युद्धतं पतगमन्तिकमन्तकस्य ।
जेताऽसि वासवमपास्तमहीध्रपक्षं,
मा गृध्रपक्षतियुगक्षितिषु त्रपस्व ॥ ३३ ॥

तदेष न भवसि ।

घोराक्षः—[1]कधं महाराअराअणेण लूनपक्खजुगले महीतलं निपतिते ज्येव पतंगराये ? ।

(पुनस्तत्रैव)

सीता—[2]हा अज्जउत्त ! हा लक्खन वत्स ! एस तुम्हाणं अयारणसज्जणो जटाऊ मह मंदभाइणीए परित्ताणं कुणंतो वावादीयदि । ता रक्खध एणं ।

घोराक्षः—(विलोक्य) [3]एसे [1]लक्खसेसले जडायुं जीवसेसं कलितून पत्थिते ज्येव ।

(ततः प्रविशति गृहीतधन्वा रामः ।)

रामः—(सविस्मयम्) अहो ! विप्रलब्धोऽस्मि विश्वामित्रसत्रपरित्राणाय वायव्यास्त्रविनिर्धूतेन मायामृगमयीं मरुमरीचिकां दर्शयता मारीचेन । (पुनः सविमर्शम्)

चञ्चत्काञ्चनकान्तिमिश्रितमणिश्रेणीभिरेणीभवन् ,
मारीचो रचयाञ्चकार यदिदं मद्वञ्चनायैव तत् ।
भ्रातर्लक्ष्मण ! रक्ष मामिति पुनर्यद् व्याहृतं रक्षसा,
तेनोच्चैर्मम बाणरुग्णवपुषा किं नाम तत्कारणम् ? ॥ ३४ ॥

भवतु । तदपि परिज्ञास्यते । (इति परिक्रामति ।)

घोराक्षः—(दृष्ट्वा ससम्भ्रमम्) [4]एसे संपत्ते ज्जेव लाहवे । ता अनिरिक्खिते ज्येव पलाइस्सं । (इति पश्चादवलोकयन् द्रुततरं निष्क्रान्तः ।)

रामः—("चञ्चत्काञ्चन०" इत्यादि पुनः पठित्वा पुरो विलोक्य ससम्भ्रमम्) कथमसौ वत्सलक्ष्मणः समागच्छति ? ।

---

१ कथं महाराजरावणेन लूनपक्षयुगलः महीतलं निपतितः एव पतङ्गराजः ? ।
२ हा आर्यपुत्र ! हा लक्ष्मण वत्स ! एष युष्माकं अकारणसज्जनः जटायुः मम मन्दभागिन्याः परित्राणं कुर्वन् व्यापाद्यते । तद् रक्षत एतम् ।
३ एष राक्षसेश्वरः जटायुं जीवशेषं कृत्वा प्रस्थित एव ।
४ एषः सम्प्राप्त एव राघवः । तद् अनिरीक्षित एव पलायिष्ये ।

---

1 लंकेसले भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

(ततः प्रविशति सम्भ्रान्तचित्तो लक्ष्मणः ।)

लक्ष्मणः—(रामं दृष्ट्वा) आर्य ! लक्ष्मणः[1] प्रणमति । (इति तथाकरोति ।)

रामः—वत्स ! किमेकाकिनीं जानकीं समुत्सृज्य समागतोऽसि ? ।

लक्ष्मणः—आर्य ! किं करोमि ? । केनचिदुच्यमानं तत् तादृशं वचनमाकर्ण्य चकितान्तःकरणा देवी यन्मां प्रत्युवाच तदहं न विज्ञपयितुं शक्तः, न चाऽऽर्यः श्रोतुमर्हति ।

रामः—(ससम्भ्रमम्) वत्स ! तथापि किं तत् ? ।

लक्ष्मणः—तदवधार्यतामार्येण—

भ्रातर्जातभयस्य लक्ष्मण ! मम त्राणं कुरु क्षिप्रमि-
त्युच्चैः कश्चिदुवाच वाचमथ तां श्रुत्वा त्वदुक्तिभ्रमात् ।
देवी प्रेषयति त्वदन्तिकमहं नोत्सृज्य गच्छामि तां,
निश्चिक्ये तदसावसाधुमिव मामार्त्ता च मर्तुं स्थिता ॥ ३५ ॥

रामः—(सचमत्कारं नखच्छोटिकां दत्त्वा) नियतमेतदर्थमेव मृत्युमुखमुपसर्पता सता मारीचेन तद्वचनमेवमुदीरितमिति । (पुनर्लक्ष्मणं प्रति) वत्स ! कथमेकयातुधानवधेऽपि मामसमर्थं मन्यसे ? यद् वैदेहीवचनेन मामनु चलितोऽसि ।

लक्ष्मणः—आर्य ! 'एकोदराणामपि द्वैधविधायकानि प्रायेण वनि[2]तावाक्यानि भवन्ति' इति समागतोऽस्मि । किञ्च—

भृत्यापराधं प्रभुरात्मदृष्टं, स्पष्टं विमृश्य क्षमतेऽथ नो वा ।
यस्तु श्रुतः स्त्रीमुखतः परोक्षे, तितिक्ष्यतेऽसौ न तितिक्षुणाऽपि ॥ ३६ ॥

रामः—वत्स ! कोऽयं दुर्विकल्पो यदात्मानमपि त्वमितरजनसामान्यं मन्यसे ? । अपरं च—

सम्भावयतु भयं मयि वैदेही स्नेहतोऽथ कातर्यात् ।
त्वयि पुनरधर्मशङ्का महदनिमित्तं तदेतस्याः ॥ ३७ ॥

(इत्युभौ त्वरिततरं स्वाश्रमाभिमुखं परिक्रामतः ।)

रामः—(दुर्निमित्तं सूचयित्वा सोद्वेगचिन्तम्) वत्स ! सम्प्रति स्फुरता मम वामलोचनेन तेन च त्वदपकर्षिणा मारीचवचनेन निश्चितमेवमवगच्छामि, यत् केनापि मायाविना नक्तञ्चरेणापहृता जानकी ।

---

1 °णोऽहं प्रणमामि । इति भा० । 2 °तावचनानि भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

लक्ष्मणः—(सावष्टम्भम्) आर्य ! केयमाकुलता ? । नन्ववधीयताम्[1]—

तैर्लक्षणैः सुचरितेन च तेन देव्याः[2],
सम्भाव्यते न खलु भीः पिशिताशनेभ्यः ।
स्याद्[3] वा ततस्त्वमसि वीर ! विमुञ्च खेदं,

रामः—(सविलक्षं स्मित्वा) वत्स ! सरलाशयोऽसि । पश्य—

सर्वं भवत्यपरथैव विधौ विरुद्धे ॥ ३८ ॥

(पुरो विलोक्य च [4]सविषादम्) वत्स लक्ष्मण ! सेयं पर्णशाला दृश्यते, न पुनर्जानकी । पश्य—

अस्मत्समागमनमार्गनिविष्टदृष्टिः,
कृत्वा करे च करकं करकोज्ज्वलापम् ।
यन्मैथिली न खलु सम्मुखमेति मे तद्,
नूनं बभूव विफलः सकलः प्रयत्नः ॥ ३९ ॥

लक्ष्मणः—(समन्तादवलोक्य सविषादमात्मगतम्) कथं नास्त्येव देवी वैदेही ? । (प्रकाशं रामं प्रति) आर्य ! परिहासशीला देवी, तत् कदाचिद् दर्शनपथं परिहृत्य स्थिता भविष्यतीति ।

रामः—वत्स ! सत्यम्, परिहासशीला देवी जानकी, न पुनर्नियतिः, तत्तावदवलोक्यतां काऽपि । (इत्युभौ सर्वतो विलोकयतः ।)

रामः—(सविषादम्) हा प्रिये जनकनन्दिनि ! क्वासि ?, प्रयच्छ मे प्रतिवचनम् । (इति मूर्च्छितः पतति ।)

लक्ष्मणः—आर्य ! समाश्वसिहि समाश्वसिहि ।

रामः—(समाश्वस्य) वत्स ! किमलीकमाश्वासयसि ? । दर्शय काऽपि जानकीम् ।

लक्ष्मणः—(समन्तादवलोकयन्नुच्चैःस्वरम्)

रामगेहिनि ! समेहि सत्वरं, देहि मे प्रतिवचः क्व तिष्ठसि ? ।
भर्तुरर्तिजलधौ निमज्जतो, [5]निर्विलम्बमवलम्बनं भव ॥ ४० ॥

कथं प्रतिवचनमपि न ददाति देवी ? । (पुनः सविषादमात्मगतम्) हा लक्ष्मणहतक ! स्वयं निर्गमितमार्यस्य स्त्रीरत्नन्यासमनिर्यातयन् कथमिव जीवितुमुत्सहसे ? । (प्रकाशमुच्चैः

1 °वधार्यताम् भा० । 2 देव्यां भा० । 3 स्याच्चेत् तत° भा० । 4 सखेदम् भा० । 5 निर्विकल्पमव° दे० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

स्वरम् "रामगेहिनि !" इत्यादि पुनः पठन् सर्वतो विलोकयति ।)

रामः—(सबाष्पम्) हा देवि ! जनकराजात्मजे ! नायं परिहासकालः, तद् देहि दर्शनम्, यावदिदं रामहृदयं न द्वेधा भवति । अपरं च—

दृष्टं वा यदि वा श्रुतं मम किमप्यद्य प्रिये ! विप्रियं,
येनादर्शननिग्रहस्य महतः पात्रं कृतोऽस्मि त्वया ।
यद्वा तिष्ठतु साम्प्रतं, किममुना ? शोकाग्निरेतन्मन-
स्त्वद्गेहं हरिणेक्षणे ! दहति तद् द्रागेव निर्वापय ॥ ४१ ॥

(इति [1]मूर्च्छति ।)

लक्ष्मणः—(रामं समाश्वास्य) आर्य ! किमेवमनुद्यमपरैः स्थीयते ? । विलोकयावः क्वचनापि जानकीम् ।

रामः—वत्स ! दैवापहृता क्व नाम देवी विलोक्यते ? । पश्य—

हृतां वा राक्षसैः सीतां संहृतां वा विलोकितुम् ।
आशासु याति मे दृष्टिर्निराशा तु निवर्त्तते ॥ ४२ ॥

लक्ष्मणः—आर्य ! तद्[2]प्युत्साहवतामेव कार्यसिद्धिः । तदुत्थीयताम् ।

रामः—(उत्थाय किञ्चित् परिक्रामन् दिशो विलोक्य सकरुणम्)

दृष्टिः स्पष्टं तटगतमपि प्रेक्षते नाश्रुमिश्रा,
दूराह्वाने न हि पटुरयं बाष्पकुण्ठश्च कण्ठः ।
पादद्वन्द्वं प्रचलितुमिदं न क्षमं मुह्यतो मे,
तद् वैदेहीं क्वचिदचिरयन् वत्स ! पश्य त्वमेव ॥ ४३ ॥

लक्ष्मणः—(सविनयम्) एवमस्तु । (इत्यभिधाय पुरः परिक्रामन् पुनः पश्चादवलोकते ।)

रामः—(तथाविधं लक्ष्मणमवलोक्य सनिर्वेदं तं प्रति)

राज्यश्रियं च जननीं च वधूं च मुक्त्वा,
मामन्वितो न सुखमेषि विशेषतोऽद्य ।
सीता न दृश्यत इतीच्छसि वत्स ! यातुं,
स्थातुं च मूर्च्छति मुहुर्मयि मन्दभाग्ये ॥ ४४ ॥

---

1 मूर्च्छितः भा० । 2 °प्युत्सहमतामेव दे० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

लक्ष्मणः—(निवृत्त्य) आर्य ! [1]किमेवमुदीर्यते ? ।

स्वर्गस्थितोऽपि स पिता मम जीवतीव,
तीव्रप्रतापतपने त्वयि विद्यमाने ।
जीवत्यपि स्वरिव सा जननी गताऽद्य,
सत्यं विदेहदुहिता यदि नाथ ! नास्ति ॥ ४५ ॥

रामः—वत्स ! केयमद्यापि सीतासत्तायां कदाशा ? । सर्वथा नास्त्येव जानकी । हा प्रिये ! हा वनवासैकदुःखभागिनि ! हा शिरीषकुसुमसुकुमारे ! क्वभूताऽसि ? । (इति मूर्च्छितः पतति ।)

लक्ष्मणः—(सास्रम्) आर्य ! समाश्वसिहि समाश्वसिहि । कोऽयं सन्देहपदे नैराश्यनिश्चयः ? ।

(रामः समाश्वसिति ।)

लक्ष्मणः—आर्य ! यावदहं देवीमवलोक्य समागच्छामि तावद् देवेन धैर्यमवलम्बमानेनैवात्र स्थातव्यम् । (इत्यभिधाय निष्क्रान्तः ।)

रामः—(विलोक्य) कथं प्रस्थित एव देवीविलोकनाय वत्सलक्ष्मणः ? । तदहमपि पर्णशालाभ्यन्तरे निपुणतरमन्वेषयामि । (इति तथाकृत्वा सास्रम्) हा पर्णशाले ! त्वमपि मदीयचित्तवृत्तिरिव शून्याऽसि सम्प्रति सीतया विना । (पुनः प्राङ्गणे बकुलमवलोक्य सखेदम्) हा प्रियतमाप्रवर्द्धित बकुलपादप ! त्वमपि मैथिलीं विना विनाथीभूतो मामनुकरोषि । (पुनराकाशे)

वारं वारं बकुलविटपी म्लानिमेति त्वदीयः,
सोऽयं तोयैः सपदि तदिमं सिञ्च सीते ! समेत्य ।
यत्सम्भूतं प्रथमकुसुमं प्राभृतीकुर्वता ते,
क्रीडाकोपक्षितिरिह मया त्वामनत्वाऽपि चक्रे ॥ ४६ ॥

तदन्यतः क्वापि विलोकयामि ? । (इति परिक्रामन्नग्रतो विलोक्य) धिक् कष्टम्, अयमपि देव्याः केलिकुरङ्गकः परित्यक्ताहारो रामहतक इव [2]शून्यमानस इत इतः परिभ्राम्यति । (तमालिङ्ग्य) हा पुत्रक ! क्व सा ते स्वामिनी ? (इति रोदिति । पुनराकाशे)

क्रीडामृगोऽयं मृगशावनेत्रे !, त्वामीक्षितुं भ्राम्यति दिक्षु मूढः ।
सौमित्रिणा यत्र कुतूहलेन, हृते सबाष्पाऽसि हृतात्मजेव ॥ ४७ ॥

---

1 किमिदमु° भा० । 2 शून्यमना इत भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

(इत्यात्मानं मूर्च्छन्तमवष्टभ्य) हन्त ! तदिदानीं किं करोमि ? क्व गच्छामि ? क्व वा विलोकयामि ? न शक्नोमि शोकानलकवलितः पदमपि प्रचलितुम् । यतः—

सीतायामन्तिकस्थायां स्वमीशं विश्वसम्पदाम् ।
[1]मेनेऽहमधुनाऽनीशमात्मनोऽपि तया विना ॥ ४८ ॥

अपि च—

सैव जीवितमित्येतदधुनाऽधिगतं मया ।
तां विना करणग्रामो निष्क्रियः कथमन्यथा ? ॥ ४९ ॥

(इत्यु[2]पविश्य सविमर्शविषादम्) सर्वथा सुदूरं नीता केनापि मायाविना जानकी । मुधैवायमाश्वासयति पञ्चवटीनिकटप्रदेशेषु सीताविलोकनेन स्वमात्मानं वत्सो लक्ष्मणः । (इति निःश्वसन्नधोमुखस्तिष्ठति ।)

(ततः प्रविशति विषण्णवदनो लक्ष्मणः ।)

लक्ष्मणः—(सनिःश्वासम्)

प्रतिनिम्नगं प्रतिनगं प्रतिकान्तारं मयाऽद्य बहुवारम् ।
अन्विष्टा [3]न तु दृष्टा सा सीता केनचिन्नीता ॥ ५० ॥

तत् किं नाम निवेदयि[4]ष्यामि स्वामिने ? । [5]नूतमलमिदानीमग्रतो गमनेन । (इति विलम्बमानः पुनर्विमृश्य च) अथवा स्थित्वाऽपि मया मन्दभाग्येन दर्शयितव्यमेव स्वमुखमार्यस्य । (इत्यु[6]पसर्पन्नग्रतो राममवलोक्य सखेदम्) अहह ! सहस्रांशुवंशैकमौक्तिकमणेरसाधारणधीरताधिकरणस्य प्रियावियोगोन्मत्तचित्तस्य रघुपतेरेवंविधानि वैधुर्यवचनान्यपि शृणोति लक्ष्मणहतकः ? । (पुनरात्मानं प्रति)

सीते !, न वक्ति किमियं ?, क्व ननु प्रयासि ?,
मुञ्च क्रुधं, चरणयोरयमस्मि लग्नः ।
एवं वियोगविकलं प्रलपन्तमार्य-
मालोक्य रे हृदय ! किं न विदीर्यसे त्वम् ? ॥ ५१ ॥

रामः—(सोन्मादमुत्थाय दिशो विलोकयन् वदति)

सा गता, न पुनरेति, सा गता, सा गता, क्व मृगयामि ?, सा गता ।
सा गता, किमपरेण ? सा गता, सा गता, धिगहमस्मि, सा गता ॥ ५२ ॥

---

1 मन्येऽहं° भा०। 2 °पदिश्य दे० । 3 न च दृष्टा दे० । 4 °यिष्ये स्वा° भा० । 5 कृतमिदा° भा० । 6 °पसृत्य अग्रतो विलोक्य दे० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

(इत्यभिधाय मूर्च्छितः [1]पतति ।)

☞ [2]लक्ष्मणः—(सहसोपसृत्य साश्रम्) आर्य ! समाश्वसिहि समाश्वसिहि ।

रामः—(समाश्वस्य) अयि वत्स ! दृष्टा जानकी ? । ☜

(लक्ष्मणः बाष्पमुत्सृजन्नधोमुखस्तूष्णीमास्ते ।)

रामः—(सविमर्शमात्मगतम्) न दृष्टा इत्यर्थतोऽभिहितं भवति । (प्रकाशम्) वत्स ! किमधोमुखस्तिष्ठसि ? । सम्प्रति तावदहं दुर्दैवेन निराशीकृतोऽस्मि सीताऽवलोकनविषये । तदेतदेवास्तु—

सप्ताङ्गं मम राज्यं हृतमर्द्धाङ्गं च मैथिली येन ।
अप्येष शेषमङ्गं गृह्णातु विधिः सुखी भवतु ॥ ५३ ॥

तदधुना गच्छतु भवानयोध्यायाम् । अहं पुनरभार्यः (इत्यर्द्धोक्ते मौनमालम्ब्य शिरसि जटाः पाणिना परामृशति ।)

लक्ष्मणः—(सास्रमात्मगतम्) यथाऽयं जटापरामर्शः तथा तन्नूनमार्यः प्रियावियोगदुःखेन जीवितनिरपेक्षया वशीव प्रव्रज्ययाऽऽत्मानमवसादयितुमिच्छति । (प्रकाशम्) आर्य ! कोऽयमसदृशादेशो ममाऽयोध्यागमनाय ? । नन्ववधार्यताम्—

उद्यतस्य वनं गन्तुमनुगन्ता तवाऽभवम् ।
कार्यान्तरोद्य[3]तस्याहमनुगन्ता तवाऽधुना ॥ ५४ ॥

रामः—(स्वगतम्) अयमहमवगताभिप्रायोऽस्मि वत्सेन । भवतु । (प्रकाशं लक्ष्मणं करे गृहीत्वा सगद्गदम्) वत्स ! किमेतदपि दुःखं मया भवत्सहितेनैवानुभवनीयम् ? । तदलमाग्रहेण । [4]सेधयतु भवानयोध्यायाम् !

लक्ष्मणः—(साश्रमुच्चैःस्वरम्) हा तात दशरथ ! श्लाघनीया भवतः पूर्वं विपत्तिः । इदानीं हा अम्ब कौशल्ये ! प्रगुणीकुरुष्व हृदयं पुनः कृतान्तवज्रप्रहाराय । हा कैकेयि ! सम्पूर्णास्ते मनोरथाः । (इति मूर्च्छितः [5]पतति ।)

रामः—वत्स ! समाश्वसिहि समाश्वसिहि । ननु त्वदेकालम्बनमिमं जनमुत्थाय किं न समाश्वासयसि ? । (पुनराकाशे) देवि विदेहसम्भवे ! किं वत्सलक्ष्मणेऽपि विस्मृतं तत् तादृशं भवत्या वात्सल्यम् ? । तथाहि—

---

1 पतितः भा० । 2 हस्तचिह्नान्तर्गतोऽयं पाठः दे० नास्ति । 3 °द्यतश्चाहं पुरो गन्ताऽधुना पुनः दे० । 4 साध° दे० । 5 पतितः भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

यस्मिन् कार्यवशाद् बहिश्चिरयति त्यक्त्वा ममाप्यन्तिकं,
[1]पस्त्योपान्तगता समाकुलमतिर्मार्गं मुहुर्मार्गसे ।
तस्मिन् नौ व्यसनौ[2]घवार्द्धिविषमावर्त्तप्रपातार्त्तयो-
र्नौभूते ! दिश दर्शनं त्वददृशामूर्च्छापरं देवरे ॥ ५५ ॥

लक्ष्मणः—(समाश्वस्य विमृश्य च) आर्य ! देव्यास्तावन्निश्चयो हरणे, न पुनर्मरणे । [3]तज्जीवतां प्रत्यावृत्तिरपि सम्भाव्यते कदाचित् । तदितो दूरतरमपि गत्वा विलोकयतां प्रवृत्तिरपि क्वापि कुतश्चिदुपलभ्यते । न ह्यप्रयतमानानामेवमेव साहसं कर्त्तुमुचितं भवति ।

रामः—यदत्र साम्प्रतं तद् विधीयतामिति ।

(उभौ दक्षिणाभिमुखं परिक्रामतः ।)

रामः—(कियदप्यन्तरं गत्वा पुरो विलोक्य) अये ! हार इव पतितः पुरो दृश्यते । (गृहीत्वोपलक्ष्य च सास्रम्) वत्स ! निश्चितमसौ देव्याः कृतकण्ठविहारो हारः, तद् भवानप्यवलोकयतु । (इति हारं दर्शयति ।)

लक्ष्मणः—(गृहीत्वा सकरुणम्) हा देवि ! हा रामभद्रदयिते ! विभूषणशेषा वर्त्तसे । (पुनर्निपुणं निरूप्य) आर्य ! नाऽहं निश्चितमवगच्छामि । परमनेन तात्कालिकाभिज्ञानेन निश्चिनोमि, यदसौ देव्या इति । तथाहि—

सकज्जलैरश्रुजलप्रवाहैः, कलङ्कितो मौक्तिकहार एषः ।
महीसुताकण्ठवियोगदुःखदत्तं दधातीव मलीमसत्वम् ॥ ५६ ॥

रामः—(हारं हृदये निधाय तं प्रति सकरुणम्)

मम प्रमदहेतुस्त्वं तस्याः कण्ठमधिष्ठितः ।
हृदि न्यस्तोऽधुना हार ! प्रहार इव बाधसे ॥ ५७ ॥

(इति लक्ष्मणाय समर्प्य) वत्स ! निश्चितं केनापि नीयमानया देव्या निजगमनमार्गाय हारोऽयमिह प्रक्षिप्तः । तदेतया एव दिशा गम्यताम् । (इति तथाकुरुतः ।)

लक्ष्मणः—(दूरादवलोक्य ससम्भ्रमम्) आर्य ! यथाऽयं कश्चिन्महागृध्रो रुधिरारुणीकृतसर्वाङ्गः तृप्तसुहित इव निद्रायमाणः पुरस्तादवलोक्यते तन्नूनमनेनैव मैथिली कवलीकृता भविष्यति ।

---

1 प्रीत्योपा° भा० । 2 'घनागरसमाव° भा० । 3 सज्जीभवतां दे० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

रामः—(दृष्ट्वा) यथाऽऽह भवान् । (पुनः सकरुणम्) हा प्रिये वैदेहि ! निस्सन्देहमधुनाऽविज्ञातविपत्तिरसि । (पुनराकाशे)

त्वन्निर्माणपरिश्रमः समजनि व्यर्थः पृथुश्रोणि ! स,
स्रष्टुर्दृष्टिरियं क्व नाम रमतामप्रेक्ष्य वक्त्रं तव ? ।
शून्यं भूवलयं बभूव, विलयं सर्वे समं सम्मदाः
प्राप्ताः साम्प्रतमन्तरेण भवतीं जातोऽस्मि जीवन्मृतः ॥ ५८ ॥

(इति मूर्च्छितः [1]पतति ।)

लक्ष्मणः—(वल्कलाञ्चलेन वीजयन्) आर्य ! समाश्वसिहि समाश्वसिहि । नन्वेतमात्मकोपानले दुष्टविहङ्गममाहुतीकुर्मः ।

रामः—(समाश्वस्य) वत्स ! किमनेन तपस्विना निहतेन ? । निजदुर्दैवस्याऽयमीदृशः परिणामः ।

लक्ष्मणः—आर्य ! तथापि नैनं जीवन्तमुज्झितुमुत्सहे, तदुत्थीयतामिति ।

(उभौ तदभिमुखं परिक्रामतः ।)

(ततः प्रविशति प्रहारवेदनां नाटयन्नुच्छ्वसितावशेषो जटायुः ।)

जटायुः—(मन्दाक्षरम्) धिग् माम् , यदसाधितसु[2]हृत्कार्य एव विपद्ये ।

लक्ष्मणः—(ससम्भ्रमं धनुषि शरमारोप्य) रे रे गृध्राधम ! तिष्ठ तिष्ठ, सोऽहमिदानीं भवन्तमन्तकनिकेतनं प्रापयामि ।

जटायुः—(श्रुत्वा सक्रोधम्) आः पिशाचपांसन ! मयि दशरथमित्रे स्थिते रामवधूमपहृत्य प्रयातुमिच्छसि ?, तदेष न भवसि । (इत्युत्तिष्ठन् पुनः पतति ।)

रामः—(श्रुत्वा ससम्भ्रमम्) [3]वत्स ! सायकं संहर सायकं संहर । कोऽप्येष सुहृदिव दशरथरामनामग्रहणं कुरुते । तदुपसृत्य निपुणं निरूपयावः । (इत्युपसर्पतः ।)

लक्ष्मणः—हंहो महाभाग ! कस्त्वमेवं व्याहरसि ? ।

जटायुः—(नेत्रे समुन्मील्य) भद्र ! सोऽहमरुणसूनुर्जटायुरस्मि ।

लक्ष्मणः—(अपवार्य) आर्य ! स एवायं तातमित्रं गृध्रराजो जटायुः ।

रामः—(उपसृत्य सविनयम्) तात ! त्वन्मित्रस्य महाराजदशरथस्य प्रथमपुत्रस्त्वामयं रामनामा प्रणमति, अयं च ममानुजन्मा लक्ष्मणः ।

---

1 पतितः भा० । 2 °सुकृतकार्य दे० । 3 वत्स ! वत्स ! संहर सायकं संहर । को भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

जटायुः—(दृष्ट्वा) वत्सौ ! सम्पूर्णमनोरथौ भूयास्ताम् । (पुनः सगद्गदम्) अहो ! प्रियमित्रदशरथ[1]शरीरसङ्क्रान्तसादृश्यः पुनरद्य मे स्मृतिपथमवतीर्णोऽसि ।

रामः—(सखेदम्) तात ! केन त्वमीदृशीमवस्थां नीतोऽसि ? ।

जटायुः—रावणेन ।

रामः—कथमिव ? ।

जटायुः—वत्स ! श्रूयताम् —

कृत्वा तपोधनतनुं दशकन्धरेण,
साध्वी बलादपहृता रुदती स्नुषा मे ।
आक्रन्दितानि करुणानि निशम्य पातुं,
तामागतोऽहममुना निहतोऽस्मि निघ्नन् ॥ ५९ ॥

रामः—(सकरुणं लक्ष्मणं प्रति) वत्स ! पतङ्गपुङ्गवमेतमेवंविध[2]मवलोक्य पुनर्नवीभूतोऽद्य मे तातदशरथशोकः । हा तात जटायो ! हा सूर्यसूतसम्भूत ! हा महासत्त्वशिरोमणे ! हा निष्कारणसज्जन ! केवलमस्मदर्थे परित्यक्तजीवितोऽसीति ।

(उभौ शोचतः ।)

रामः—(स्मृत्वा सचमत्कारम्) वत्स लक्ष्मण ! नूनं प्रथममविदितवृत्तान्तं भवन्तमाक्षिपन्तं प्रहारवेदनाविह्वलः पक्षीन्द्रोऽपि राक्षसभ्रान्त्या ' पिशाचपांसन ! ' [3]इत्याचचक्षे । (पुनर्जटायुषं प्रति सनिर्वेदमञ्जलिं बद्ध्वा)

न मयाऽस्ति समः पापी यत्कृते पुत्रवत्सलः ।
तातश्च तातमित्रं च त्वमवस्थामिमां गतः ॥ ६० ॥

जटायुः—न किञ्चिदुपकृतं मया भवतः, स्वस्य तु महदुपकृतमेव । पश्य—

मयाऽद्य मोचादलकोमलाङ्गी, न मोचिता शत्रुहृता वधूः सा ।
प्राणांस्तदर्थे त्यजता मयाऽऽत्मा, विमोचितः संसृतिबन्धनात्तु ॥ ६१ ॥

(पुनः प्रहारपीडां नाटयन्नक्षिणी निमीलयति ।)

लक्ष्मणः—(रामं प्रति) आर्य ! परिज्ञातस्तावदार्यापहारी स निशाचरचण्डालः । तदिदानीम्—

---

1 °रथसुतशरीरसंक्रान्तसादृश्य ! पुन° दे० । 2 °धं विलो° भा० । 3 इति प्रत्याच° भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

प्रथमं सीताहरणं द्वितीयमधुना पितृव्यसंहरणम् ।
दशवदनकदनकारणमुभयमभूदावयोस्तदिदम् ॥ ६२ ॥

जटायुः—(पुनर्नेत्रे समुन्मील्य रामं प्रति) वत्स ! सम्प्रति प्रस्थातुकामा इव मे प्राणाः, तत् प्रापय मां गोदावरीतीरम्, यथा तत्र जीर्णशरीरमिदमुत्सृज्य सूर्यरथाधिरूढस्य स्वपितुरुत्सङ्गमारोहामि । (इति रामलक्ष्मणाभ्यां दत्तावष्टम्भो नदीं परिक्रामन्) वत्स रामभद्र ! त्वत्सन्निकर्षादुन्मिषतीव मे ज्ञानचक्षुः, तदेतदाकर्णय सीताप्राप्तिकारणं मदीयमुपदेशवचनम् ।

रामः—(सविनयम्) तात ! अवहितोऽस्मि ।

जटायुः—

पम्पामपास्तदुरितां सरसीमितस्त्वं
गत्वा विलोक्य शबरीं श्रवणां च तत्र ।
शैले ततः प्लवगपुङ्गवमृक्षमूके,
सुग्रीवमेहि स करिष्यति वाञ्छितार्थौ ॥ ६३ ॥

रामः—यदादिशति तातः ।

(इति निष्क्रान्ताः सर्वे)

पञ्चमोऽङ्कः समाप्तः ॥ छ ॥

असौ वसन्तकालश्री**वस्तुपालः** क्षमातले ।
प्राप्नुवन्त्युदये[1] यस्य वृद्धिं सुमनसः पराम् ॥ ६४ ॥

---

1 °वन्त्यवधौ यस्य भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

षष्ठोऽङ्कः ।

(ततः प्रविशति माल्यवान् ।)

माल्यवान्—(सचिन्तम्)

येनैकेन शिलीमुखेन समरव्यालः स वाली हतो,
यस्यैकेन पदातिनाऽपि कपिना लङ्का सशङ्का कृता ।
देवेनापि निरस्तनाकपतिना साकं य एकः स्थितः,
सङ्ग्रामाय न माति मे विमृशतः स क्षत्रपुत्रो हृदि ॥ १ ॥

(पुरो विलोक्य) कथमसौ वत्ससारणः ? ।

सारणः—(प्रविश्य) आर्य ! प्रणमामि । (इति तथाकृत्वोपविशति ।)

माल्यवान्—वत्स ! कुतः समागम्यते ? ।

सारणः—काकुत्स्थकटकात् ।

माल्यवान्—वत्स ! विद्युज्जिह्वेनैव प्रच्छन्नवृत्त्या तत्र सुचिरमुषितेन सुग्रीवसख्य[1]वालिवधप्रभृति विभीषणसंयोगपर्यन्ता रामप्रवृत्तिरावेदिता । तदतः परमभिधीयताम् ।

सारणः—आर्य ! पृच्छामि किञ्चित् ? ।

माल्यवान्—ब्रूहि ।

सारणः—अपि परिज्ञायते किमपि वालिवधे कारणम् ? ।

माल्यवान्—वत्स ! नहि भवितव्यता कारणमपेक्षते । निपुणं पुनरन्विष्यतां व्यक्तमिदमस्त्येव कारणम् । तथाहि—

सुग्रीवः सूर्यसुतः सूर्यान्वयसम्भवश्च रघुराजः ।
त्रातः स तेन गोत्री तद्धरितः सोदरादरितः ॥ २ ॥

सारणः—यथाऽऽह मातामहः । आर्य ! किं नाम विज्ञप्तं विद्युज्जिह्वेन हनूमतः समुद्रलङ्घनलीलायितम् ? ।

माल्यवान्—वत्स ! न विज्ञप्तमेव, किन्तु शल्यरूपतया निखातमि[2]दमस्मदीये हृदये । परं वैरिणोऽपि कृताद्भुतकर्माणः स्तुतिभाजनं भवितुमर्हन्ति । पश्य—

---

1 °वालिबन्धप्र° दे० । 2 °मिदाऽस्मदीयहृ° भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सौन्दर्यापहृतप्रभञ्जनमनाः सैवाऽञ्जना वीरसूः,
सत्यं सैष बली बलीमुखवृषः पुत्रः प्रसूतो यया ।
लीलालङ्घितवारिधिर्विधुरयोः प्रादात् पुनः प्राणितं,
सीता-राघवयोः परस्परमभिज्ञानोपदेशेन यः ॥ ३ ॥

सारणः—आर्य ! तदेतदपरमप्यञ्जनात्मजविजृम्भितमात्मानुभूतमार्याय विज्ञप्यते—

सी[1]तावलोकनकुतूहललोलुपस्य,
चित्ताधिकेन वियति व्रजतो जवेन ।
यस्योपमानमजनिष्ट विशिष्टशक्ते-
रम्भोनिधिप्रतिमितं नि[2]जमेव रूपम् ॥ ४ ॥

माल्यवान्—वत्स ! किं नाम दुर्घटं त्रिभुवनोत्कटस्य तस्य पौरुषप्रकर्षस्य ? ।

सारणः—कथङ्कारं च कुमारबिभीषणो राघवेण सङ्गतवान् ? ।

माल्यवान्—वत्स ! सीतायामत्र समानीतायां, श्रुते च समुद्रोपवर्त्तिनि रामभद्रे, प्रवर्त्त्यमाने च प्रहस्तप्रमुखैर्महामन्त्रिभिः प्रतीकारमन्त्रे, प्रश्रयैकपात्रेण बिभीषणेन कोणपाधिपतिरित्यभिदधे—

लङ्केश ! त्रिदिवाङ्गनाः समदनाः सन्त्येव ते सन्निधौ,
किं बध्नासि मनुष्ययोषिति रतिं त्वन्निस्पृहायामिह ? ।
किञ्चैषा रुदती यदत्र नगरे प्राप्ता प्रवृत्तं ततः,
क्रव्यादप्रमदासु रोदनमिदं तन्मुच्यतां मैथिली ॥ ५ ॥

सारणः—शुभमभिहितं तेन दीर्घदर्शिना । ततस्ततः ? ।

माल्यवान्—ततश्च बिभीषणः क्रोधभीषणरावणचरणप्रहारपरिभूतः सभामण्डपान्महान्तमन्तर्मत्सरमुद्वहन्नुदतिष्ठत् ।

सारणः—(सखेदम्) अहह ! नेदं साधु संवृत्तम् । कुटुम्बविरोधं हि धीमन्तः प्रकृष्टं वैरकारणमामनन्ति । भवतु । ततः किमभूत् ? ।

माल्यवान्—तदनन्तरम्—

लङ्कां विमुच्य सचिवैः सहितश्चतुर्भिः,
गत्वोपराघवमुवाच तमेवमुच्चैः ।

---

1 °ताविलो° भा० । 2 निजरूपमेव भा ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

मां रावणावगणितं शरणार्थिनं च,
काकुत्स्थ ! सुस्थय स एष विभीषणोऽस्मि ॥ ६ ॥

वाचं निशाचरवरस्य निशम्य तस्य,
व्योमाङ्गणप्रणयिनोऽथ गणः कपीनाम् ।

सक्रोधमुद्धृतदृषद्द्रुमरौद्रहस्त:,
संहर्तुमेतमुदतिष्ठदरेः कनिष्ठम् ॥ ७ ॥

सारणः—ततस्ततः ? ।

माल्यवान्—ततश्च विभीषणस्तान् बलीमुखमुख्यान् संरम्भमाणानालक्ष्य सलक्ष्मणं सुग्रीवमुखमवलोकयन्तं च रामं प्रत्येवमुवाच—

लङ्केन्द्रेणांह्रिणाऽहं निहत इति रुषा नैष युष्मानुपेतो,
[1]तेनैवायं यतो मे न च रुचिरतरं तत्पदं प्राप्तुकामः ।

किन्तु ब्रह्मप्रसूतेरनुचितचरितं तं परित्यज्य राम !,
त्वामायातोऽस्मि धर्म्यं यदि वितथमिदं पूर्वजेभ्यः शपे तत् ॥ ८ ॥

सारणः—ततस्ततः ? ।

माल्यवान्—तदेवंवादिनि दशकन्धरावरजे 'मायावी कश्चिदस्मदीयच्छिद्रावलोकनार्थं रावणप्रयुक्तो राक्षसः क्षुद्रबुद्धिरिहाऽऽयातः । तत् [2]सर्वथा मारणीय एवासौ' इत्यभिदधानेषु प्लवगप्रधानेषु रामः सामपूर्वमित्यवादीत्—सखे वानराधिराज सुग्रीव ! वत्स लक्ष्मण ! सर्वे च प्लवगपुङ्गवाः ! शृणुत यूयम्—

वक्राशयो वा सरलाशयो वा, न नाम वध्यः[3] शरणागतोऽसौ ।
न मृत्युभीतः शरणागतस्य, भवामि वामः परिपन्थिनोऽपि ॥ ९ ॥

सारणः—ततस्ततः ? ।

माल्यवान्—तदनन्तरं सकलबलीमुखसमुदयानुमोदितवचसा राघवेण नियुक्ताभ्यां सुग्रीवलक्ष्मणाभ्यां सबहुमानमानीय समुद्र[4]सलिलैर्लङ्काधिपत्ये विभीषणोऽभिषिक्तः ।

सारणः—कथमभिषिक्त एव ? ।

☞ [5]**माल्यवान्**—अथ किम् ? ।

---

1 नैते वायं यतो॰मे न हि रु॰ भा॰ । 2 सर्वप्रकारमा॰ भा॰ । 3 वध्यः स्वयमाग॰ भा॰ । 4 ॰सलिलेन लङ्का॰ भा॰ । 5 हस्तचिह्नान्तर्गतोऽयं पाठः दे॰ नास्ति ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सारणः—अहो ! विधातुरतुलैव बलवत्ता, यस्तादृशस्यापि निशाचरेश्वरस्य प्रतिमल्लपराभवमुद्भावयति ।

माल्यवान्—वत्स ! कृतमतीतवर्णनेन । कथय किमिदानीमध्यवस्यति यातुधानाधिपतिः ? ।

सारणः—आर्य ! समुत्तीर्णमहार्णवं सुवेलशैलनिकटनिवेशितकटकं राघवमवगम्य महाराजरावणो मां शुकं च शाखामृगसैन्यसङ्ख्यार्थं क्रुद्धलुब्धभीतावमानितो[1]पजापार्थं च दाशरथिशिबिरे प्रेषयामास । तदनन्तर[2]मावां कृतवानरवेषौ तत्र निभृतं परिभ्रमन्तौ कुमार-विभीषणपुरुषैरस्मन्मायावेदिभिर्बद्ध्वा रामसमीपमानीतौ ।

माल्यवान्—ततस्ततः ? ।

सारणः—ततश्च रामसमीपवर्तिना कुमारबिभीषणेनेदमुदीरयाञ्चक्रे—'देव दाशरथे ! रावणमन्त्रिणौ शुकसारणाभिधानौ प्रधानवानरोपजापार्थमिहायातावेतौ वधार्हौ' इति श्रुत्वा रामभद्रेणाऽभिदधे—सखे बिभीषण ! शान्तं पापम्, 'न कदाचित् प्रणिधयो वधमर्हन्ति' इति बन्धनादु[3]न्मोच्येतामेतौ वेपमानशरीरौ । पुनरावां प्रत्येवमूचे-भद्रौ ! मा बिभीतः, सकल-मप्यस्मद्बलमवलोक्य चिकीर्षितं कृत्वा निवेदयत निजस्वामिने ।

माल्यवान्—(सकौतुकम्) अयि ! दृष्टस्त्वया स रामभद्रः ? ।

सारणः—आर्य ! न केवलं दृष्ट एव, तत्त्वतोऽवगतोऽपि ।

माल्यवान्—कथय, कीदृगसौ ? ।

सारणः—आर्य ! श्रूयताम्—

न क्रोधेऽपि वदत्यसावमधुरं, कृत्वाऽपि लोकोत्तरं
न स्यादुद्धुरकन्धरो, न विधुरोऽप्यालम्बते दीनताम् ।
किं भूयः कथितेन ? लोचनपथं काकुत्स्थवीरः स चेत्,
सम्प्राप्तः कुरुते रिपोरपि ततः श्लाघासु घूर्णं शिरः ॥ १० ॥

माल्यवान्—ततस्ततः ? ।

सारणः—अथ यावदावामपगतबन्धनाभिशङ्कौ लङ्काभिमुखं प्रस्थितौ तावत् सुग्रीवं दर्शयता लक्ष्मणेन सोल्लुण्ठमभिहितौ—भद्रौ ! भवद्भ्यामिदमस्मदीयं वचनं श्रावयितव्यः स विश्रवसस्तनयः ।

---

1 °पजपनार्थं भा० । 2 °माविष्कृत° भा० । 3 °च्यन्ताम्, येन वेप° दे० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सङ्ग्रामातिथिरेष वानरपतिर्लङ्कापते ! प्राप्तवान्,
अस्याऽभीप्सितमर्हसि त्वमधुना कर्तुं प्रवीरोऽसि यत् ।
किञ्च स्थाम बभूव यत् तव हृदि श्रीरामरामाहृतौ,
तस्याऽऽविष्करणक्षणोऽयमधुना क्षिप्रं तदुत्सह्यताम् ॥ ११ ॥

अथाऽऽकर्ण्य तद्वचनं शुको लङ्केशनिकेतनं गतवान् । अहं पुनरिहाऽऽयातः ।

माल्यवान्—(सचिन्तम्) वत्स !

धीराणां दशकन्धरो धुरि सुरैः स्वामीव यः सेव्यते,
मन्ये नाऽन्यजनैः समं तमपि यः सेतुं बबन्धाम्बुधौ ।
तत्सीतापणमेतयोरिह रणं सम्भावयामि ध्रुवं,
तुल्यस्फूर्जितयोर्जयाजयविधौ मुग्धं पुनर्मे मनः ॥ १२ ॥

सारणः—एवमेतत् । कः सन्देहः ? । (पुनः स्मृत्वा) आर्य ! विस्मृतं किञ्चिदस्ति ।

माल्यवान्—किं तत् ? ।

सारणः—ततः शुके प्रस्थितवति काकुत्स्थेन किमपि कर्णे कथयित्वा तमनुपदमङ्गदः प्रेषितः ।

माल्यवान्—तदेहि तदवगमनाय राजकुलमेव प्रविशावः । (इति निष्क्रान्तौ ।)

॥ **विष्कम्भकः** ॥

(ततः प्रविशति सभामण्डपोपविष्टो रावणः शुको विभवतश्च परिवारः ।)

रावणः—(सरोषं स्मृत्वा) शुक ! किमुदीरितं दुरात्मना तेन कनिष्ठतापसेन ? ।

शुकः—" सङ्ग्रामातिथिरेष वानरपतिः " श्लो० ११ (इत्यादि पठति)

रावणः—अयि ! कोऽयमस्थाने काकुत्स्थडिम्भयोरभिमानग्रन्थिः ? । तथाहि—

कुर्वाणः कपिना परेण कलहं वाली छलेनाऽऽहतो,
हेतुः सेतुविनिर्मितौ नलकरस्पर्शप्रभावोऽभवत् ।
तद्वीरोत्तमतानिमित्तमियता किं नाम रामस्य ? यत्,
तद्बन्धुर्गुरुगर्वगर्भितमिति स्थानस्थितो जल्पति ॥ १३ ॥

शुकः—देव ! वैदेहीविरहविक्लवयोर्नरयोः प्रलपितानि न कर्णे करणीयानि ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

रावणः—(सीतां स्मृत्वा ससन्तापमात्मगतम्) देवि ! विदेहराजात्मजे ! केयमद्यापि निर्दयता ?—

चाटुकोटिघटनापरे पुरः, पादयोः प्रणमति प्रतिक्षणम् ।
दित्सति स्वमपि देवि ! जीवितं, रावणे किमिव[1] न प्रसीदसि ? ॥१४॥

अपि च—

त्वदर्थिनं सम्प्रति मां प्रहर्तुमुभौ स्थितावुद्यतचण्डचापौ ।
साध्यस्तयोस्तन्वि ! ममैष रामः, कामः प्रसादस्य तु तावकस्य ॥ १५ ॥

(पुरो विलोक्य प्रकाशम्) अये ! कोऽयं मद्द्वारप्रविष्टो मर्कट इव मध्येसभमभ्येति ? ।

(ततः प्रविशत्यङ्गदः ।)

अङ्गदः—(अग्रतो दृष्ट्वा) स एवायं दशाननः । (तथाकृत्वा) भो लङ्केश्वर ! वालिसूनुरहमङ्गदः काकुत्स्थादेशेन भवत्सदेशमागतः, तन्निशम्यताम्—

आदिष्टं रघुपुङ्गवेन तदिदं यत् त्वं पुलस्त्याङ्गभूः,
सोढं दुर्ललितं तदेतदभयं प्राणेषु दत्तं तव ।
सीतामर्पय मे बिभीषणमितः प्रीत्या नय स्वान्तिकं,
सुग्रीवस्य रुषं ततः समुदितावावां हरिष्यावहे ॥ १६ ॥

रावणः—(श्रुत्वा सोल्लुण्ठम्) ननु भोः शाखामृग ! कोऽयं रामो योऽस्मानेवमादिशति ? रावणगृहीतां च सीतामभिलषति ? ।

अङ्गदः—निशाचरेश्वर ! कर्मणैवायमात्मानं प्रकाशयिष्यति ।

रावणः—किं तत् कर्म ? ।

अङ्गदः—यत् त्वदीयापराधस्य प्रायश्चित्तम् ।

रावणः—(स्वगतम्) अहो ! धृष्टत्वं मर्कटापकृष्टस्य । (पुनः सवितर्कम्)

सोऽहं किं न भवामि ? येन समरान्निर्वासितो वासवः,
स्वप्नः किं नु ? मतिभ्रमः किमुत मे ? किं वेन्द्रजालोदयः ?
वाचाटः कपिकीटं एष जटिना केना[2]पि यत् प्रेषितः,
स्वैरं व्याहरते निशम्य तदपि क्षाम्यत्यहो ! रावणः ॥ १७ ॥

---

1 किमिति भा० । 2 °नापि च प्रे° दे० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अङ्गदः—(सविमर्शमात्मगतम्) कथं किमपि चिन्तयन्निवायमवलोक्यते ? । भवतु, ब्रवीमि तावत् । (प्रकाशम्)

प्रष्टव्योऽसि निशाचरेश्वर ! किमप्यन्याय्यमेतत् त्वया,
कुर्वाणेन किमात्मपूर्वपुरुषः स्रष्टा न चित्ते धृतः ? ।
शौर्ये चौर्यकलङ्क एष निपतन् नालोकितः ? कि[1]ञ्च किं,
देवोऽसौ खर-दूषण-त्रिशिरसां हन्ताऽथवा न श्रुतः ? ॥ १८ ॥

रावणः—(सरोषम्) आः प्लवङ्गमापसद ! वालिव्यापादक[2]पादजीविन् ! निःसत्त्व ! मया खलु निखिलदिक्पालशिरःशूलेन शूलपाणिपूजोपहारीकृतनिजमौलिना यथा तथा वा विरचितानां कार्याणां किं ते युक्ताऽयुक्तविचारचापलेन ? ।

अङ्गदः—भोः कोणपाधिप ! मा कुप्य । समाकर्णय व्याहरणकारणम्—

एषा पुरी परिजनोऽयमियं समृद्धि-
रुद्भूतधूर्जटिमहीध्रमिदं च देहम् ।
दीनां दशां दशमुख ! द्रुतमेष्यतीति,
त्वच्चिन्तयैव नितरां मुखरीकृतोऽस्मि ॥ १९ ॥

रावणः—(सरोषम्) रे दुर्मुख बलीमुख ! मयि त्रिभुवनविजयिनि प्रभवत्यपि [3]भवच्चिन्तनीयाः किमेता यातुधा[4]नराजधानीसमृद्धयः ? । को वा मदीयपदातेरपि पराभवाय प्रभविष्णुः ? । तथाहि—

निस्त्रिंशदण्डदलितैः स्वशिरोभिरेभि-
रभ्यर्चितस्त्रिभुवनैकविभुः स येन ।
कस्तस्य वीक्षितुमपि क्षमते प्रकोप-
वक्रभ्रु वक्त्रदशकं दशकन्धरस्य ? ॥ २० ॥

अङ्गदः—

आः पौलस्त्य ! किमेवमुत्पुलकितः स्वस्मै मुहुः श्लाघसे ?,
यत् तोषं गमितः स्वमौलिकमलैः बालेन्दुमौलिर्मया ।
प्राचीनं हि विरञ्चिपञ्चमशिरश्छेदापवादं स्मरन्,
देवोऽदत्त वरं [5]तवातिकृपया कायत्रतं कुर्वतः ॥ २१ ॥

1 किन्तु किं भा० । 2 °पादोपजी° भा० । 3 तव चिन्त° भा० । 4 °धानीयराज° भा० । 5 तवापि कृ° दे० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

रावणः—(चन्द्रहासमुल्लासयन् सक्रोधम्) रे कपिपांसन !

न दूत इति वध्यसे व्रज निजानभीष्टानऽभी-
युधे भवत सायुधा यदयमेति लङ्केश्वरः ।

अङ्गदः—

निशाचरपते ! शृणु त्वमसि वालिना पालित-
स्ततः प्रहरतां कथं त्वयि तदङ्गभूरङ्गदः ? ॥ २२ ॥

परं द्रष्टाऽसि यद् विधास्यामः । (इत्यभिधाय निष्क्रान्तः ।)

(नेपथ्ये कलकलादनन्तरम्)

युद्धावेशविशिष्यमाणवदनच्छायोदयस्याऽऽज्ञया,
श्रीरामस्य वदामि वः कपिवराः ! सर्वान् सगर्वानहम् ।
निःसन्धानविधिः समागमदसौ वालेः सुत[1]स्तद् द्रुतं,
स्थूलाः शैलशिलास्तरूनपि गुरून् पाणौ कुरुध्वं युधे ॥ २३ ॥

अपि च—

दधिमुख ! मुखे सेनायास्त्वं भव प्लवगव्रजे-
र्व्रज गज ! दिशं वामां, भीम ! त्वमाश्रय दक्षिणाम् ।
बलमखिलमप्येतच्चिन्त्यं त्वयाऽवहितेन यत्,
सुरगुरुरपि स्तोतुं शक्तिः गवाक्ष ! तवाऽक्षमः ॥ २४ ॥

रावणः—(श्रुत्वा सावज्ञम्) शुक ! कोऽयमेवं वानरेषु व्याहरति ? ।

शुकः—(प्रत्यभिज्ञाय) देव ! कुमुदस्यैवेदमुदीरितम् ।

रावणः—कस्कोऽत्र भोः ! ? ।

(प्रविश्य)

प्रहस्तः—समादिशतु देवः ।

रावणः—हे महाप्रधान ! त्वमपि यातुधानसुभटानुत्साह्य सन्नाहग्रहणाय । (पुनः सानुशयम्) अथवा—

हुङ्कारोऽपि निराचकार समरादैरावणं यस्य मे,
भ्रूभङ्गादपि भङ्गमाप महिषः प्रेताधिपाधिष्ठितः ।

---

1 °स्तद् ध्रुवं, मा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

यातो वातमृगः शृगालतुलनां श्रुत्वाऽपि सिंहध्वनिं,
सेनासंहननेन मर्त्यहतये सोऽहं वहामि त्रपाम् ॥ २५ ॥

प्रहस्तः—देव निशीथिनीचरनाथ ! तथ्यमेवैतत् । कस्तेन भवता सह त्रिभुवनेऽपि वीरतुलामवलम्बते ? ।

छिन्नेषु मूर्द्धसु पुनश्च भवत्सु यस्य,
प्रालेयपर्वतसुतादयितप्रसादात् ।
एकोदरेण शिरसा दशमेन सद्य-
स्तन्मृत्युजन्मजमशौचमवाप्यते स्म ॥ २६ ॥

तथाऽप्यनीकनीतिर्नातिक्रमणीया । (इत्यभिधाय निष्क्रान्तः ।)

रावणः—शुक ! समुत्तिष्ठ, यथा प्रासादशिरोऽधिरुह्य[1] दुह्यन्मनसां वनौकसां विलसितमवलोकयावः । (पुनः प्रतीहारीं प्रति) कादम्बरि ! भवत्याऽपि देवी मन्दोदरी तत्र समानेतव्या ।

कादम्बरी—[1]जं देवो आणवेदि । (त्ति निष्क्रान्ता ।)

शुकः—(उत्थाय) इत इतो देवः । (इत्युभौ प्रासादाधिरोहणं नाटयतः ।)

(ततः प्रविशति मन्दोदरी प्रतीहारी च ।)

मन्दोदरी—(सेर्ष्योद्वेगम्) [2]कादंबरि ! किण्णाम अण्णासत्तहिययस्स अज्जउत्तस्स समीवगमणेण ?, परं ण सक्कीयदि दुण्णयप्पयट्टस्स पइणो अच्चाहिदट्ठाणमुवक्खिदुं । दिट्ठो तए इक्कस्स हणुमंतस्स परक्कमो । तारिसाणं वाणरसुहडाणं कोडी संघडिया सुणीअति । अपरं च—रक्खसरज्जमम्मवेइणो विभीसणस्स वयणेसु दिण्णकण्णो राहवो [2]चिट्ठदि, ता वेवदि [3]मह हिययं । जइ कहं पि सुअ-सारणनिवेदिदसमुद्दलंघणप्पहावाभिसंकिदो अज्जउत्तो समरादो विरमदि ता सोहणं भोदि ।

---

१ यद् देव आज्ञापयति ।

२ कादम्बरि ! किन्नाम अन्यासक्तहृदयस्य आर्यपुत्रस्य समीपगमनेन ?, परं न शक्यते दुर्नयप्रवृत्तस्य पत्युः अत्याहितस्थानमुपक्षेप्तुम् । दृष्टस्त्वया एकस्य हनूमतः पराक्रमः । तादृशानां वानरसुभटानां कोटिः सङ्घटिता श्रूयते । अपरं च—राक्षसराज्यमर्मवेदिनो विभीषणस्य वचनेषु दत्तकर्णः राघवः तिष्ठति, तद् वेपते मम हृदयम् । यदि कथमपि सुत-सारणनिवेदितसमुद्रलङ्घनप्रभावाभिशङ्कित आर्यपुत्रः समराद् विरमति तत् शोभनं भवति ।

---

1 °ह्य मुग्ध° दे० । २ वट्टदि भा० । 3 मे हि° भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कादम्बरी—[1]देवि ! किं कइया वि स तिहुअणिक्कवीरो सत्तुसंकाए लंकावई सम-[1]रादो उवरमदि ? । ता एस दढाहंकारो क[2]ज्जपज्जंतमपिक्खिय ण णिवत्तिस्सदि ।

मन्दोदरी—(सोद्वेगम्) [2]कादंबरि ! क[3]ज्जपज्जंतो कीरिसो हविस्सदि ? त्ति ण जाणीयदि । भोदु । जं अम्हाणं दिव्वं करिस्सदि तं हविस्सदि त्ति ।

(उभे परिक्रामतः ।)

कादम्बरी—(पुरो विलोक्य) देवि[3] ! एस दहकंठदेवो [4]इदो चिट्ठदि ता [5]उवसव्वीयदु । (इति तथाकुरुतः ।)

रावणः—(मन्दोदरीमवलोक्य) प्रिये ! इदमासनमास्यताम् ।

मन्दोदरी—(तथाकृत्वा उत्तरां दिशमवलोक्य साशङ्कम्) [4]अज्जउत्त ! महंतं खु एदं वाणरसिण्णं ।

रावणः—(सावज्ञं स्मित्वा) प्रिये ! को नाम तृणसमूहदाहे दवदहनस्यायासः ? । (पुनः शुकं प्रति) भोः ! चिरपरिशीलितवलीमुखमण्डलो भवान् । अवगमयतु मामेतान् यथार्थकथनेन ।

शुकः—(सविनयम्) स्वामिन् ! समीचीनमवेक्षमाणस्य ममाऽभयप्रदानमस्तु ।

रावणः—अस्त्वेवम् ।

शुकः—(अङ्गुल्या विनिर्दिशन्) अवधार्यताम्—

विश्वविश्रुतबलो नलनामा, विश्वकर्मतनयः कपिरेषः ।
यत्करस्तरणकारणमासीदश्मनामुदधिबन्धविधाने ॥ २७ ॥

रावणः—(सरोषमात्मगतम्) स एष विशेषतोऽप्यस्माकमपकारकारणं संहरणीय एव । (प्रकाशम्) अन्यतो दर्शय ।

---

१ देवि ! किं कदाऽपि स त्रिभुवनैकवीरः शत्रुशङ्कया लङ्कापतिः समराद् उपरमति ? । तद् एष दृढाहङ्कारो कार्यपर्यन्तमप्रेक्ष्य न निवर्त्स्यते ।

२ कादम्बरि ! कार्यपर्यन्तः कीदृशो भविष्यति ? इति न ज्ञायते । भवतु । यद् अस्माकं दैवं करिष्यति तद् भविष्यतीति ।

३ देवि ! एष दशकण्ठदेवः इतः तिष्ठति, तद् उपसर्प्यताम् ।

४ आर्यपुत्र ! महत् खलु एतद् वानरसैन्यम् ।

---

1 °रादो णिवत्तदि भा० । 2-3 °उजवज्जं° भा० । 4 अउट्ठो चि° भा० । 5 उवसुणीयदु दे० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

शुकः—(दृष्ट्वा प्रत्यभिज्ञाय च) देव !

पाता पुलिन्दापयसां गिरेश्च, पाताऽर्बुदाख्यस्य सुतश्च वालेः ।
एकोऽपि लङ्कामभियोद्धुमिच्छत्यखण्डदोर्दण्डमदोऽङ्गदोऽयम् ।। २८ ।।

रावणः—(सोपहासम्) सोऽयं पण्डितम्मन्यः, यस्मात् किल वालिवैरनिर्यातनमन्विष्यति ।

मन्दोदरी—[1]अज्जउत्त ! एस काउरिसाणं पढममुदाहरणं ।

रावणः—(विलोक्य) शुक ! कोऽयं वानरविरूथिनीरवस्थापयन्नितस्ततो बहुधा बम्भ्रमीति ? ।

शुकः—देव ! श्रूयताम्—

प्रत्यासीदति सङ्गरे प्रतिदिशं कीनाशतुल्यः क्रुधा,
कीशानामयमुन्म[1]दोऽत्र कुमुदः सैन्यानि विन्यस्यति ।
यः सङ्कोचनशैलमौलिविपिनक्रीडोद्धतां गोमती-
सीताम्भःपरिरम्भणेन शमयत्यायासतोयच्छटाम् ।। २९ ।।

रावणः—कश्चायं वानरः करकलितशैलशिखरः पुरतो विस्फुरति ? ।

शुकः—स्वामिन् ! अवधार्यताम्—

बालव्रध्नमरीचिजालकपिलः सोऽयं कपिग्रामणीः,
संरम्भेण विजृम्भते रणभरारम्भाय रम्भाह्वयः ।
न स्थामोद्धुरकन्धरैरपि परैर्यस्य प्रवृद्धक्रुधः,
सह्यः सह्यसुदर्शनाचलपतेः पाणिप्रहाराशनिः ।। ३० ।।

रावणः—कस्येदं कोपसाटोपमिव मर्कटकटकमवलोक्यते ? ।

शुकः—स्वामिन् !

पारियात्रगिरिपालनपात्रे, यत्र यन्त्रि[2]तमिदं स्थिरमोजः ।
तस्य कोपच[3]पलं गिरिसैन्यं, विद्धि योद्धुमनसः पनसस्य ।। ३१ ।।

[4]अयं च—

---

१ आर्यपुत्र ! एष कापुरुषाणां प्रथममुदाहरणम् ।

---

1 °न्मदानि कुमुदः दे० । 2 °तमिव स्थितमोजः भा० । 3 °पलं कपिसैन्यं भा० । 4 इतश्च भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

विनतो नाम रामस्य कार्ये कल्पितजीवितः ।
कपिः कोपोन्नतः सोऽयं लङ्कामालोकते मुहुः ॥ ३२ ॥

किञ्च—

जाम्बवानिति नवाम्बुदप्रभः, सोऽयमृक्षपतिरीक्ष्यतामितः ।
यः सुरारिसमरे पराक्रमं, दर्शयन् वरमवाप वासवात् ॥ ३३ ॥

रावणः—कोऽसौ कासरपीवराकारः कपिः पुरतो विस्फुरति ? ।

शुकः—देव ! श्रूयताम्—

गन्धर्वकन्याजननीकृशानुरुत्पादको यस्य नमस्यशक्तेः ।
द्रोणाद्रिकान्तारविहारशीलः, स एष नीलः प्रवणो रणाय ॥ ३४ ॥

(अग्रतोऽपि दर्शयन्) इतोऽपि [1]दृशं निवेशयतु देवः—

सुषेणः सोऽयं यः किमपि कपिवेषेण जगति,
द्विषद्दर्पाटोपग्रसनपटुतेजा विजयते ।
पिता यस्तारायास्तरणिचरणाराधनधनो,
मनोज्ञेषु क्रीडां चरमगिरि[2]कुञ्जेषु कुरुते ॥ ३५ ॥

एते च प्रसिद्धपराक्रमाः प्लवङ्गमाः प्रभुणा परिभाव्यन्ताम्—

हर्म्यं यस्य हिरण्मयः क्षितिधरः सोऽयं हरिः केसरी,
धुर्योऽसौ बलशालिनां शतबलिर्थः कामरूपी कपिः ।
सिन्दूरद्युतिरन्तिकेऽस्य गवयः कृत्तारिवीरस्मय-
स्तस्याग्रे बलिसूदनद्विरदनास्कन्दी च सम्मादनः ॥ ३६ ॥

अपरानप्येतान् शरभवृषभगन्धमादनमैन्दद्विविदप्रभृतिप्लवगयूथपतीनतीतसङ्ख्यान् सङ्ख्याय निबद्धबुद्धीनवधारयतु देवः । (इति सर्वान् दर्शयति ।)

रावणः—कश्चायं संरम्भावसरे समाश्रितमौ[3]नमुद्रः क्षुद्रवानरो गभीरतागुणभाजनमिवात्मानं सम्भावयति ? ।

शुकः—(दृष्ट्वोपलक्ष्य च सोद्वेग[4]मात्मगतम्) हन्त ! (हनूमन्तमुद्दिश्य) दशकन्धरस्याऽयमनुयोगः, तत् कथमेनमञ्जनातनुजमुद्वेजकचरितं स्वामिने निवेदयामि ? । भवतु । (प्रकाशम्)

---

1 दृशं दिशंतु भा० । 2 °कुण्डेषु दे० । 3 °मौनः क्षुद्र° भा० । 4 °मात्मानं प्रति) हन्त ! भा० ।

वारांनिधिं राक्षसराजधानीमक्षाभिधानं युधि यः कुमारम् ।

(इत्यभिधाय तूष्णीमधोमुखस्तिष्ठति ।)

रावणः—(तादृशं शुकमवलोक्य सविमर्शम्)

अतीयिवान् ज्वालितवान् जघन्वान्,

सोऽयं हनूमानिति वाक्यशेषः ॥ ३७ ॥

मन्दोदरी—(दृष्ट्वा सखेदम्) [1]एसो सो हदासो वाणरपंसणो जेण लंका[1]पुरीए अस्सुदपुव्वो तादिसो पराहवो दंसिदो ।

रावणः—(शुकं प्रति साहङ्कारम्) शुक ! किमेवमधोमुखस्तिष्ठसि ? । ननु दुरवलिप्तानामेषां नर-वानराणां एककालमेव प्रतिकरिष्यति रावणस्य कृपाणदण्डः । (इति चन्द्रहासमुल्लासयति ।)

शुकः—देव ! को नाम नैवं मन्यते ? ।

प्रतीहारी—(शुकं प्रति) [2]अज्ज सुअ !—

विप्फु[2]रउ ताव गव्वो सव्वाणं वाणरप्पवीराणं ।

पिक्खइ न हु दहकंठो दिट्ठीए जाव [3]रुद्दाए ॥ ३८ ॥

शुकः—(आत्मगतम्) मनागनुव्रजामि स्वामिनो मनोवृत्तिम् । (प्रकाशम्) देव[4] ! निश्चितं प्रथममसौ तापसः सङ्गराडम्बरमुद्भाव्य पश्चा[5]दनुस्मृतभवदीयभुजप्रभावाभिशङ्कितः कृपणीभूय सीतां प्रार्थयिष्यते ।

रावणः—शुक !

सहैव हरिसेनया विनयनम्रमौलिर्मुहु-

र्यदि प्रणिपतत्यसौ तदपि नास्य सीतां ददे ।

यतः स खर-दूषण-त्रिशिरसां वधादुत्थितो,

न रामशमनं विना विलयमेति कोपानलः ॥ ३९ ॥

---

१ एष स हताशः वानरपांशनः, येन लङ्कापुर्याः अश्रुतपूर्वः तादृशः पराभवः दर्शितः ।
२ आर्य शुक !—विस्फुरतु तावद् गर्वः सर्वेषां वानरप्रवीराणाम् ।
प्रेक्षते न खलु दशकण्ठः दृष्ट्या यावद् रुद्रया ॥ ३८ ॥

---

1 लंकाणयरीए भा० । 2 °रइ ताव दे० । 3 कुद्धाए भा० । 4 देव ! नन्वसौ तापसः भा० । 5 °दनुसर्पन् भव° भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

(पुनश्च सावष्टम्भम्) किं बहुना ? । श्रूयतामयमस्मदीयनिश्चयः—

जीवन् ददे न वैदेहीं सन्देहमिह मा कृथाः ।
युद्धे हि विद्धि विध्वस्तं रावणं सह बान्धवैः ॥ ४० ॥

शुकः—(ससम्भ्रमम्) शान्तं पापम् । प्रतिहतममङ्गलम् । किमिदं "राघवम्" इति वक्तव्ये विपरीतमभिहितं देवेन ? ।

रावणः—(सवैलक्ष्यम्) शुक ! क्रोधावेशोऽयमस्माने[1]वं स्खलयति । (पुनर्वानरसेनामवलोक्य) कश्चायं कपियूथपैः सङ्गरावेशविवशैरपि सविनय[2]मुपगम्य विज्ञप्यमानः प्रभुतामिव प्रकाशयन्नास्ते ? ।

शुकः—(निपुणं निरूप्य) स्वामिन् ! समाकर्ण्यताम्—

केषामेष कृशयति दशग्रीव ! सुग्रीवनामा,
धामान्याजौ न भुजतरसा तिग्मभानोस्तनूजः ? ।
यस्याऽऽदेशं शिरसि हृदये रामकार्यं च धृत्वा,
कीशाः क्लेशं नहि बुबुधिरे बध्यमानेऽपि वार्द्धौ ॥ ४१ ॥

तदुपान्त्यवर्त्ती चायं कुमारबिभीषणः ।

रावणः—(सक्रोधावज्ञम्) किमनेन दुरात्मना कुलाङ्गारेण ? । दर्शया[3]ऽग्रतः ।

शुकः—(अङ्गुल्या निर्दिशन्) तावेतौ तापसनेपथ्यौ दाशरथी । तदवधारयतु देवः—

एतयोर्दशरथप्रसूतयोराकृतिप्रकृतिविक्रमाः समाः ।
लक्ष्यते जगति लक्ष्मणः पुनर्जन्मनैव लघुरेष रामतः ॥ ४२ ॥

अपि च—

सङ्ग्रामाय गृहीतधन्वशरधिः सोऽयं सुमित्रासुतः,
पात्रं देव ! य एक एव भुवने शौण्डीर्यसौन्दर्ययोः ।
ज्येष्ठे भ्रातरि यस्य भक्तिमतुलामालोकयन्नुन्मनाः,
सुग्रीवश्च बिभीषणश्च [4]भवति व्रीडावनम्राननः ॥ ४३ ॥

तदनन्तरश्च आर्य !

अयं रामः श्यामः कमलदलदीर्घाक्षियुगलो,
गले गृह्णातीव ग्रहपति[5]महांसि स्वमहसा ।

---

1 °नेवं विरमारयति भा० । 2 °मुपगम्य विकथ्यमानः भा० । 3 °याग्रे दे० । 4 भवतो व्रीडावनम्राननौ भा० । 5 °महः स्वेन महसा भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

प्रमोदे वा प्राप्ते महति गहने वा विधिवशाद्,
　　विकारं नाकारः प्रथयति यदीयः कथमपि ॥ ४४ ॥

अपरं च—

निर्मूलिताखिलनृपान्वयनामजाम-
　　दग्न्योग्रगर्वगरलग्रसनैकशर्वः ।
विश्वत्रयीविदितविक्रमशालिवालि-
　　हृच्चक्रसङ्क्रमितसायक एष रामः ॥ ४५ ॥

रावणः—स एष मुमूर्षुस्तापसापसदः सुखशयितं मृगराजमुज्जागरयति । (इति निपुणं राममन्विष्यति ।)

शुकः—(तादृशं राव[1]णमालोक्य सविमर्शमात्मगतम्) अयमनेकभावभावितान्तःकरणो महाराजरावणः सुचिरं राघ[2]वमालोकयन्नाऽऽस्ते । तथाहि—

सीता चित्तरतेरयं विषय इत्याकुञ्चितामीर्ष्यया,
　　बध्नाति स्म समुद्रमद्रिभिरिति स्फारीकृतां विस्मयात् ।
व्यग्रं सूर्पणखा[3]मुखं विरचयामासेति रोषारुणां,
　　देवो दाशरथौ निशाचरपतिर्दत्ते दृशां विंशतिम् ॥ ४६ ॥

रावणः—(सरोषं निःश्वस्य कृपाणं परामृशन् तं प्रति)

श्रुत्वाऽपि शत्रुरिति तं च निरीक्ष्य साक्षात्,
　　तत्रापि मानुषममुं पशुभिश्च गुप्तम् ।
हे चन्द्रहास ! कलहाय विलम्बमानः,
　　शीलं कलङ्कयसि किं तद[4]मर्षणीयम् ? ॥ ४७ ॥

(पुनर्मन्दोदरीं प्रति) देवि ! समुत्थीयतां यथैतान् नरवानरान् दुःशिक्षितान् शिक्षयामः । शुक ! भवताऽपि प्रचलितायां वानरवरूथिन्यामितः समागत्य तत्प्रवृत्तिरस्माकमावेदनीया । (इत्यभिधाय मन्दोदरीप्रतीहारीभ्यां सह निष्क्रान्तः ।)

(नेपथ्ये कलकलादनन्तरम्)

हे देवान्तक ! हन्तुमन्तकमपि त्वं हेलयैव क्षमः,
　　क्षेमार्थी समरान्नरान्तक ! न कस्त्वय्युदस्त्रे त्वयि ? ।

---

1 °णमवलो° भा० । 2 °वमवलो° भा० । 3 °मुखं च र° भा० । 4 °मर्षणं मे दे० ।

P. P. Ac. Gunratnasuri M.S.　　　　Jin Gun Aaradhak Trust

सन्धेहि त्वमहो ! महोदर ! शरं कोदण्डदण्डेऽधुना,
सम्प्राप्तः प्रधनोत्सवाय भवतां दिष्टोऽयमिष्टो यतः ॥ ४८ ॥

शुकः—(श्रुत्वा सवितर्कम्) कथमसौ महाराजरावणादेशेन प्रहस्तः समस्तानपि यातुधानप्रधानसुभटानेवमुत्साहयति ? । (पुनरुत्तरतो निरीक्ष्य) अये ! कथमितोऽपि—

बूत्कारैर्बधिरां धरां विदधतः क्रोधारुणैराननै-
र्दिग्दाहभ्रममन्तरिक्षगतयः क्षिप्रं दिशन्तो द्विषाम् ।
कल्पान्तोद्धतवारिवारिधिचलत्कल्लोललीलाभृतः,
सुग्रीवेण समीरिताः सरभसं धावन्त्यमी वानराः ॥ ४९ ॥

तदिदं स्वामिने निवेदयामि । (इति प्रासादादवतरन्नग्रतो विलोक्य) कथमसौ कुमारविभीषणस्य विश्वासपात्रमस्मन्मित्रं प्रच्छन्नवृत्तिर्विहङ्गवेगः समागच्छति ? । तदेनमाहूय वार्त्तयामि । (इति शब्दायते)

(प्रविश्य)

विहङ्गवेगः—सोऽयं शुकः समाकारयति माम् । (इत्युपसर्पति ।)

शुकः—सखे ! किमेवमुत्सुकत[1]या वर्त्तसे ? ।

विहङ्गवेगः—प्रेषितोऽस्मि देव्या सरमया कुमारविभीषणसमीपम्, यथा सङ्ग्रामकामस्य महाराजरावणस्य प्रयाणकप्रवृत्तिं गत्वा विज्ञपयेति ।

शुकः—केदानीं देवी सरमा ? ।

विहङ्गवेगः—अशोकवनिकायां सीतासन्निधाने ।

शुकः—सखे ! समुचितमेव रामविभीषणभार्ययोरेकत्रावस्थानम् । कथं च सा सम्प्रति वर्त्तते विदेहराजात्मजा ? ।

विहङ्गवेगः—(सकरुणम्) वयस्य ! [2]तदेतदयुत (? दनुक्त) मेव श्रेयः । यतः—

निमीलिताक्षी गलदश्रुमिश्रां, भूपृष्ठशय्यामधिशय्य सीता ।
निरन्तरं ध्यायति राममेव, तन्नामसंकीर्त्तनशुष्ककण्ठी ॥ ५० ॥

केवलं त्रिजटासरमयोराश्वासनवचनैर्जीवितं धारयति । (पुनः सचमत्कारम्) परमपरमप्येतदाकर्ण्यताम्—

1 °या प्रव° दे० । 2 तदेतदेवास्तु । यतः भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

दुःखाग्निदूनाऽपि तनुर्मनोज्ञा, लम्बालकेऽप्युज्ज्वलता मुखेन्दौ ।
विधिर्विरुद्धोऽप्यपहर्तुमीशस्तस्याः प्रमोदं न तु सुन्दरत्वम् ॥ ५१ ॥

शुकः—वयस्य ! यद्येवं न स्यात् तत् कथमसौ मन्मथवागुरायां निशाचरपतिर्निपतेत् ? । तदिदं सञ्चरितवानरवाहिनीवृत्तं[1] प्रभवे निवेदयामि । (इति निष्क्रान्तः ।)

विहङ्गवेगः—(परिक्रामन्नग्रतो विलोक्य) स एष कुमारविभीषणो रामभद्रेण सह सुवेलशैलशिखरावस्थितो लङ्कामवलोकयन्नास्ते । तदुपसर्पामि । (इति तथाकरोति ।)

(ततः प्रविशति रामो विभीषणश्च ।)

रामः—(समन्तादवलोक्य) सखे विभीषण ! यथास्थानमवस्थापितेषु वानरयूथाधिनाथेषु सज्जीकृतैव सुग्रीवलक्ष्मणाभ्यां सङ्ग्रामसामग्री । किमिदं क्रव्यादवृन्दं लङ्कापुरीगोपुरान्निर्गच्छदिव निरीक्ष्यते ? ।

विभीषणः—देव ! सम्यगवगम्य विज्ञपयामि । (इति अवलोकयति ।)

विहङ्गवेगः—(उभौ प्रणम्य विभीषणं प्रति) कुमार ! सोऽयं महाराजरावणः प्रगुणितसमग्रसैनिकनिकायः समीकाय समभ्येति । (इति दर्शयति ।)

रामः—(सोत्साहम्) कथं लङ्केश्वरः स्वयमेव समागच्छति ? ।

विहङ्गवेगः—अथ किम् ? ।

(नेपथ्ये कलकलः)

विभीषणः—(श्रुत्वा साश्चर्यम्) विहङ्गवेग ! कोऽयमायोधनभूमिकायामिहायाते सपरिवारेऽपि दशकन्धरे लङ्कायां कल्पान्तपर्जन्यगर्जितानुकारी कोलाहलः श्रूयते ? । तदिदं विदित्वा सत्वरमिहागच्छ ।

विहङ्गवेगः—आदेशः प्रमाणम् । (इति निष्क्रान्तः ।)

रामः—(पुरो विलोक्य) अहो ! विपुलता पौलस्त्यसैन्यस्य ।

विभीषणः—देव ! न केवलं विपुलतैव, सङ्ग्रामैकाग्रताऽप्यस्य परिभाव्यताम् । तथा च–केऽपि कौन्तिकाः, केऽपि पारश्वधिकाः, केऽपि नैस्त्रिंशिकाः, केऽपि शाक्तीकाः, केऽपि धानुष्काः, केऽपि हस्त्यश्वरथारूढाः, केऽपि पत्तयो यातुधानाः पुरतः समुत्सहन्ते ।

---

1 °वृत्तान्तं प्र° भा० ।

(प्रविश्य)

विहङ्गवेगः—(बिभीषणं प्रति) कुमार ! प्रथमं तावद् दशकन्धरदुरवलेपदलनार्थं तदसिद्धौ च विरोधिनिधनार्थं देव्या मन्दोदर्या प्रबोध्यमाने कुम्भकर्णे कर्णावस्कन्दी स एष कोलाहलः ।

बिभीषणः—कथं प्रबुद्धः कुम्भकर्णः ? । किमभिहितं च तेन निरस्तनिद्रेण ? ।

विहङ्गवेगः—कुमार ! प्रबुद्धवता कुम्भकर्णेन प्रबोधकेभ्यः सीतापहारप्रभृति सैन्यस[1]मागमनपर्यन्तं रामरावणयोर्वृत्तान्तमवगम्य सविमर्शमित्यभिदधे राक्षसराजः—

धर्मोऽसौ रक्षसां यत् परधरणिधनाऽगारदाराऽपहारः,
कार्योऽयं शौर्यवृत्त्या, न पुनरुपधिना, सोऽथ चक्रे तथैव ? ।
चिन्त्यं कालानुकूल्यं तदपि न विदधे,

इत्यभिधाय पुनः सानुशयावष्टम्भमात्मानं प्रत्येवमूचे—

को व्यतीते वितर्के—

एतत् तूर्णं कुम्भकर्ण ! व्रज समरधरामुद्धर भ्रातृशल्यम् ॥ ५२ ॥

इत्युक्त्वा पराक्रमितुमुपक्रान्तवान् ।

रामः—(सविमर्शम्) अहो ! नीतिशक्तिसम्पृक्ता कुम्भकर्णस्य भणितिः ।

बिभीषणः—देव ! भणितेरनुरूपः सम्प्रहारव्यवहारोऽप्यस्य चिन्तनीयः ।

रामः—किमुच्यते दशकन्धरावरजस्य कुम्भकर्णस्य ? । (पुनरग्रतः पश्यन्) सखे बिभीषण ! द्वन्द्वयुद्धविधा[2]ननिबद्धबुद्धय इवैते यातुधानसैनिकाः संलक्ष्यन्ते तदवबोधयतु मामेतान् ।

बिभीषणः—(विलोक्य सप्रत्यभिज्ञम्) देव !

प्रेतराजस्य संहारव्यापारप्रतिहस्तकः ।
प्रहस्तोऽयमुदस्तोच्चैर्दण्डहस्तो विजृम्भते ॥ ५३ ॥

इतोऽपि—

महोदरं पुरः पश्य दशग्रीवसहोदरम् ।
गिरितुल्यगजारूढमुद्दृढकार्मुकम् ॥ ५४ ॥

रामः—याविमौ नीलेन सह कलहकेलिमनुभवितुमिच्छतः ? ।

---

1 °मारचनपर्यन्तं रामरावणयो° भा० । 2 °नविरुद्धबुद्धय भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

विभीषणः—एवम्। तदनन्तरश्चायम्—

जवराजिनि वाजिनि स्थितस्तरुणाऽहस्करका[1]न्तिमिश्रित।
दिशते दशमङ्गदे मुहुर्विहितातङ्कभरं नरान्तकः॥ ५५॥

रामः—सखे! कोऽसौ नैकसेयसेनायामनायासविनिर्जितत्रिभुवनवीराहङ्कार इव पुरतः परिभाव्यते?।

विभीषणः—देव!

रथे स्थितोऽयं मृगराजकेतने, निकेतनं दुःप्रसहस्य तेजसः।
समं सुमित्रातनयेन सङ्गरं, समीहते रावणसूनुरिन्द्रजित्॥ ५६॥

रामः—यः किल मेघनादापरनामा मन्दोदरीनन्दनः श्रूयते?।

विभीषणः—अथ किम्?।

रामः—कतरः पुनरयं सुरचक्रवर्त्तिजितः समीपवर्त्ती विलोक्यते?।

विभीषणः—

लङ्केश्वरादजनि यः, स्थितवन्ति यत्र
दिव्यायुधानि च विरञ्चि[2]परेण वीरे।
रोमाञ्चकञ्चुकितकायतयाऽतिकायः,
सोऽयं समित्यनुकरोति कदम्बपुष्पम्॥ ५७॥

रामः—नन्वस्यापि वत्सलक्ष्मणाभिमुख एव कटाक्षनिक्षेपः।

विहङ्गवेगः—देव! समुत्कृष्टतेजसेऽभ्यसूयन्ति खलु मनस्विनां मानसानि।

विभीषणः—साधूक्तं विहङ्गवेगेन। यदेतेऽपि समकालमहम्प्रथमिकया हनूमन्तमेव हन्तुकामाः पुरतोऽवतिष्ठन्ते। (इति दर्शयति।)

रामः—किमभिधानाः पुनरमी यातुधानाः?।

विभीषणः—देव! प्रथमस्तावत्—

बालार्कबिम्बारुणवक्त्रकान्तिर्दन्तावलस्कन्धमधिष्ठितोऽयम्।
उदायुधः कस्य मनः सकम्पं, प्रकम्पनः संयति नाऽऽतनोति?॥ ५८॥

अपरश्च—

---

1 °कान्तितस्करः भा०। 2 °विञ्चरेण भा०।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

घोरं दधानः परिघाभिधानमस्त्रं महाशस्त्रभृतां कृतान्तः ।
देवान्तकः सैष नरान्तकस्य, भ्राता प्रघातार्थमिहोज्जिहीते ॥ ५९ ॥

तदन्तिके च —

दशशिरस्तनयस्त्रिशिराः शरासनमयं नमयन्नवधार्थताम् ।
प्रधनमूर्द्धनि यः प्रदरान् किरन्, गजगतो जगतोऽपि भयङ्करः ॥ ६० ॥

रामः—(सावज्ञम्) किमेभिः प्रभूतैरप्यञ्जना[1]तनूजस्य ? ।

विभीषणः—देव !

खरात्मजोऽयं मकराक्षनामा, दिव्यास्त्रयोधी वरसिन्धुरस्थः ।
तत्पैतृकं वैरमनुस्मरन् यस्त्वय्येव दुष्टां निदधाति दृष्टिम् ॥ ६१ ॥

रामः—(स्मित्वा) भवतु । बहवः खल्वमी तमीचराः । तत्सङ्क्षेपतः समाचक्ष्व ।

विभीषणः—(सर्वानङ्गुल्या [2]निर्दिशन्) देव ! सोऽयमृषभेण महापार्श्वः, गजेन प्रतपनः, जाम्बुवता विरूपाक्षः, शतबलिना विद्युज्जिह्वः, [3]बलेन तपनः, गन्धमादनेन विद्युन्माली, गवाक्षेण घोराक्षः, गवयेन मायामयः, केसरिणा कीलकर्णः, द्विविदेन दीर्घदंष्ट्रः, मैन्देन [4]वज्रमुष्टिरिति परस्परमपरैरपरेऽप्यायोधनविधित्सया पुरतः संरभन्ते ।

रामः—(पुनरवलोक्य) कश्चासौ गगनमण्डलमण्डपावष्टम्भस्तम्भानुकारी महाराक्षसो दृश्यते ? ।

विभीषणः—देव !

लङ्कापुरीपरिभवे सति मय्यपीति,
व्रीडाविवर्णमवलोकय कुम्भकर्णम् ।
देयं यदिष्टमिति वासनया परेषां,
निद्रारतिर्दिशति यः किल दीर्घनिद्राम् ॥ ६२ ॥

रामः—(कुम्भकर्णं निर्वर्ण्य साश्चर्यम्)

आरोप्यते गिरिशिरस्यपरो गिरिश्चेत्,
तद्वद्वन्द्वमञ्जनजलेन विलिप्यते च ।
अत्युच्चमेचकतनुस्तनुते तदैषः,
तत्तुल्यतामवरजो दशकन्धरस्य ॥ ६३ ॥

---

1 °तनयस्य भा० । 2 निदर्शयन् भा० । 3 नलेन भा० । 4 वज्रमु° भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

विभीषणः—देव ! विलोक्यताम् । स एष त्रिभुवनविजयी लङ्केश्वरः ।

स्मृत्वाऽद्यापि यदीयबाहुपरिघप्रेङ्खोलनानामसौ,
कैलाशः पवनावधूतविटपि[1]व्रातच्छलाद् वेपते ।
शक्रातिक्रमकृच्च यस्य चरितं गायन्ति नाकाङ्गनाः,
साकाङ्क्षः समराय राक्षसपतिः सोऽयं पुरः प्रेक्ष्यताम् ॥ ६४ ॥

रामः—सखे ! त्रिभुवनाभिभावुकेन तेजसा दशभिः शिरोभिर्विंशत्या भुजैरज्ञापितोऽपि विज्ञायत एवायं निशाचरचक्रवर्त्ती । (इति रावणं निपुणमन्विष्य पुनः सश्लाघम्) सखे विभीषण ! शृणु समीचीनमस्मदीयं वचः—

उत्पत्तिर्विमले विरञ्चिनि कुले दुर्वारवीरस्मया-
ऽपस्मारप्रतिकारभेषजभुजोद्भूतप्रतापं वपुः ।
वक्तुं यस्य च साहसं यदि स दिग्वासाः शिरःपूजितो,
जानीते तदयं स्वयं समजनि स्तुत्यः पुलस्त्योद्भवः ॥ ६५ ॥

अपरं च—

देशे देशे ककुभि ककुभि क्ष्माधरे क्ष्माधरे च,
ग्रामे ग्रामे पुरि पुरि चिरं यस्य जागर्त्ति कीर्त्तिः ।
दृष्टः स्वामी स पिशितभुजां यद्यसौ हन्त ! मह्यं,
द्रुह्येन्नैवं तदिह विहरेच्चक्षुरक्षुद्रमेव ॥ ६६ ॥

विभीषणः—देव ! न सर्वकालं सदृशान्येव शरीरभाजां भागधेयानि भवन्ति ।

रामः—(तुमुलमाकर्ण्यावलोक्य च) कथमेभिर्वानरनक्तञ्चरैरन्योन्यमुपक्रान्तैव रण-प्रकरणप्रस्तावना । तथाहि—

उद्गर्जत्तूर्यर[2]वरोषितरोमराजयः,
शस्त्रोत्तमानि त इमे समराय राक्षसाः ।
लङ्कापुरीपरिसरे प्रसरन्ति सत्वरं,
शाखामृगाश्च मृगराजसमानविक्रमाः ॥ ६७ ॥

---

1 °पिप्रान्तच्छ° भा० । 2 °वरोपित° भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सखे बिभीषण ! तदिदानीं प्रत्युत्थानीय एवायं समरातिथिर्निशीथिनीचरनाथः । (¹इत्यभिधाय सर्वे निष्क्रान्ताः ।)

॥ इति षष्ठोऽङ्कः समाप्तः ॥

जीमूतवाहनेन च² शैलेनेव च समुन्नतिं दधतः ।
स्यादश्वराजसूनोरहिमवता हिमवता समता ॥ ६८ ॥

---

1 इत्युत्थाय सर्वे भा० । 2 च शैलेन समं समु° भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सप्तमोऽङ्कः ।

(ततः प्रविशति [1]चारपुरुषः ।)

[2]**चारपुरुषः**—समादिष्टोऽस्मि मथुराधिनाथेन महाराजलवणेन रामरावणयोः रणवृत्तान्तपरिज्ञानार्थं लङ्कागमनाय । यदसौ प्रियसुहृदं दशकन्धरमनुरुध्यमानो मान्धातृवधविरोधितेषु रघुवंशसम्भवभूपालेषु विशेषतो वैरायते । तदिदानीमस्मत्प्रभुः प्रहस्तधूम्राक्षमहोदरप्रभृतिप्रधानयातुधानवधादुत्कर्षिणं रामपक्षमाकर्ण्य विवर्णवदनः किञ्चित् कुम्भकर्णपराक्रमश्रवणेन समाश्वास्यमानमानसो विद्यते ।

क्षिप्त्वा कक्षाभ्यन्तरे वानरेन्द्रं, लङ्कामध्ये कुम्भकर्णः प्रविष्टः ।
तेनोदन्तेनामृतेनेव सिक्तं, स्वामिस्वान्तं शान्तसन्तापमास्ते ॥ १ ॥

(इति परिक्रामन् पुनः सविमर्शम्) सुष्ठुतरं च तेनैतदनुष्ठितं वीरवरिष्ठेन वज्रज्वालावल्लभेन । यतः—

वालिविरचितं कक्षानिक्षेपं रावणस्य संस्मृत्य ।
तदवरजं तदवरजः क्रुधा न्यधत्तेह तं स किल ॥ २ ॥

(पुरो विलोक्य च) सोऽयं लङ्कापुरीपरिसरः । तदिह बृहत्तरविक्रमनिधानवानरयातुधानप्रधानसमाकुलितसकललोके स्वामिना लवणेन कुम्भकर्णस्य प्रवृत्तिपरिज्ञानार्थं प्रथमप्रहितं वृकमुखं क्वाऽपि शब्दयामि । (इति तथाकरोति ।)

(प्रविश्य)

वृकमुखः—(पुरः पश्यन्) अये ! स एष प्रियसखः कार्पटिकः । वयस्य ! किमिति मामुद्दिश्य शब्दायसे ? ।

कार्पटिकः—कथं चिरयसि ? इति ।

वृकमुखः—कथमपरिज्ञातसकलप्रयोजनार्थः स्वामिनमुपतिष्ठामि ? ।

कार्पटिकः—तदावेदय मुद्गरप्रहारमूर्च्छितं सुग्रीवमादाय लङ्कान्तः प्रविष्टस्य कुम्भकर्णस्य वृत्तान्तम् ।

1-2 चर° भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

वृकमुखः—(सोद्वेगम्) सखे ! किं पृष्टेन कथितेन वा दुर्दैवविफलीकृतपराक्रमोपक्रमाणामुदन्तेन ? । तथापि यथावृत्तान्तं कथयामि—ततः सङ्घटितचैतन्यः स प्लवङ्गमपुङ्गवः सकलपौरजनस्तवनामृतसंपूर्यमाणकर्णस्य कुम्भकर्णस्य कर्णनाशिकाविनाशं विधाय सत्वरमुत्प्लवमानः पुनरेव रामनिकटं जगाम ।

कार्पटिकः—ततस्ततः ? ।

वृकमुखः—अथासावपि तथैव व्यावृत्त्य

व्यङ्गत्वं गमितः प्लवङ्गपतिना लङ्काधिराजानुजः,
क्षीबो राघवमार्गणव्रणगलद्रक्तासवेना[1]त्मनः ।
कीशांश्च क्षणदाचरांश्च गणशः कुर्वन्नुपान्तस्थितान्,
काकुत्स्थं ग्रसितुं प्रसारितमुखः संख्ये सरोषोऽभ्यगात् ॥ ३ ॥

कार्पटिकः—(सश्लाघम्) अहो ! दर्पकोपातिशयः कोऽपि कुम्भकर्णस्य । ततस्ततः ? ।

वृकमुखः—ततश्च ।

यावन्न राघवमसौ ग्रसते सशङ्के-
स्तन्मूर्ध्नि मोक्तुममरैः प्रगुणीकृतो यः ।
पुष्पाञ्जलिस्तदनु संहृतकुम्भकर्णे,
काकुत्स्थ [2]एव मुदितैर्मुमुचे स तावत् ॥ ४ ॥

कार्पटिकः—(सखेदम्) हा त्रिभुवनैकसुभट कुम्भकर्ण ! भवदवसानमाकर्ण्य सोऽस्मत्स्वा[3]मी महाराजलवणो रावणाभ्युदयविषये निराशीभविष्यति । निश्चितं महाराजरा[4]वणोऽधुना—

सीतां रामं कुम्भकर्णं च शङ्के,
लङ्केशानः संस्मरन्नेककालम् ।
चित्ते कामक्रोधशोकानलानामन्यां त्रेतामादधे स्वात्महव्यम् ॥ ५ ॥

ततस्ततः ? ।

---

1 °त्मसात् । कीशेशान् क्षण° भा० । 2 एव मुमुचे मुदितैः स भा० । 3 °मी लवणमहाराजो राव° भा० । 4 °वणोऽपि सम्प्रति—सीतां भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

वृकमुखः—ततश्च कुम्भकर्णवधामर्षितः शक्रजिदभिचारहोमेन दिव्यमजेयं रथमुत्पादयितुकामो निकुम्भि'लां प्रति प्रतिष्ठमानोऽर्द्धपथ एव लक्ष्मणेन धनुर्ज्यारावराजाज्ञया प्रतिषिद्धः ।

कार्पटिकः—ततस्ततः ? ।

वृकमुखः—ततश्च स मन्दोदरीनन्दनः कोपकम्पिताधरोष्ठपल्लवो लक्ष्मणसमीपे बिभीष²णमवलोक्य नियतमेवास्मदीयं रहस्यमिदमावेदितमनेनेति तावुभावपि प्रति अभियोद्धुमारेभे—

त्वं मे तात इवासि तत् कथमिदं शत्रोः पुरः प्रोक्तवा-
नस्मन्मर्म ? न धर्म एष महतां किं प्रश्रयेणाथवा ? ।
आः ! तिष्ठेति विभीषणे च परुषां वाचं विमुञ्चन्नसौ,
बाणालीमितरत्र च प्रणिहतः सौमित्रिणा रावणिः ॥ ६ ॥

कार्पटिकः—(सखेदम्) सखे ! तदेतदपि प्रत्यर्थिमथनैकमनोरथस्थानमात्मनो दुर्दैवेन भग्नमवगम्य किमनुष्ठितं दशकन्धरेण ? ।

वृकमुखः—तेन च प्रियपुत्रविपत्तिवार्त्ताविवर्त्तितमूर्च्छावसाने भूयस्तरामिति निवेदितम्—

वत्स ! त्वयाऽस्मि विजयी द्विभुजैकमूर्ध्ना,
मौलीन् वहन्नपि दश द्विगुणांश्च बाहून् ।
तत् किं प्रघातकुतुकावसरं विहाय,
निद्रां भवाननुभवत्यपुनःप्रबोधाम् ? ॥ ७ ॥

कार्पटिकः—ततस्ततः ? ।

वृकमुखः—तदनन्तरमुद्वेलशौर्यसागरात्ययावाहितशैवलिनीप्रवाहो बहुतराणि वानरनिकुरम्बकाणि संहरन्नुत्त्रासयन्नगणयंश्च रणाङ्गणप्रणयिनं लक्ष्मणं शक्तिप्रहारविदारितवक्षःस्थलं क्षितिमण्डले निक्षिप्य राक्षसाधिपतिर्जितकाशी पुनरेव निजनगरीं प्राविक्षत् ।

कार्पटिकः—ततस्ततः ? ।

वृकमुखः—ततश्च 'जितं जितम्' इति सानन्देषु क्रव्यादवृन्देषु 'हा ! धिक् कष्टम्' इति सशोकेषु वैमानिकलोकेषु 'भग्नं भग्नम्' इति सञ्जातदरेषु वानरनिकरेषु व्याहरत्सु—

---

1 °लां प्रविश्यमानोऽर्धनिःसृत एव दे० । 2 °णमालो° भा० ।

अद्याप्यस्मि कृतं भयेन कपयः ! शस्त्रप्रहारातुरे,
जल्पत्यल्पमिति प्रयत्य च समुत्थातुं पुनः क्ष्मागते ।
मूर्च्छामीयुषि लक्ष्मणे किल तदा श्वासक्षमाणामपा-
मप्राप्तावुपरिस्थितो रघुपतिः शोकाश्रुवृष्टिं व्यधात् ॥ ८ ॥

कार्पटिकः—(सोच्छ्वासम्) नायं लक्ष्मणस्य शक्तिप्रहारः, किन्तु मदीयहृदये पीयूषासारः ।

वृकमुखः—सखे ! कियदप्यन्तर्गतं मया रामलक्ष्मणयोः स्वरूपं स्वामिनो मनोविनोदाय पत्रपट्टे विन्यस्तमस्ति । तदवलोकयतु । (इति पट्टमर्पयति ।)

कार्पटिकः—(गृहीत्वा विलोक्य च) साधु महामते ! साधु । छायानाट्यानुसारेण मनोहरमिदमालिखितं भवता । (इति वाचयति ।)

(ततः प्रविशति शक्तिप्रहारमूर्च्छितो लक्ष्मणः, तत्समीपोपविष्टः शोकापकृष्टमानसः सुग्रीवबिभीषणाभ्यामवष्टभ्यमानो रामश्च ।)

रामः—(सकरुणम्) हा वत्स लक्ष्मण ! विमुक्तमृगाङ्क[मृगाङ्क]सङ्काशवदन ! हा वीरचक्रचूडामणे ! हा मदीयदुःखविभागैकदायाद ! किमेवंविधामवस्थामापन्नोऽसि ? । अपि च—

असदपि सर्वं सदिव त्वयि सति रामस्य काननेऽप्यासीत् ।
त्वत्सत्ताधनमधुना संसहते नो विधिस्तदपि ॥ ९ ॥

(इति मूर्च्छतीति वाचयित्वा) अहो ! धीरप्रकृतीनामपि दुर्निवारः प्रथमशोकावतारः । (इत्यभिधाय पुनर्वाचयति ।)

सुग्रीवविभीषणौ—(रामं प्रति सगद्गदम्) देव ! किमेवं विक्लवोऽसि ? पर्यवस्थापयाऽऽत्मानम् । ननु भवतः शरीरशुभलक्षणसंसूचितैर्भागधेयैः सर्वं शुभोदर्कं भविष्यति ।

रामः—(तौ प्रति सनिर्वेदम्) हे धर्मबान्धवौ ! किमेवं वत्सलताप्रतारितचित्तौ युवामलीकाश्वासनवचनपरम्पराभिः प्रचलितप्राणं मामुज्जीवयथः ? । ननु पश्यतम्—

प्राप प्राणितसंशयं रणमुखे यस्मै सुमित्रासुतः,
सर्वस्वं भवता बिभीषण ! तृणीचक्रे च य[1]स्याऽऽज्ञया ।
कीशाधीश ! निवेशितोऽसि विषमे येनाऽब्धिबन्धश्रमे,
तत् क्लीबेन जनेन तेन युवयोः क्लेशैकमूलेन किम् ? ॥ १० ॥

---

1 °स्याऽऽशया भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सुग्रीवबिभीषणौ—देव ! कथमेवमनुचितं व्याहरसि ? । यतः—

अपि प्राणपरित्या[1]गान्नाऽऽवां मन्यावहे बहु ।
त्वत्कार्ये विक्रमा[2]वासदेहायासः कियानयम् ? ॥ ११ ॥

अपि च—

उभौ युवामुभावावां सर्वेऽप्येकोदरा इव ।
पूर्वकर्मविपाकेन चत्वारोऽपि समांशिनः ॥ १२ ॥

(इति वाचयित्वा) नियतं सम्भूय कर्मणे प्रवृत्तानां बहूनामेकचित्ततैव कार्यसिद्धिहेतुः । (इत्युक्त्वा पुनर्वाचयति ।)

रामः—वयस्यौ ! यत एव चतुर्णामप्यस्माकं सुखदुःखयोः समाना वृत्तिस्तत एवाहमभिदधे—

नाऽहं लक्ष्मणमन्तरेण न युवामावां विना मां विना,
नाऽप्येते कपयो न सा जनकभूर्नाम्बा न तौ भ्रातरौ ।
दैवादेवमुपस्थितेऽखिलकुलप्राणप्रयाणक्षणे,
[3]तद् दृष्टे प्रथमं प्रवेष्टुमनले रामो चिरात्मोत्सुकः ॥ १३ ॥

सुग्रीवः—(नेपथ्याभिमुखमवलोक्य सखेदौत्सुक्यम्) कस्कोऽत्र भोः ! ? ।

(प्रविश्य)

जाम्बवान्—अयमस्मि ।

सुग्रीवः—(लक्ष्मणं दर्शयन्) आर्य ! किमत्र प्रतिविधातव्यम् ? ।

जाम्बवान्—(सोत्साहम्) वानराधिराज ! विशल्यसंरोहणौषधीसमानयनाय द्रोणाचले हनूमन्तं प्रेषयता[4] मया प्रथमतः प्रतिविहित एवायमर्थः ।

रामः—(जाम्बवन्तं प्रति) आर्य ! किमस्मदर्थे खिन्नमप्याञ्जनेयं पुनः खेदितवानसि ? ।

जाम्बवान्—देव ! मा मैवम् । यतः—

हनु[5]मान् न वेद खेदं गतागतैर्नैकशोऽपि तव कार्ये ।
सफलां प्रत्युत मनुते स्वोत्पत्तिं च स्वशक्तिं च ॥ १४ ॥

---

1 °त्यागेनाऽऽवां भा० । 2 °मायातदे° भा० । 3 तद् दृष्टिप्र° दे० । 4 °ता प्रथमं प्रति° दे० । 5 °मानविदितखेदं भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तदेतदीयमार्गमवलोकयामि । (इति निष्क्रान्तः ।)

रामः—(लक्ष्मणं निरीक्ष्य सनिःश्वासं सुग्रीवं प्रति) वयस्य किष्किन्धाधिपते !

अमुना सह बन्धुनाऽधुना, विशतोऽग्निं न हि सर्वथा व्यथा ।
न मया नृपतिर्बिभीषणः, कृत इत्येतदरुन्तुदं तु मे ॥ १५ ॥

बिभीषणः—(रामं प्रति)

विश्वालङ्कार ! किं लङ्काराज्यसिंहासनेन मे ? ।
यदुन्नततरे प्राप्ता तव चित्तासने स्थितिः ॥ १६ ॥

सुग्रीवः—(रामं प्रति)

हे प्रतीक्ष ! प्रतीक्षस्व मारुतेरागतिं ततः ।
जीवितं लक्ष्मणे सीता त्वयि लङ्का बिभीषणे ॥ १७ ॥

रामः—(दीर्घमुष्णं च निःश्वस्य) सखे शाखामृगशेखर ! दुर्लभा सम्प्रति विदेहराजात्मजा । (इत्यधोमुखस्तिष्ठति ।)

सुग्रीवः—(सावष्टम्भम्) पृथग्जन इव धीरतामधरीकरोषि—

किष्किन्धां व्रज निजबान्धवेन सार्द्धं,
चिन्तावान् किमसि ? पुरं हि तत् तवैव ।
हत्वाऽरिं यदि न ददामि देव ! तुभ्यं,
वैदेहीं तदहमहर्पतेर्न पुत्रः ॥ १८ ॥

(नेपथ्ये)

भो भोः प्लवङ्गप्रवराः ! प्रमोदध्वं प्रमोदध्वम्, यदायातः कृतकार्योऽयमञ्जनाशुक्तिमौक्तिकं संसारसागरोत्तरणमहायोगी लङ्केशकुलक्लेशप्रवेशद्वारं मारुतिः । तदिदानीम्—

सीतापतिर्विजयतां मर्मरुजामूर्मिलापतिस्त्यजतु ।
सरमापतिश्च नन्दतु रमापतिर्जायतामनृणः ॥ १९ ॥

(इति श्रुत्वा सर्वेऽपि हर्षं नाटयन्ति ।)

रामः—(सानन्दम्) कथमयमार्यजाम्बवानाञ्जनेयागमननिवेदनामृतेन पुनरस्मानुज्जीवयति ? । (इति वाचयित्वा) सखे ! किमेतावदेवात्र लिखितम् ? (इति पट्टमर्पयति ।)

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

वृकमुखः—(पट्टं गृहीत्वा) वयस्य ! अतः परमतिहृदयोद्वेगजनकमिति न लिखितम् ।

कार्पटिकः—(सविमर्शम्) नूनमञ्जनातनयेनोज्जीवितः सुमित्रासुतः । तदनन्तरं च किमभूत् ? ।

वृकमुखः—

[.... ....,
....] तत्पौरुषं व्याहरन् ।
यत् तस्याप्यरतिप्रदं न च मदस्पर्शेन यद् दूष्यते,
तेजस्तद् दधदिङ्गितैरनुमितं रामस्य रङ्गे स्थितः ॥ २० ॥

कार्पटिकः—ततस्ततः ? ।

वृकमुखः—ततश्च कृतपर्यङ्कबन्धं पक्षद्वयोपविष्टेषु वानरराक्षससुभटेषु, समरावलोकनकुतूहलोत्तानितलोचनेषु वैमानिकजनेषु, 'किं भविष्यति ?' इत्याकुलस्विन्नभालेषु दिक्पालेषु, स्वस्त्ययनसूक्तजपनिपुणे देवमुनिगणे, मन्दीकृतस्पन्दनप्रसरे भगवति भास्करे, दुर्विनीतनिजप्रपौत्रवधप्रतिविधातरि देवे विधातरि, शिथिलितसमाधिमुद्रे स्वामिनि रुद्रे च, परस्परमेकसुरभिसम्भोगाभिलाषयोर्वरवृषभयोरिव, एकानोकहच्छायाश्रयणगजयोर्मत्तमतङ्गजयोरिव, एकगुहासङ्ग्रहणबद्धाग्रहयोर्दृप्तसिंहयोरिव रामरावणयोरेकस्त्रीकारणा रणप्रवृत्तिरासीत् ।

कार्पटिकः—सखे ! धन्योऽसि येन तत् तादृशं समरकौतूहलमवलोकितम् । ततस्ततः ? ।

वृकमुखः—ततश्च

हुङ्कारैः प्रतिपर्वतप्रतिरवस्फारैर्दशानां दिशा-
माशङ्कातिशयं दिशन् दशमुखः क्रोधेन रज्यन्मुखः ।
रामं वामकरावलम्बितध'नुर्मौर्वीगुणाकर्षण-
क्रीडद्दक्षिणपाणिपद्ममभिनन्निश्छद्मशूरः शरैः ॥ २१ ॥

कार्पटिकः—ततस्ततः ? ।

वृकमुखः—ततश्च—

पश्चात्पतत्सु विशिखाहतिभिः शिरस्सु,
दर्पोदयेन तु पदेषु पुरःसरत्सु ।

---

1 °नुर्दण्डगुणाक° दे० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

निर्व्याजविक्रमनमस्यतमस्य तस्य,
रामश्चकार निधनं प्रथनाभिरामः ॥ २२ ॥

कार्पटिकः—(श्रुत्वा सखेदम्) हा लोकत्रयैकवीर ! हा रणाङ्गणावगणितसुनासीर ! हा विजयलक्ष्मीविलासावास ! हा दिग्दन्तिदन्तदलनोज्ज्वलीकृतचन्द्रहास ! हा निरहङ्कारीकृतसकलनिर्जरसमाज ! हा लङ्काधिराज[1] ! तवापि मनुष्यकृतमवसानं श्रूयते ? । (इति शोचति ।)

वृकमुखः—सखे ! यथात[2]थाऽपि मरणधर्मिणि मर्त्यलोके किमयमेवमनवद्यविक्रमः शोच्यते ? यस्य[3] तदानीमपि—

तद् दूरेऽस्तु यदस्य राक्षसपतेर्वीक्ष्येदमत्यद्भुतं,
युद्धं वज्रधरः पराजयमयीं तत्याज लज्जां निजाम् ।
कृत्वा यस्य च [4]दुर्दमस्य दलनं सोऽपि त्रिलोकीभट-
श्रेणीमौलिमणिर्घुणाक्षरसमं मेने रघूणां पतिः ॥ २३ ॥

कार्पटिकः—भवतु । ततस्ततः ? ।

वृकमुखः—ततश्च तथाविपन्नस्य[5] राक्षसपतेरग्निसंस्कारं प्रति मन्दायमानं बिभीषणं दाशरथिरित्यवादीत्—सखे ! न खलु कुलाचारः परिहर्तव्यः । तदस्य ज्ये[6]ष्ठभ्रातुर्दशकण्ठस्य ममयसदृशमनुष्ठीयताम् । यतः—

प्राणापहारान्तमुशन्ति वैरं, निर्यातितं तत्सुहृदा त्वयैव ।
तत्साम्प्रतं ते स यथा तथा मे, कालोचितं तत् क्रियतां तदस्य ॥ २४ ॥

(अथ विहितराव[7]णौर्द्ध्वदेहिकेन विभीषणेन हनूमता च रामाज्ञया प्रसाधितशरीरा सीता तत्समीपमानीता ।)

कार्पटिकः—ततस्ततः ? ।

वृकमुखः—ततश्च—

दृष्ट्वा चिराद् दयितमस्तसमस्तखेदा,
मत्वाऽन्यथा तमथ भीतिमती च सीता ।
स्वेनैव राक्षसगृहस्थितिदोषशङ्का-
शान्त्यर्थमर्थयति वह्निनिवेशदिव्यम् ॥ २५ ॥

---

1 °ज ! हा रावण ! त° दे० । 2 °था वा म° भा० । 3° स्य इदा° दे० । 4 दुर्मदस्य भा० । 5 °स्य यातुधानाधिपते° भा० । 6 °ष्ठस्य भ्रा° भा० । 7 °णस्यौर्ध्व° भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तदनन्तरं रामभ्रूसं[1]ज्ञाप्रेरितैः प्लवगवृन्दैरानीयमानेषु दारुनिकरेषु भवदाह्वानमाकर्ण्य सोऽहमिहाऽऽयातवान् ।

(नेपथ्ये)

भो भोस्त्रिभुवननिवासिनः पुरुषाः ! सेयं लज्जावती जन[2]कराजात्मजा लक्ष्मणमुखेनेदमभि[3]धत्ते—

मातर्मेदिनि ! देव दीधितिपते ! सर्वेऽप्यधीशाः ! दिशाम्,
एषा विज्ञपयामि वः शृणुत हे विज्ञाः ! प्रतिज्ञामिमाम् ।
कौशल्यासुतमन्तरेण मम यद्यन्योऽपि कश्चित् पुमां-
श्चित्ते कर्मणि वाचि वाऽस्ति तदयं वह्निर्दहत्वाशु माम् ॥ २६ ॥

वृकमुखः—(श्रुत्वा) कदाचिदियं प्रविशति हुताशने सीता ।

कार्पटिकः—(नेपथ्याभिमुखं दर्शयन्) ननु प्रविष्टैव । तथाहि—

हाकारगर्भितमुखेषु वलीमुखेषु,
वैमानिकेषु नयनोदकमुत्सृजत्सु ।
व्योमाङ्गणाक्रमणकौतुकदत्तफालं,
ज्वालाकलापमवलोकय पावकस्य ॥ २७ ॥

वृकमुखः—अतिहिदारुणमिदमाचरितं रामभद्रेण । (पुनराकाशे)

दिष्ट्या मुञ्चत पुष्पवृष्टिममरास्तारापथस्थायिनः !,
प्रीतिं पुष्यतु दिव्यदुन्दुभिरवस्तूर्णं च कर्णद्वये ।
पुष्पाणामपि ताडनं न सहते मृद्वी यदीया तनु-
र्वैदेही द[4]हनेऽपि साऽद्य निहिता शुद्धा न दग्धा यतः ॥ २८ ॥

अपरं च—

श्लाघ्यः स राघवयुवा प्रबभूव यस्य,
न न्यायनिष्ठुरतरे हृदि पुष्पचापः ।
वन्द्या च सा जनकभूरनलप्रवेश-
भीतिं जिगाय निजशीलबलेन याऽसौ ॥ २९ ॥

---

1 °संज्ञया प्रे° भा० । 2 °नकसुता ल° भा० । 3 °भिदधे—मात° भा० । 4 दहनं प्रविश्य निरगाच्छुद्धा भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कार्पटिकः—(श्रुत्वा) सखे! [1]शुद्धैव तावदवनिसुतेयम्। तदिदानीं किमपरेण?। गच्छतु भवान् मथुरायाम्। अहं पुन[2]रग्निविशुद्धां वैदेहीमवलोक[3]यामि। (इति परिक्रामति।)

(वृकमुखो निष्क्रान्तः।)

(ततः प्रविशति कृतनीरङ्गिकां चरणाङ्गुष्ठनिविष्टदृष्टिं सीतामुत्सङ्गे वहन् वैश्वानरो विभीषणसुग्रीवसहितौ रामलक्ष्मणौ हनुमांश्च।)

वैश्वानरः—(रामं प्रति)

इयं मूर्त्यन्तरेण श्रीरियं तीर्थं हि [4]जङ्गमम्।
भूयोऽपि वत्स! वैदेहीं देहार्द्धे तदिमां कुरु॥ ३०॥

(इति सीतामर्पयति।)

रामः—(सप्रमोदप्रश्रयमञ्जलिं बद्ध्वा मौलिकमले विनिवेशयन्) यदादिष्टं विष्टपैकगुरुणा तत् तथा समर्थितमेव।

(सर्वेऽपि रामसमीपस्थितां सीतामवलोक्य हर्षं नाटयन्ति।)

कार्पटिकः—(सीतां निर्वर्ण्य) अहो! काऽपि कमनीयता विदेहदुहितुः। तथाहि—

मन्ये महानन्दपदं तदेतन्नितम्बबिम्बं शशिबिम्बमुख्याः।
यस्मिन्नवस्थाय तथाहि सुस्थैर्नेत्रैः पुनर्नाऽऽववृते नराणाम्॥ ३१॥

(पुनः सेर्ष्यम्) तदहमयोध्यामपि गत्वा निजनायकाभिप्रायवेदी यथा तथा वा दाशरथीनामपकर्तुं प्रयतिष्ये। (इति निष्क्रान्तः।)

हनूमान्—(सीतामुद्दिश्य दैवं प्रति सोपालम्भम्)

यस्याः सच्चरितं त्रयेऽपि जगतां जागर्त्ति भर्त्ताऽयम-
प्यस्थानस्खलिताभिशङ्किहृदयः प्रत्येति [5]यां सर्वदा।
साक्षात् साक्षिणि मय्यशोकवनिकावृत्तान्तविज्ञे स्थिते,
साऽप्यग्नावितराङ्गनेव निदधे दुर्वेधसा शुद्धये॥ ३२॥

सुग्रीवः—अयि पवननन्दन! स्थाने भवान् दैवमुपालब्धवानसि।

(आकाशे)

---

1 शुद्धा तावदवनिसुता। त° भा०। 2 °नरपि विशु° भा०। 3 °कयिष्यामि भा०। 4 जीवितम् भा०। 5 यस्यां सदा दे०।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

वत्स दशकन्धरवधोन्मूलितत्रिलोकीहृदयशल्य ! कौशल्यासरसीसरोरुह ! यदिदं वत्साया विदेहदुहितुः सच्चरितं त्रिभुवनाभ्यन्तरवर्त्तिना धूमध्वजेनाभिहितं तत् [1]तथैव मन्यताम् ।

(सर्वे श्रुत्वा सविस्म[2]यमालोकयन्ति ।)

रामः—कथमयं भगवान्[3] ऋभुचक्रवर्त्ती सङ्क्रन्दनो मदनुग्रहाय तातदशरथेन समं द्वित्राभिश्चामरहस्ताभिरप्सरोभिर्वीज्यमानो विमानस्थित इत एवाभिवर्त्तते ? ।

(ततः प्रविशति यथानिर्दिष्टो वासवो राजा दशरथश्च ।)

रामः—(वासवं प्रति सप्रश्रयम्) [4]देवदेवाधिदेव ! पौलोमीपते ! दशरथसूनुरयं रामभद्रोऽभिवादयति । (इति वासवं प्रणम्य दशरथं प्रणमति ।)

☞ [5](सर्वे वासवं प्रणमन्ति ।)

(सीता उभौ प्रणम्य लज्जावती रामान्तरिता तिष्ठति ।)

दशरथः—(रामं प्रति) ←

एषा वधूर्वत्स ! कलङ्कपङ्कं, नवेन्दुलेखेव न जातु धत्ते ।
शक्रप्रसादाच्च भविष्यतीयमपत्यमुक्ताफलताम्रपर्णी ॥ ३३ ॥

रामः—(सहर्षम्) महान् प्रसादः । (इति शिरस्य[6]ञ्जलिमारोपयति ।)

वासवः—(रामं प्रति) वत्स दाशरथे ! श्रूयतामपरमपि एतस्याः क्षितिदुहितुर्विषमतरमवस्थान्तरम्—

भवद्गीता सीता[7] द्रुतमविशदग्नावथ परः,
पुमान् संस्पृष्टोऽसाविति चकितचित्ता भृशमभूत् ।
त्यज त्रासं वत्से ! गुरुरिव त[8]वायं च भगवा-
निति स्वाहावाक्यात् पुनरभव[9]दाश्वस्तहृदया ॥ ३४ ॥

अपरमप्याकर्णय व्याहरणकारणम् ।

रामः—(सप्रश्रयम्) समादिशतु देवः ।

वासवः—ककुत्स्थकुलतिलक !

---

1 तथेति म° भा० । 2 °यमवलो° भा० । 3 °न् त्रिभुवनचक्र° भा० । 4 देवाधिदेव ! दे० । 5 हस्तचिह्नान्तर्गतोऽयं पाठः दे० नास्ति । 6 °ञ्जलिमर्पयति भा० । 7 °ता हुत° दे० । 8 °वाऽऽयाहि भ° भा० । 9 °दाश्वस्थहृ° दे० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

वैदेहेन समाधिनाधितपुनर्देहग्रहेणाऽऽग्रहः,
सर्वस्तेन निरस्त आत्मदुहितुः स्नेहानुबन्धं विना ।
तामात्मीयकृतां पिशाचपतिना जातोऽस्ति जीवन्मृतः,
श्रुत्वाऽग्नौ निहितां सतीमपि ततः प्राणानसौ हास्यति ॥ ३५ ॥

वैश्वानरः—(रामं प्रति) वत्स राम ! श्रुतं यदादिष्टं त्रिविष्टपाधिपेन ? । तद-विलम्बितमेव कोऽपि विपुलमतिस्त्वरितगतिश्च मिथिलाधिनाथप्रतिबोध[1]नाय प्रहीयताम् ।

सीता—(श्रुत्वा मन्दाक्षरम्) हा[1] ताद ! अज्ज वि अहं ज्येव जीविदसंदेहदाइणी संवुत्त म्हि ? । (इति रुदन्ती हनुमन्मुखमवलोकयति ।)

हनूमान्—(सीताभिप्रायमवगम्य) देवि ! कृतमनिर्वृत्या । द्रुततरमहमेव गत्वा जनकमहाराजमानन्दयिष्यामि । (इति निष्क्रान्तः ।)

लक्ष्मणः—(हनूमन्तं गच्छन्तमवलोक्य सशिरःप्रकम्पमाकाशे)

मन्ये रामाय निर्माय स्रष्टः ! कष्टशतं त्वया ।
अनुशय्य कृतोऽयं तत्प्रतिकाराय मारुतिः ॥ ३६ ॥

वासवः—वत्स रामभद्र ! तदेतदप्यस्तु—

ये वानराः संयति तावकीनाः, कीनाशवेश्मातिथयो बभूवुः ।
जीवन्तु ते रोगजराविमुक्ताः, युक्ताः श्रिया सन्तु च मत्प्रसादात् ॥ ३७ ॥

(इत्यभिधाय दशरथेन सह तिरो[2]दधे ।)

रामः—(विलोक्य) कथमयमस्मासु मनोरथादप्यधिकतरं प्रसादफलमारोपयन्नप्रत्यक्षः संवृत्तो भगवान् सहस्राक्षः ? ।

वैश्वानरः—(रामं प्रति)

दशवदनविनाशाद् दिक्पतीनां दशानां,
दशरथसुत ! चक्रे दुर्दशान्तस्त्वया तत् ।
दशशतकरचक्षुःशीर्षदत्ताशिषस्ते,
दश तु भुजभुजङ्गः सङ्गरस्थानरातीन् ॥ ३८ ॥

(इत्युक्त्वा निष्क्रान्तः ।)

---

१ हा तात ! अद्यापि अहमेव जीवितसन्देहदायिनी संवृत्ताऽस्मि ? ।

---

1 °नार्थं प्र° भा० । 2 °रोधत्ते भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

विभीषणः—(नेपथ्याभिमुखमवलोक्य) कथमयमवन्ध्यनामा वृद्धामात्यः सत्वरमिहागच्छति ? ।

(ततः प्रविशत्यवन्ध्यः ।)

अवन्ध्यः—(रामं प्रणम्य सविनयम्) देव ! विज्ञपयन्ति प्रकृतिपुरुषाः–प्रगुणीकृता खल्वसौ लङ्काधिराज्यसिंहासनाध्यासनसामग्री, तदनुज्ञानातु देवः कुमारविभीषणमभिषेकग्रहणाय ।

रामः—(विभीषणं प्रति) सखे ! सफलीक्रियतामियं कुलपुरुषप्रार्थना ।

विभीषणः—(पाणी सम्पुटीकृत्य) स तावदतिवाहितो दशरथादिष्टो वनवासव्रतावधिः । तदिदानीमत्रैव तत्रभवति [1]देवे स्वीकृते साकेतसाम्राज्याभिषेके पश्चान्ममापि लङ्काधिपत्यप्रतिष्ठा समुचिता भवति ।

रामः—सखे राक्षसराज ! नेदमयुक्तम् । तथापि पश्यतु भवान्—

धत्तेऽधुनाऽपि भरतः पटलं जटाना-
मश्रुच्छटाछुरितनेत्रपुटाः सविन्ध्यः ।
नास्मद्गुरुश्च मुनिरत्र तदेष पात्रं,
राज्यश्रियः प्रथमतोऽपि कथं भवामि ? ॥ ३९ ॥

विभीषणः—देव ! तर्हि कपीश्वरसुग्रीवकुमारलक्ष्मणयोर्मया समं लङ्का[2]गमनानुज्ञाप्रसादोऽस्तु । अपरेऽप्यङ्गदजाम्बवदादयो वनभवनमुख्या मदीयसत्कारग्रहणार्थं समादिश्यताम् ।

रामः—भवत्वेवम् ।

सुग्रीवः—(रामं प्रति) देव ! लङ्केश्वरसत्कारग्रहणादनन्तरं सर्वेषामपि वानराच्छभल्लमल्लानां निजनिजदेशं प्रति प्रस्थापनादेशो भवतु ।

रामः—(क्षणं विचिन्त्य) सखे सुग्रीव सूर्यसम्भव ! ते खलु स्वस्थानगमनोत्सुकाः शाखामृगा मद्वचसैवं सम्भाव्याः—

युष्माभिर्यदुपकृतं न तस्य पश्यामि निष्क्रयं क्वापि ।
तदहो वानरवीराः ! बहुमन्तव्यो मम स्नेहः ॥ ४० ॥

सुग्रीवः—यदादिशति देवः । (इति रामानुमतलक्ष्मणसुग्रीवाभ्यां सह विभीषणो निष्क्रान्तः ।)

---

1 देवीस्वीकृतिसाम्रा° भा० । 2 °गमानु° भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

रामः—(सीतां करे गृहीत्वा) प्रिये ! मयैवं दुर्विकल्पवता भृशं क्लेशिता भवती।

सीता—[1]णं खु अज्जउत्तेणं, अत्तणो दिव्वेण। (इति रोदिति ।)

रामः—(सीताबाष्पमुन्मृज्य)

विप्रयोगे[1]ण शुष्काऽपि स्नेहेनोपचिताऽपि मे ।
नोषर्बुधेन दग्धाऽसि ध्रुवं मत्कृपया प्रिये ! ॥ ४१ ॥

अपि च—

म्लानं प्रिये ! माल्यमपि त्वदीयं, न वह्नितापेन सुदुःसहेन ।
पतिव्रतामप्यवजानतस्त्वां, मनोऽनुतापेन तु तप्यते मे ॥ ४२ ॥

सीता—(संस्कृतमाश्रित्य)

निष्कारणं विगणिता किमियं मयेति,
मा भूर्विषादभवनं भुवनैकवीर ! ।
दैवेन केनचिदहं दहने यदस्ता,
निस्तारिता तु भवतैव हृदि स्थितेन ॥ ४३ ॥

रामः—देवि ! सदृशमिदं क्षमासम्भवत्वस्य । [2]अपि च—

अप्येकं दधदानन्दं भवत्संयोगसम्भवम् ।
अद्य वेद्मि स्वमुत्कृष्टं शतानन्दादपि प्रिये ! ॥ ४४ ॥

(नेपथ्ये)

देव दिवाकरकुलैकललाम राम ! तदिदं पुष्पकाभिधानं विमानमधिरुह्यतामयोध्यागमनाय।

रामः—(श्रुत्वा) कथमसौ विभीषणो व्याहरति ? । देवि ! तदेनमभिनवभूपालमभ्युत्थानेन सम्भावयामि ।

(इति निष्क्रान्ताः सर्वे)

॥ इति सप्तमोऽङ्कः समाप्तः ॥

धा[3]त्री प्रभूतधान्या यद्यपि वसुमानसौ च सविताऽस्ति ।
पालयति वस्तुपालः प्रजाः क्षुधा बाधितास्तदपि ॥ ४५ ॥

---

१ न खलु आर्यपुत्रेण, आत्मनो दैवेन ।

---

1 °ण युक्ताऽपि दे० । 2 अपरं च भा० । 3 दे० आदर्शे नास्त्ययं श्लोकः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अष्टमोऽङ्कः ।

(नेपथ्ये)

जयतु जयतु रामः क्षेमकृद् विष्टपाना-
मनिशमयमभीष्टां लक्ष्मणोऽभ्येतु लक्ष्मीम् ।
भवतु च भुवि सीता स्फीतकीर्त्तिः, शुभानां
भवनमपि कपीन्द्रः कोणपेन्द्रश्च भूयात् ॥ १ ॥

देव दाशरथे ! सोऽयं दि[1]व्यचारणगणस्त्वदीयदर्शनेन कृतार्थीकृतः सम्प्रति निजनिजस्थानगमनाय भवन्तमापृच्छते । यतः—

लोचनेन तव चारुपक्ष्मणा, लक्ष्मणाग्रज ! निरीक्षितोऽद्य यः ।
सम्मदेन महता स्वमुत्तमं, मन्यते स्म शतमन्युतोऽपि सः ॥ २ ॥

(ततः प्रविशति विमानस्थितो रामः सीतालक्ष्मणविभीषणसुग्रीवाश्च ।)

विभीषणः—(पुष्पकं प्रति)

हे विमान ! पवमानमपि त्वं, पङ्गुतां गमयदात्मजवेन ।
भास्कराभिजनसम्भवभूपायत्तपत्तनसमीपमुपेहि ॥ ३ ॥

(इति सर्वे विमानोद्गतिं नाटयन्ति ।)

रामः—देवि ! जनकराजात्मजे !

विमानं व्योमाग्रे व्रजति निजमाणिक्यनिकर-
प्रभापीतप्रद्योतनक[2]रवरत्राभृतमिव ।
इहस्थाः पश्यामः सुमुखि ! नखलव्यानुडुगणान्,
गिरीन् मुष्टिग्राह्यान्, प्रसृतिपरिमेयांश्च जलधीन् ॥ ४ ॥

(ऊर्ध्वमवलोक्य च) अमुं नितान्तमासन्नतरं भगवन्तमु[3]द्भासितत्रिभुवनालोकमुपश्लोकयामि । (अञ्जलिं बद्ध्वा)

---

1 दिव्यवानरगणः भा० । 2 °करचरित्रामृतमिथः दे० । 3 °द्भावित° भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पुष्णातु प्रमदं प्रभुः स भवतामुष्णद्युतिर्यत्कृपा-
दृक्पातामृतसारणिप्रणयिनि क्ष्मालोकलीलावने ।
आविर्भूतनवाङ्गुलीकिशलयाः सुच्छायतां बिभ्रतः,
शोभन्ते मनुजद्रुमाः द्रुततरं रोगाग्निरुग्णा अपि ॥ ५ ॥

सीता—(सूर्यं प्रणम्य रामं प्रति) [१]अज्जउत्त ! कहिं स वाणररक्खसाणं पाणावसाणकरो संगरो संवुत्तो ? ।

रामः—(अङ्गुल्या निदर्शयन्)

तामेतां विद्धि युद्धावनिमवनिसुते ! [1]यत्र नक्तञ्चराणा-
मक्षीणैः शोणितौघैरयमजनि महानष्टमः स्पष्टमब्धिः ।
यन्मध्ये स्वल्पमध्ये ! कपिकुलदलितानन्तदन्तीन्द्रदम्भा-
ज्जम्भारातेर्भयेन स्थित इव निवहः सर्वतः पर्वतानाम् ॥ ६ ॥

लक्ष्मणः—(सीतां प्रति) देवि दशरथस्नुषे ! परिभाव्यतामितः—

उज्जीवि[2]तगतवानररिक्तार्द्धोऽयं समिन्महीमूर्द्धा ।
कचमेच[3]कमृतराक्षसखचितार्द्धो भाति खलतिरिव ॥ ७ ॥

(सीता दृष्ट्वा स्मयते)

सुग्रीवः—(रामं प्रति) स्मरति देवो यदत्र तैर्दारुणात्मभिराचरितम् ? ।

रामः—सखे ! कृतममुना वृत्तान्तेन ।

सीता—[२]अज्जउत्त ! केण कारणेण एस वाणरे[4]सरो जंपंतो णिवारीयदि ? ।

रामः—(सवैलक्ष्यम्) प्रिये ! श्रूयताम् । इह हि—

मायाकृतामपि मृगाक्षि ! मृतिं त्वदीयां,
सत्यां विदन् न सहसैव मृतोऽस्मि यस्मात् ।
व्रीडाजडस्तदहमेष मृषानुरक्तः,
शक्तो न दर्शयितुमात्ममुखं पुरस्ते ॥ ८ ॥

---

१ आर्यपुत्र ! कुत्र स वानरराक्षसानां प्राणावसानकरः सङ्गरः संवृत्तः ? ।
२ आर्यपुत्र ! केन कारणेन एष वानरेश्वरः जल्पन् निवार्यते ? ।

---

1 यत्र रात्रिञ्च° भा० । 2 °तवानरैरिह रिक्तार्द्धेयं दे० । 3 °कराक्षसानां खचितार्द्धा भा० दे० । 4 °सरो वज्जरंतो णि° भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सीता—[1]अज्जउत्त ! एसो वि जणो इत्थ समाणावराह ज्येव ।

रामः—(विमृश्य) प्रिये ! कदाचिदस्मदीयमपि कृतविलूनं शिरस्तवाग्रे तैर्दुरात्मभिर्दर्शितं भविष्यति ।

सीता—(सगद्गदम्) [2]अज्जउत्त ! किं तुयं तुम्हाणं पुरओ पिच्चरिमि ?। (शिरस्यञ्जलिं बद्ध्वा) णमो पियसहीए तिजडाए, जीए तया तेहिं तेहिं पच्चायणावयणेहिं समस्सासिय समस्सासिय पुणो वि अ अज्जउत्तमुहयंददंसणचरी कद म्हि ।

रामः—(अन्यतो दर्शयन्)

अस्मिन्निन्दुमुखि ! स्थले छलविदा पुत्रेण लङ्कापते-
रस्मद्बन्धनिबन्धनानि फणिनः फूत्कारिणः प्रेषिताः ।
ध्यातायातपतङ्गपुङ्गवभयान्नेशुर्निगूढं च ते,
निन्दन्तो निजमौलिमण्डनमणिश्रेणीप्रकाशं निशि ॥ ९ ॥

(पुनरन्यतो दर्शयन्) प्रिये ! शृणु वार्त्तान्तरम् । इह हि—

दैवात् तत्र जगत्त्रयैकसुभटे दर्पोत्कटेन्द्रद्विप-
क्षोदोन्मादसमेतचेतसि गते मोक्षाय रक्षःपतौ ।
बाष्पैर्बन्धुविपत्तिशोकगलितैः शान्तप्रकोपानलः,
क्रन्दन्नेष विभीषणः[1] सकरुणं सास्रं व्यधान्मामपि ॥ १० ॥

लक्ष्मणः—(रामं प्रति) देव !

कारणविकृतोऽपि पुनः प्रकृतिं प्रतिप[2]द्यते जनः स्निग्धः ।
सलिलं [3]वह्नेस्तापात् तप्तं पुनरेति शीतत्वम् ॥ ११ ॥

रामः—(दूरतो दर्शयन्) देवि ! [4]वसुन्धरासम्भवे ! दृश्यतामिदमस्मदीयपूर्वपुरुषस्य सगरचक्रवर्तिनः पूर्त्तधर्मनिर्माणम् ।

अम्भोधिर्भगवानयं जयति यः कल्पान्ततल्पं हरे-
र्यच्छेपाकुसुमोपमं पशुपतिर्धत्ते विधुं मूर्द्धनि ।

---

१ आर्यपुत्र ! एषोऽपि जनः अत्र समानापराध एव ।

२ आर्यपुत्र ! किं युष्मान् युष्माकं पुरतः कथयामि ? (?)। नमः प्रियसख्यै त्रिजटायै, यया तदा तैस्तैः प्रत्यायनावचनैः समाश्वास्य समाश्वास्य पुनरपि आर्यपुत्रमुखचन्द्रदर्शनचरी कृताऽस्मि।

---

1 'षणोऽतिक' भा० । 2 'द्यते सुश्रीः स्नि° भा० । 3 °रतापादपास्तमभ्येति भा० । 4 वसुधासम्भ° भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

यद्वृत्तामृतहन्तकारकवलोन्मत्तः पतिः स्वर्गिणां,
यज्जातद्रुमकानने विहरति स्त्रैणेन यज्जन्मना ॥ १२ ॥

तत् प्रणम्यतामसौ ।

(सीता तथाकरोति ।)

विभीषणः—(रामं प्रति) देव ! परिभाव्यताम्—

वृद्धस्य वारिधेस्तस्य पोतैर्दत्तं प्रतारितैः ।
जनो गृह्णाति धूर्तोऽयमप्यन्तःस्थगितं वसु ॥ १३ ॥

रामः—(स्मृत्वा) सखे कोणपाधिप ! क्वचिदमर्त्त्यभावेऽपि मर्त्यधर्मव्यवहारो दृश्यते । तथाहि—

गङ्गा समुद्रदयिता धृता हरेणाऽस्य सोऽप्यदत्त विषम् ।
इत्याततायिभावः परस्परेणोभयोरभवत् ॥ १४ ॥

(समन्तादवलोक्य सीतां प्रति)

जम्बूद्वीपस्याभितो वर्त्तमानश्चक्राकारः सागरोऽयं चकास्ति ।
यत्सम्पृक्ता वाहिनीनां प्रवाहाः, शोभामन्तः सुभ्रु ! बिभ्रत्यरीणाम् ॥ १५ ॥

सीता—(पुरो विलोक्य) [1]अज्जउत्त ! किं णेदं सागरसिरीए सीमंतसरिच्छं पिक्खीयदि ? ।

रामः—(दृष्ट्वा)

रक्षोराजस्यायमुत्पातकेतुः,
कीर्त्तिस्थानं शाश्वतं कीशनेतुः ।
त्वद्वक्त्रेन्दुप्रेक्षणानन्दहेतुः,
सीते ! साक्षाद् [1]दृश्यते सिन्धुसेतुः ॥ १६ ॥

(सीता सेतुं प्रणमति ।)

रामः—देवि ! सम्पादनसमयसमुद्भूतसम्भ्रमस्य तस्य तुषारशिखरिसूनोरवस्थाविशेषमेवं सम्भावयामि—

---

१ आर्यपुत्र ! किमिदं सागरश्रियाः सीमन्तसदृशं प्रेक्ष्यते ? ।

---

1 लक्ष्यते भा० ।

क्षिप्तानां जलधिजले प्लवङ्गवृन्दैः,
शैलानां कुलसुहृदां परःशतानाम् ।
प्रत्येकं कुशलकथानुयोगखिन्नं,
मैनाकः कलयति नूनमात्मकण्ठम् ॥ १७ ॥

लक्ष्मणः—(रामं प्रति) आर्य ! स एष दर्शनमात्रपवित्रीकृतत्रिलोकीलोकः सरस्वतीसागरसङ्गमः प्रणम्यताम् इति ।

(सर्वे तथाकुर्वन्ति ।)

सुग्रीवः—(विमृश्य) नियतं भगवत्याः पितामहदुहितुः सन्निधानादौर्वे सर्वमपि ज्योतिषि सञ्चक्रमे । तथाहि—

स मकरराशिरुदन्वान् सरस्वती मीनराशिमती ।
सम्बन्धमुचितमनयोर्मत्वा किल वाडवश्चक्रे ॥ १८ ॥

विभीषणः—अपरमप्यहमेवं वितर्कयामि—
नूनं प्रभूतास्वपि वाहिनीषु, कलिन्दकन्यां बहुमन्यतेऽब्धिः ।
यद् भूरिभार्यैर्गृहिभिः सवर्णा, कार्या विशेषप्रतिपत्तिपात्रम् ॥ १९ ॥

रामः—(सीतां प्रति) स एष महेन्द्रनामा महीधरः पुरतो दृश्यते—
सम्पातिः क्षितिपक्षतिः स पतगस्तापेन तिग्मद्युते-
र्यत्रोवास वनौकसामनशनक्लिष्टात्मनां यः पुरा ।
त्वां सन्दर्श्य दशाननाश्रयगतां प्राणान् दिशन्नाप्तवा-
नत्रामुत्र च सद्गतिं नवभवत्पिच्छौघपुण्यौघवान् ॥ २० ॥

सीता—[1]अज्जउत्त ! को एस संपाइणामा पक्खिप्पवरो ? ।

रामः—देवि ! श्रूयताम्—
तस्याग्रजः खगभटस्य जटायुषोऽयं,
रे ! तिष्ठ रे ! न भवसीति वचः प्रजल्पन् ।
हृत्वा छलेन भवतीं व्रजतस्तदानीं,
लङ्कापतेरशकुनं शकुनिश्चकार ॥ २१ ॥

---

१ आर्यपुत्र ! क एष सम्पातिनामा पक्षिप्रवरः ? ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सीता—(स्मृत्वा सगद्गदम्) णमो[1] तस्स महाभायस्स दहरहसरिच्छस्स जणयसरिच्छस्स वा ।

लक्ष्मणः—(रामं प्रति) परिभाव्यतामितः—

किष्किन्ध इत्यभिधया धरणीधरोऽयं,
यस्मिन् स वासविरुवास कपिप्रवीरः ।
सा चण्डभानुतनुजप्लवगप्रकाण्ड-
शक्तिर्यदीयभुजदण्डबलानुकल्पा ॥ २२ ॥

रामः—(सशिरःप्रकम्पम्) वत्स ! वचनागोचरस्तस्य वालि[1]नः सङ्क्रन्दननन्दनस्य पौरुषप्रकर्षः । तथाहि—

निबिडनिपीडननिगडितमुखनाशाश्वासदुःस्थितः तस्थौ ।
स जगज्जयी नृचक्षाः कक्षाकुहरे हरेर्यस्य ॥ २३ ॥

सुग्रीवः—(रामं प्रति सविनयम्) देव ! सेयं प्रत्यासन्ना भवदीयप्रसादसम्पादिता मदीयराजधानी । तदियमिदानीमानीयतां प्रमोदातिशयं प्राघूर्णकग्रहणव्यपदेशागतस्य देवस्य दर्शनेन ।

रामः—(सीतां दर्शयन्) सखे ! किमस्माकमियताऽपि प्राघूर्णकेन कृतेन न सन्तुष्यति प्रियवयस्यः ? ।

(सुग्रीवो लज्जां नाटयति ।)

☞ [2]**रामः**—वयस्य ! किमपि प्रार्थनीयमस्ति ।

सुग्रीवः—देव ! नियो[3]जनीये जने का नाम प्रार्थना ? । समादिश्यताम् । ←

रामः—वयस्य प्लवगपते ! मम वालिव्यापादनवाच्यताऽपनोदार्थं तत्सूनुरङ्गदोऽयं युवराजपदेऽभिषेक्तव्यः ।

सुग्रीवः—देव ! मया भवदभिप्रायमवगच्छता प्रथमतोऽपि समर्थित एवायमर्थः ।

लक्ष्मणः—(सीतां प्रति) देवि विदेहराजात्मजे ! सोऽयं सुरसुन्दरीसम्मोहसम्मदसम्पादनकल्पो माल्यवान् नामा पर्वतः प्रेक्ष्यते । यत्र पयोदागमसमयरमणीयतमे भवद्विरहविधुरेण देवेन दाशरथिना किं नाम नाऽऽचरितम् ? । तथाहि—

---

१ नमस्तस्मै महाभागाय दशरथसदृशाय जनकसदृशाय वा ।

---

1. °लिनाम्नः सङ्क° भा० । 2 दृश्यतां पत्रं १५ टिप्पणी २ । 3 नियोज्ये जने भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

आर्येण मोचादलकोमलेन, विमुञ्चता बाष्पजलं सशब्दम् ।
नवाम्बुवाहाऽनुकृतिः कृताऽन्या, तडित् तु न त्वं स्फुरिताऽस्य पार्श्वे ॥२४॥

सीता—(सगद्गदम्) वत्स! [1]तए वि ण णिवारिदो दुक्खं वित्थरंतो अज्जउत्तो ? ।

रामः—([1]स्मित्वा) प्रिये ! का नाम तस्मादस्माकं दुःखनिवारणा ? । यस्य प्रत्युत—

अगाधे त्वद्वियोगाब्धौ लक्ष्मणस्य निमज्जतः ।
हस्तालम्बं [2]पुनर्यच्छन् विसस्मार स्वमप्यहम् ॥ २५ ॥

सीता—(दृष्ट्वा) [2]अज्जउत्त ! को एस विसेसमणोहरो विय[3] अवलोईयदि ? ।

रामः—देवि ! तदिदं [4]पवित्रैकपात्रमाश्रमपदम्, यत्र किल बलिच्छलनादनन्तरं स भगवान् वामनमूर्तिः विश्वरूपस्तूयमानः स्वयमागत्य दैत्यगुरुणा भृगुपुङ्गवेनैवमुपालब्धः—

स्वामिन्नब्धिसुतापते ! गमयता पातालमूले बलिं,
स्वस्याऽयं भवता लघुत्वपटहः स्पष्टीकृतः केवलम् ।
यस्मादेष पुरः स्थितेऽर्थिनि जगन्नाथे त्वयि क्षोणिका-
ऽमात्रोत्सर्जनलज्जया स्वयमधो गन्तुं [5]ततोऽधीच्छति ॥ २६ ॥

लक्ष्मणः—(सचमत्कारम्) अहो ! महती काऽपि तस्य दानवपतेर्दानरसिकता । तथाहि—

कमलावरकरकमले बलेरिलामण्डलं तदा ददतः ।
आनन्दाश्रु प्रथमं पपात, दानोदकं पश्चात् ॥ २७ ॥

सीता—(दूरादवलोक्य) [3]अज्जउत्त ! को एस कप्पासकडप्पपंडुरसिहरसहस्सो महागिरी पिक्खीयदि ? ।

रामः—प्रिये ! सोऽयं सर्वपर्वतसार्वभौमः पार्वतीपिता हिमवान्नाम । तथाहि—

तावल्लावण्यलक्ष्मीं कलय[6]ति मलयस्तावदाविः[7]करोति,
क्रौञ्चश्चेतोहरत्वं हरधरणिधरस्तावदभ्ये[8]त्यभिक्षाम् ।

---

१ वत्स ! त्वयाऽपि न निवारितः दुःखं विस्तारयन् आर्यपुत्रः ? ।
२ आर्यपुत्र ! क एष विशेषमनोहर इव अवलोक्यते ? ।
३ आर्यपुत्र ! क एष कर्पाससमूहपाण्डुरशिखरसहस्रः महागिरिः प्रेक्ष्यते ? ।

---

1 स्मृत्वा दे० । 2 मुहुर्य' भा० । 3 'य पलो' भा० । 4 पवित्रैकपात्रत्वमाश्र' भा० । 5 ततोऽपीच्छ' भा० । 6 'यतु दे० । 7 'करोतु दे० । 8 'भ्येत्वभि' दे० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तावद् गर्वं [1]गुर्वक्षितिभृदपि दधात्युद्धतत्वं च विन्ध्य-
स्तावद् धत्ते धरागांपतिरतिरुचिरो दृश्यतेऽसौ न यावत् ॥ २८ ॥

लक्ष्मणः—आर्य ! स किल तादृशः स्मरशङ्करयोरत्र शैलेन्द्रशिखरे निजनिज-प्रभावाविर्भावः संवृत्तः श्रूयते ।

रामः—अथ किम् ? ।

सुग्रीवः—(स्मृत्वा सचमत्कारम्) अहह ! शृङ्गारशान्तरसैकनिवासयोरनयोर-निर्वचनीयः कोऽपि शक्तिसौरभातिरेकः । तथाहि—

स श्रेयसे भवतु भालविलोचनान्त-
पातेन यो रतिपतिं कृतवाननङ्गम् ।
सोऽप्यस्तु येन गिरिजाख्यममोघमस्त्रं,
मुक्त्वा कृतः स विभुरर्द्धशरीरशेषः ॥ २९ ॥

रामः—(अपवार्य सीतां प्रति)

देवः शिवो जयति वक्षसि दोर्युगेन,
न्यञ्चत्कुचं गिरिजया परिरभ्यमानः ।
बध्नन्ननङ्गविशिखव्रणवेदनाप-
नोदाय पट्टकमिवौषधपिण्डगर्भम् ॥ ३० ॥

(सीता सलज्जा किञ्चित् स्मयते ।)

रामः—(दूरादवलोक्य सहर्षं पुष्पकं प्रति) हे देवयानप्रधान ! किञ्चिद् दक्षिणतः समुपसर्प, यथा प्रयागतीर्थावलोकनेन सफलीकरोमि निजनेत्र[2]युग्मम् इति ।

(सर्वे तथा विमानगतिं नाटयन्ति ।)

लक्ष्मणः—(दृष्ट्वा सविमर्शम्) कोऽसौ व्यावर्त्तितग्रीवमस्मान्मुहुर्मुहुरवलोकयन्न-योध्याभिमुखं परिक्रामति ? ।

विभीषणः—(वीक्ष्योपलक्ष्य च) अयं तावद् दशमुखमित्रस्य मथुराधिपतेर्लवणस्य प्रसादपात्रं कार्पटिकः । (पुनः सवितर्कम्) यथाऽयमेतां दिशमुपसर्पति तथा लवणेनापि नियतमितः क्वापि गतेन भवितव्यम् ।

1 तु पूर्वं भा० । 2 युगलम् भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

(ततः प्रविशति यथानिर्दिष्टः कार्पटिकः ।)

कार्पटिकः—(ऊर्द्ध्वमवलोकयन्) कथमेते नु प्राप्ता एव विमानस्थिताः काकुत्स्थप्रभृतयः ?। तद् यावदमी प्रयागावलो[1]कनकुतूहलेन विलम्बन्ते तावदहं सत्वरमयोध्यां गत्वा समीहितं साधयामि । (इति द्रुततरं गच्छति ।)

रामः—(सुग्रीवविभीषणौ प्रति) वयस्यौ ! भगवन्तमिह भरद्वाजमुपस्थाय तदनुमताः साकेतसीमानमवतरिष्यामः ।

(इति निष्क्रान्ताः)

कार्पटिकः—(विमृश्य) सोऽहमिदानीं दानवत्वापह्नवार्थमृषिकुमारवेषं करोमि । (इति तथाकृत्वा पुरो विलोक्य च) सेयमयोध्यापुरी । (पुनः सविस्मयम्) एषा राजन्यसैन्यैरुपरुद्धेव निरीक्ष्यते, तदेतत्कारणमितः समागच्छतः पुरुषादवगच्छामि । (इति तमुपसर्पति ।)

(प्रविश्य)

पुरुषः—(पुरो विलोक्य) अये ! मुनिकुमारक इव भगवन् ! नमस्ते ।

[2]**कार्पटिकः**—स्वस्ति भवते । भद्र ! किंनिमित्तमियं नगरी गरीयसा सैन्यसन्दोहेन परितः परीता सम्प्रति वर्त्तते ? ।

पुरुषः—श्रूयताम्—

श्रुत्वा सीताहरणमरुणोत्पत्तितः पक्षिराजा-
दाजिं कर्तुं सपदि भरतः कोणपेन्द्रेण सार्द्धम् ।
राज्ञामाज्ञाप्रवणमनसां प्रेषयामास दूता-
नभ्याहूताः पुरपरिसरावासिनः सन्ति तेऽमी ॥ २१ ॥

[3]☞ **कार्पटिकः**—(स्वगतम्) अहो ! सौहार्दं दाशरथीनाम् ।

पुरुषः—किंनिमित्तमिहागमनं उत्सुकतानिवेदितव्याकुलीभावस्य महाभागस्य ? ।←

कार्पटिकः—भग[4]वतः कुम्भसम्भवस्याऽऽदेशेन भरतस[5]न्दर्शनार्थम् ।

पुरुषः—नायमयोध्यायाम्, किन्तु नन्दिग्रामे । तन्मयैव सह तत्र कुमारसन्दर्शनार्थं गम्यतामिति ।

1 °कनविनोदेन भा० । 2 मुनिकुमारकः दे० । 3 दृश्यतां पत्रं १५ टिप्पणी २ । 4 °वन्नितः दे० । °वन्नतः भा० । 5 °सन्देशना° दे० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

(उभौ परिक्रामतः ।)

कार्पटिकः—(सविमर्शमात्मगतम्) निश्चितमसौ राजकुलव्यापृतः, तदिमं वार्त्तयामि । (प्रकाशम्) भद्र ! का नाम रामलक्ष्मणयोरिह प्रवृत्तिः ? ।

पुरुषः—(सखेदम्) यया द्रोणपर्वता[1]भिवर्त्तिहनुमन्निवेदितया वार्त्तया सकलमप्यार्त्तं रघुराजकुटुम्बकं जीवितसन्देहे वर्त्तते ।

भरतस्तु—

श्रुत्वा लक्ष्मणवक्षो रक्षोराजेन विक्षतं शक्त्या ।
निन्दति निजहृत्पिण्डं शतखण्डमजायमानमसौ ॥ ३२ ॥

कार्पटिकः—(सोद्वेगमिव) अद्यापि तथैव दुर्दैवदण्डः काकुत्स्थकुलस्योपरि भ्राम्यति ? । ततस्ततः ? ।

पुरुषः—अथ देव्यौ कौशल्यासुमित्रे शोकव्याकुलतायत्तचित्ते साकेतात् समागतवत्यौ धैर्यावष्टम्भविरचिताकारसंवरणेन भरतेन प्रतिबोध्य पुनस्तत्रैव प्रेषिते ।

कार्पटिकः—कैकयराजात्मजाऽपि तत्र समागता ? ।

पुरुषः—नहि नहि ।

कार्पटिकः—कुतः ? ।

पुरुषः—न खलु रामभद्रप्रवासवासरादारभ्य भरतो निजमातुर्मुख[2]मवलोकते ।

कार्पटिकः—(सचमत्कारम्) अहो ! लोकापवादभीरुता काऽपि दिलीपान्वयस्य ।

पुरुषः—(पुरो विलोक्य) तदिदं नन्दिग्रामोद्यानम्, यत्रासौ रत्नसिंहासनाधिरोपितरामभद्रपादुकाग्रतः कुशविष्टरोपविष्टो जटावल्कलधारी सुमन्त्रद्वितीयः कुमारो मैत्रावरुणप्रहितेन जानूकर्ण्यनाम्ना मुनिशिष्येण समं सम्भाषमाणोऽस्ति । तदिह प्रविशावः । (इति तथा कुरुतः ।)

(ततः प्रविशति यथानिर्दिष्टो भरतः सुमन्त्रो जानूकर्ण्यश्च ।)

भरतः—(सप्रश्रयं [? मुनि] शिष्यं प्रति) ब्रह्मर्षे ! किमादिष्टमाराध्यपादैः ? ।

जानूकर्ण्यः—कुमार ! किमपि ध्यात्वा[3] भगवानित्यादिदेश–यदवश्यं भवद्भिर्ल[4]ङ्काभिमुखप्रयाणोत्सुकैरप्यस्मदागमनं यावत् प्रतीक्षणीयम् ।

---

1 °ताभिवानवर्ति° दे० । 2 °खमालो° भा० । 3 °त्वा तत्रभवतेत्यादिष्टम्–यद° भा० । 4 °ङ्कागमनप्रया° दे० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

भरतः—शिरस्यारोपितेयं कुलगुरोराज्ञा । परं भवताऽपि तथा यतितव्यम् यथा ते तत्रभवन्तस्त्वरितमागत्य मामनुगृह्णन्ति ।

मुनिशिष्यः—ओम् (इत्युक्त्वा निष्क्रान्तः ।)

कार्पटिकः—(पुरुषं प्रति) भद्र ! निष्क्रान्तस्तावदयम् । तत् कालक्षेपाक्षममिहायातमावेदय मां कुमाराय । (इत्युपसर्पतः ।)

पुरुषः—(भरतं प्रणम्य) सोऽयमगस्तिमहर्षिप्रेषितो मुनिपुत्रकः किञ्चिदाख्यातुकाम इतो वर्त्तते ।

भरतः—(अनाकर्णितकेन सवितर्कं[1] चिन्तयन्)

व्यावृत्त्य रामभृत्यः स कपिर्लङ्कां गतो भवेद् भूयः ।
तैरौषधैरशल्यः कल्यः स्याल्लक्ष्मणः किन्तु ? ॥ ३३ ॥

पुरुषः—कथं नावधारितम् ? । (पुनस्तदेव कथयति)

भरतः—(श्रुत्वाऽवलोक्य च) कथमसौ करभको मुनिपुत्रकमेतमुपेतमावेदयति ? । (इति सबहुमानमुपवेशयति ।)

भरतः—तपोनिधे ! किमसुस्थितमना इव[2] विलोक्यसे ? ।

कार्पटिकः—(सोद्वेगमिव) कुमार ! कुतः सौस्थ्यमीदृशे दैव[3]दुर्विपाके ? तथापि गुर्वादेशा[4]यत्ततयाऽऽवेदयितुमागतोऽस्मि । श्रूयताम् —

सीताकृते राघवलक्ष्मणाभ्यां, कृत्वा रणं कोणपचक्रवर्त्ती ।
विमानमारुह्य च पुष्पकाख्यं, पुरीमयोध्यामयमभ्युपैति ॥ ३४ ॥

तदिह भवद्भिरवहितैर्भवितव्यम् ।

(सर्वे श्रुत्वा व्याकुलतां नाटयन्ति ।)

भरतः—(सुमन्त्रं प्रति) कथमप्रतिविधायैव तौ राजपुत्रावागमिष्यति राक्षसाधिपतिः ? ।

कार्पटिकः—(सबाष्पम्) प्रतिविहितं दुष्टदैवेन (इत्यधोमुखस्तिष्ठति ।)

सुमन्त्रः—(साश्रम्) हन्त ! व्यक्तमावेद्यताम् ।

---

1 °तर्कं चिन्तितम् दे० । 2 इवावलोकसे ? भा० । 3 दुर्दैवविपाके भा० । 4 °शात् तदावे° भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कार्पटिकः—तथैवाऽऽस्ते ।

भरतः—(बलाद् बाष्पं निगृ[1]ह्य सुमन्त्रं प्रति) आर्य ! न ह्यनिष्टमेवंविधाः स्पष्टमावेदयन्ति, शेषं स्वयमभ्यूहनीयम् ।

सुमन्त्रः—(सनिर्वेदमाकाशे) हा कुमारौ रामलक्ष्मणौ ! हा वत्से वैदेहि ! कीदृगवस्था वर्तते सम्प्रति युष्माकम् ? । विश्राण[2]यन्तु पुनरात्मदर्शनं कण्ठगतजीवितस्य जीवलोकस्य ।

भरतः—(सावष्टम्भम्) आर्य ! न खलु विलपत्सु विधिरनुक्रोशति, तदलमिदानीं विषादेन। (पुनः करभकं प्रति) रे त्वमपि मा रोदीः, न हि बाष्पनिपातेन शत्रवः साध्यन्ते। तदानीयतां शरासनम् । गत्वा च निवेद्यतामाहूतायातपार्थिवपरिवृताय शत्रुघ्नाय, यदिहायाति जितकाशी निशाचरपतिः तद् भवद्भिरुदायुधैः सन्नद्धसैन्यैः स्थातव्यम् ।

पुरुषः—यदादिशति देवः । (इत्यभिधाय निष्क्रान्तः ।)

सुमन्त्रः—हा कुमारौ रामलक्ष्मणौ ! (इत्यादि पुनः शोचति ।)

कार्पटिकः—(सुमन्त्रं प्रति) आर्य ! कृतं शोका[3]वेगेन । यतः—

यस्ता[4]दृक् कृतवान् निजाग्रजकृते शोच्यः स किं लक्ष्मण-
स्तद्भक्तेरुचितं विधाय च निजां रामोऽत्यजद् वाच्यताम् ।
वैदेही तदनु प्रविश्य दहने मुख्या सतीनामभूत्,

भरतः—(स्वं प्रति)

गर्हामर्हति नापरः सति महापापैकपात्रे मयि ॥ २५ ॥

(पुनः सुमन्त्रं प्रति सावष्टम्भम्) आर्य ! किमतः परं विरुद्धो विधिरस्माकं करिष्यति ? । यतः—

दैवेन दर्शिता याऽद्य रामलक्ष्मणयोर्गतिः ।
सहान्तःपुरपौराणां सैवास्माकं भविष्यति ॥ २६ ॥

(प्रविश्य)

पुरुषः—तदेतद् धनुः । (इति समर्प्य) कुमार ! सज्जीकृतसकलसैनिकः कुमार-

---

1 °गृह्णन् सु° भा० । 2 °णयत पुन° भा० । 3 °कावेशेन दे० । 4 °स्तावत् कृ° दे० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

शत्रुघ्नः श्रुताऽपत्यवार्त्तं देव्यौ कौशल्यासुमित्रे कृतकृशानुप्रवेशनिश्चये प्रतिबोधयितुं सरयूसरितं प्रतिष्ठमानोऽस्ति ।

भरतः—(सवैलक्ष्यं श्रुत्वा सुमन्त्रं प्रति) आर्य ! सकलमपि तावद् दिलीपकुलमेकेनैव पथा गमयितुमारब्धमधुना दुर्दैवेन । (पुनः सावष्टम्भम्) भवतु । को विरोधः ? । (इति चापमारोपयति ।)

कार्पटिकः—(सहर्षमात्मगतम्) सा[1]धितं स्वात्मसमीहितम् । रामसमागमनसमयश्च प्रत्यासन्नः तद् गच्छामीति । (प्रकाशम्) कुमार ! नातः परमहमालोकितुमुत्सहे । (इत्युक्त्वा निष्क्रान्तः ।)

(ततः प्रविशन्ति विमान[2]स्थिता रामभद्रादयः ।)

रामः—(दूरादवलोक्य सहर्षम्) वत्स लक्ष्मण ! सेयं भग[3]वती ग्रहराजान्वयराजधानी सरयूसलिलपवित्रीकृतपरिसरा पुरः प्रेक्ष्यते । तत् प्रणम्यतामियम् ।

(सर्वे प्रणमन्ति)

लक्ष्मणः—आर्य ! चिरकालविलोकिताऽप्यसौ नगरी तातमन्तरेण न तथा प्रमोदमुत्पादयति ।

रामः—(स्मृत्वा सगद्गदम्) वत्स ! नमस्तस्मै निरुपमवात्सल्यवते सुत्राममित्राय महाराजाय । तथाहि—

भग्नं धनुस्त्रिनयनस्य यथाऽर्हवर्णा-
दाकर्ण्य तत् प्रमदगद्गदया गिरा यः ।
अन्तःपुरं स्वयमुपेत्य मदीयमातु-
र्देव्याः पुरः सरभसं कथयाञ्चकार ॥ ३७ ॥

सुग्रीवः—(समन्तादवलोक्य साश्चर्यम्) कथमयोध्यायाः परितः सन्नद्धानि सैन्यानीव विलोक्यन्ते ? । तथाहि—

वाहानां निवहैर्गणैश्च करिणां व्यूहै रथानां तथा,
पत्तीना[4]मपि पङ्क्तिभिस्ततमिदं नोर्वीतलं लक्ष्यते ।

---

1 साधितं तु समी° दे० । 2 °नस्था राम° दे० 3 °वती महाराजा° भा० । 4 °नामिव प° भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कल्पान्तोद्धतमेघगर्जितमहाऽपस्मारविस्मारिणः,
किञ्चैते रचयन्ति विस्म[1]यरवं भेरीरवा भैरवाः ॥ ३८ ॥

तत् किमेतत्? इति ।

(सर्वे साश्च[2]र्यमालोकयन्ति ।)

विभीषणः—(स्मृत्वा सचमत्कारं रामं प्रति) यथा स कार्पटिकनामा लवणप्रणिधिरयोध्याभिमुखं गच्छन्नवलोकितः, तथा तन्नाथेन नियतमिमां पुरीमुपरुद्धामहं सम्भावयामि ।

रामः—([3]सुविमृश्य) । तदेतदुपपद्यत एव, परं वत्सशत्रुघ्ने पुरीपालननिघ्ने कुतो लवणविक्रमस्यावकाशः? ।

सौमित्रिः—खल्वसौ (पुनः सरयूतटमवलोक्य साशङ्कम्) कथमेते मातरौ वह्निप्रवेशाभिमुखे इतो विलोक्येते? । तन्न कुशलं वत्सयोर्भरतशत्रुघ्नयोरिति ।

(सर्वेऽपि विशेषव्याकुलतां नाटयन्ति ।)

सीता—(दट्ठूण सभयम्) [1]भयवदीओ रहुकुलदेवदाओ ! तुम्हाणं पसाएण दहरहसुआणं दुरिदमंदरीयदु ।

(रामः सीदति ।)

सर्वे—सम्यगिदमवगमिष्यामः । (इति विमानाग्रतः परिक्रामन्ति ।)

विभीषणः—(रामं प्रति) देव ! सोऽयमस्माकं चिरपरिचितः सपरिवा[4]रो मथुराधिपतिः, तदेनमुपलक्षयामि । (इति गदामादायोत्थितः सर्वतः पश्यति ।)

भरतः—(ऊर्ध्वमवलोक्य ससम्भ्रमम्) आर्य सुमन्त्र ! तदिदं विमानम् । अयं च राक्षसाधिपतिरिहाऽऽगच्छति । तदिदानीमवलोक्यतामस्मदीयमाचरितम् । (इति धनुषि शरं धत्ते ।)

विभीषणः—(दृष्ट्वा) कोऽसौ जटावल्कलधारी तपोधनो धनुःपाणिः सक्रोध इव मुहुर्मुहुरस्मानवलोकयति? । भवतु । इत [5]एनमवगच्छामि । (इति विमानेनोपसर्पति ।)

सुमन्त्रः—कुमार ! नियतं भगवता मैत्रावरुणेन राक्षसपतेरागमनमवगच्छता लङ्कागमनार्थं मन्थरीकृतो भवान् ।

---

१ भगवत्यो रघुकुलदेवताः ! युष्माकं प्रसादेन दशरथसुतानां दुरितमन्तरीयताम् ।

---

1 °यभरं भे° भा० । 2 °श्चर्यमवलो° भा० । 3 (विमृशति) दे० । 4 °वारोऽपि मथुराधिपतिः, तावत् तमुप° दे० । 5 एव ग° भा० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

भरतः—किमपरिज्ञातमात्मदशाम् ?।

विभीषणः—(समीपमुपेत्य भरतं प्रति) भोस्तपोधन! किमर्थोऽयं व्रतचर्याविरुद्धो धनुःपरिग्रहः ?।

भरतः—(सावेशम्) राक्षस ! क्षणमत्रैव तिष्ठ। शृणु यथा तव कथयाम्येष निःशेषं धनुर्धारणकारणमिति ।

विभीषणः—(दृष्ट्वा [1]साश्चर्यम्) कथमयमकारणे मां प्रजिहीर्षति ?। (इति गदां दर्शयन्)

तपस्विनि कथं पूर्वमस्त्रं मुञ्चामि तु त्वयि ?।
युद्धे यद् दुःसहत्वस्य साक्षिणौ रामलक्ष्मणौ ॥ ३९ ॥

भरतः—(पुनः सावेशम्) आः ! किं ब्रूषे ? "युद्धे यद् दुःसहत्वस्य साक्षिणौ रामलक्ष्मणौ" तदिदानीमनुभवत्वस्य कर्मणः फलम् । (इति बाणं मोक्तुमिच्छति ।)

(प्रविश्य)

वशिष्ठः—(भरतं प्रति) वत्स ! कृतं कृतममुना निर्बन्धेन । मुच्यतां चापम् । आदीयतामर्घपात्रम् । दिष्ट्या स एष विमानाधिरूढो रामभद्रः कुशली सीतालक्ष्मणाभ्यां सह सम्प्राप्तः । अयं च राक्षसाधिपतिर्विभीषणः । कपीश्वरः सुग्रीवश्चायम् (इति दर्शयति ।)

भरतः—(वशिष्ठं प्रणम्य सानन्दम्) भगवन् ! भवदानने[2]न्दुविनिर्गतेन रघुकुल-कुशलप्रवृत्तिपीयूषप्रवाहेन पुनरुज्जीविताः स्मः । (नेपथ्याभिमुखमवलोक्य) कस्कोऽत्र भोः!?, समानीयतामर्घपात्रम् ।

(प्रविश्य)

पुरुषः—देव ! तदेतत् । (इत्यर्घपात्रं उपनीय धनुरादाय निष्क्रान्तः ।)

सुमन्त्रः—(सहर्षम्) करभक ! सत्वरमिहाऽऽकारय देव्यौ शत्रुघ्नं च ।

करभकः—यदादिशति[3] आर्यः । (इत्युक्त्वा द्रुतं निष्क्रान्तः)

विभीषणः—(सविस्मयं वीक्ष्य रामं प्रति) देव ! परिभाव्यतामितः। कोऽप्यसौ तापसश्चापकोपौ परित्यज्य सप्रमोदमर्घपात्रं पुरस्कुर्वन्नस्माकमभिमुखमभ्येति ।

लक्ष्मणः—(उत्थायावलोक्य च सहर्षं रामं प्रति) देव ! देव ! दिष्ट्या वर्धसे ।

---

1 (सामर्षम्) भा० । 2 °न्दुदर्शनवि° दे० । 3 °शति देवः दे० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सोऽयमार्यो भरतः सार्घपाणिर्भगवन्तं वशिष्ठ[1]मग्रेकृत्य भवन्तमभ्युत्तिष्ठति ।

रामः—(श्रुत्वा सानन्दविस्मयम्) वत्स लक्ष्मण !

इतः कृतचिते देव्यावितः संवर्मिता चमूः ।
इतश्च भरतः प्रीत्या समभ्येतीति को विधिः ? ॥ ४० ॥

भवतु, सर्वमिदानीं व्यक्तीभविष्यति । (इति सर्वे विमानावतरणं नाटयन्ति ।)

भरतः—(सरभसं राममुपेत्य) देव ! सोऽयमगृहीतदुःखसंविभागो भरतः प्रणमति ।

रामः—(सरभसं भरतमुत्थाप्याऽऽलिङ्ग्य च वशिष्ठं प्रति) भगवन्! अयमचरमो दाशरथिः प्रणमति ।

वशिष्ठः—वत्स ! कल्याणभाजनं भव । (सीतां दू[2]रस्थां प्रणमन्तीं प्रति) वत्से ! चिरकालमविधवा[3] वीरप्रसविनी च भूयाः ! (लक्ष्मणविभीषणसुग्रीवांश्च प्रणमतः प्रति) वत्साः ! विजयध्वमिति ।

(सर्वे यथोचितं समुदाचरन्तो हर्षाश्रुवर्षमभिनयन्ति ।)

रामः—(सुमन्त्रं प्रति) आर्य ! कथय, कथमेष सैन्यविन्यासः ? कथं देव्योरयं परुषक्रमः ? ।

सुमन्त्रः—देव ! [4]सम्पातिप्रतिपादितसीतापहारप्रवृत्तिना कुमारभरतेन निवेदितं भवदत्याहितमाकर्ण्य देव्योरयमनुचितारम्भः ।

विभीषणः—(विमृश्य) निश्चितं तस्यैव कार्पटिकस्य दुर्नाटकमेतत् ।

(प्रविश्य)

करभकः—(रामं प्रणम्य) स्वामिन् ! इमे देव्यौ कौशल्यासुमित्रे कुमारशत्रुघ्नेन विनिर्दिश्यमानमार्गे सानन्दौत्सुक्यमितः समागच्छतः ।

रामः—(ससम्भ्रमम्) कथं देव्यौ स्वयमिहाऽऽगच्छतः ? । तदुपसर्पामि । (इति तथा करोति ।)

(ततः प्रविशन्ति प्रमोदातिशयमभिनयन्त्यौ कौशल्यासुमित्रे शत्रुघ्नश्च ।)

---

1 °ष्ठं पुरस्कृत्य भा० । 2 दूरस्थितां प्र° भा० । 3 °वा पुत्रप्र° भा० । 4 सम्प्रति प्रति° दे० ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

कौशल्या—(रामलक्ष्मणौ निरीक्ष्य सुमित्रां प्रति) [1]सहि सुमित्ते ! चिरयालदो वि एयाणं पुत्तयाणं मुहयंदमाणंदबाप्पप्पवाहपिहिदलोयणाणं खु फुडं पिक्खामि ।

सुमित्रा—[2]देवि ! अहं पि त्ति ।

(उभे परिक्रामतः ।)

रामः—(सरभसमुपेत्य) अम्ब ! प्रणमामि । (इति कौशल्यां प्रणम्य सुमित्रां प्रणमति ।)

(लक्ष्मणोऽपि तथाकरोति ।)

देव्यौ—(पुत्रावालिङ्ग्य शिरस्याघ्राय च) [3]पुत्तय ! तुम्हाणं सव्वाण वि सुहसंजोयरमणिज्जं चिरयालं जीविदं भोदु ।

(सीताऽपि समेत्य नामग्रहणार्थं बाष्पमुत्सृजन्ती देव्यौ प्रणमति ।)

देव्यौ—(सीतामालिङ्ग्य) [4]वत्से ! वीरजणणी होधि ।

सुग्रीवविभीषणौ—(दृष्ट्वा) नियतमेते रामलक्ष्मणजनन्यौ । (उपेत्य प्रणमतः ।)

(देव्यौ सविस्मयमालोकेते ।)

रामः—(सुग्रीवं दर्शयन्)

[..........................,
..........................।
(बिभीषणं दर्शयन्)]
नक्तञ्चराधिपतिरेष बभूव भूयो,
मन्दोदरीदयितविक्रमबद्धसेतुः ॥ ४१ ॥

देव्यौ—(सहर्षम्) [5]परमेसरस्स सहस्सरस्सिणो पसाएण अम्हेहिं दुवेहिं अहिणवं-पुत्तजुअलं समासादिदं । ता एदं पि सुहसंपत्तिजुत्तं चिरयालं नंददु ।

---

१ सखि सुमित्रे ! चिरकालादपि एतयोः पुत्रयोः मुखचन्द्रमानन्दबाष्पप्रवाहपिहित-लोचनयोः खलु स्फुटं पश्यामि ।

२ देवि ! अहमपि इति ।

३ पुत्रक ! युष्माकं सर्वेषामपि सुखसंयोगरमणीयं चिरकालं जीवितं भवतु ।

४ वत्से ! वीरजननी भव ।

५ परमेश्वरस्य सहस्ररश्मेः प्रसादेन आवाभ्यां द्वाभ्यां अभिनवं पुत्रयुगुलं समासादितम् । तदेतदपि सुखसम्पत्तियुक्तं चिरकालं नन्दतु ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

(भरतशत्रुघ्नावपि तयोः प्रणामं कुरुतः ।)

वशिष्ठः—(रामं प्रति) वत्स ! राज्याभिषेकाय मङ्गलमुहूर्त्तो वर्त्तते । तदेतदलङ्क्रियतां भद्रासनम् ।

रामः—आदेशः प्रमाणमिति ।

वशिष्ठः—(नेपथ्याभिमुखमवलोक्य) कस्कोऽत्र भोः ! ? । समानीयतामभिषेकसम्भारः ।

(प्रविश्य मङ्गलकलशहस्तः)

जानूकर्ण्यः—भगवन् ! अयमुपादीयताम् ।

(वशिष्ठः कलशमादाय रामस्याभिषेकं करोति ।)

(आकाशे देवदुन्दुभिध्वनिः पुष्पवृष्टिश्च ।)

सुमन्त्रः—(सानन्दमूर्ध्वमवलोक्य) कथमसौ वैमानिकलोको रामराज्याभिषेकमहोत्सवानन्दमाविःकरोति ? ।

रामः—(भरतं प्रति सोपरोधम्) वत्स ! चिरकालादनुशयकृशानुसन्तप्तां मध्यमाम्बामात्मीयमुखेन्दुदर्शनेन निर्वापयितुमर्हसि । (इति वशिष्ठमुखमुदीक्षते ।)

(भरतः सलज्जमधोमुखस्तिष्ठति ।)

वशिष्ठः—वत्स ! नातिक्रमणीयोऽयं राजादेशः ।

(रामः भरतं करे गृहीत्वोत्थातुमिच्छति ।)

[[1]........................]

वशिष्ठः—(रामं प्रति) वत्स ! कथय किं ते भूयः प्रियमनुकरोमि ? ।

रामः—(सप्रश्रयमञ्जलिं बद्ध्वा) भगवन् भास्करान्वयसौवस्तिक !

तीर्णः क्लेशार्णवः सोऽयं नावेव भवदाशिषा ।
स्वजनैः सङ्गतिश्चाभूदस्तु मे किमतः परम् ? ॥ ४२ ॥

[वशिष्ठः] तथाऽपीदमस्तु—

राजानो जनयन्तु कीर्त्तिकुमुदैरामोदिनीं मेदिनीं,
भूदेवाश्च तदापदामपनुदे वह्नौ वषट् कुर्वताम् ।

---

1 अत्रान्तरे कियांश्चित् सन्दर्भस्त्रुटितः सम्भाव्यते ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

वक्राम्भोरुहरङ्गभूमिविहरद्वाग्देवतामत्सरं,
श्रीरुत्सृज्य करोतु तेषु च रतिं मत्तेभविभ्राजिनी ॥ ४३ ॥

(इति निष्क्रान्ताः सर्वे ।)

॥ अष्टमोऽङ्कः समाप्तः ॥ छ ॥

॥ समाप्तमिदं उल्लाघराघवं नाम नाटकम् ॥ कृतिः श्रीसोमेश्वरदेवस्य ॥

☞ [1]अम्भोजसम्भवसुता वक्राम्भोजेऽस्ति वस्तुपालस्य ।
यद्वीणारणितानि श्रूयन्ते सूक्तिदम्भेन ॥ १ ॥

[प्रशस्तिः]

आसीद् भूमी....र्जरो गूर्जराणां, पूजापात्रं श्रीकुमारः पुरोधाः ।
यः प्राकारः पुण्यसंरक्षणार्थं, विप्राकारः कल्पितो वेधसाऽत्र ॥ १ ॥

यः कर्माणि च षड् गुणांश्च तनुते तद्भूर्भुवःस्वस्त्रयं,
कीर्तिर्यस्य वरास्यनिर्मलरुचिर्नो जातुचिन्मुञ्चति ।
शस्त्राविष्कृतिरध्वरे च युधि च श्लाघ्योज्जिहीते यतः,
सूत्रं यस्य हृदि स्फुरत्यविरतं ब्राह्मं च राज्यस्य च ॥ २ ॥

अरुन्धतीव कान्ताऽस्य पत्युराज्ञामरुन्धती ।
अभूदभि(? भीः) यया लक्ष्मीः साक्षाल्लक्ष्मीरिव क्षितौ ॥ ३ ॥

तदङ्गजः स्वाङ्गजलल्लशर्मप्रयुक्तया प्रार्थनया प्रणुन्नः ।
चकार सोमेश्वरदेवनामा, स(? रा)मायणं नाटकरूपमेतत् ॥ ४ ॥

प्रायो वयं वेदविचारपारवश्येन नाघेन तथाभियुक्ताः ।
दुर्गेऽत्र मार्गे तदपि प्रवृत्ताः, नोपेक्षणीयाः कविभिश्छलन्तः ॥ ५ ॥ ←

---

1 हस्तचिह्नान्तर्गतोऽयं प्रशस्त्यात्मको ग्रन्थसन्दर्भः दे० प्रतौ नास्ति ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

पद्यानां सूची

	पृष्ठे
अकुङ्कुमविलेपनाऽप्यनुकरोति	८३
अगाधे त्वद्वियोगाब्धौ	१४३
अजात्मजेन यद् राज्ञा	११
अद्याप्यस्मि कृतं मयेन	१२६
अनङ्गसञ्जीवनम्	८९
अनार्यमेतत् त्वयि नाऽऽर्य ! कर्म	७३
अनीदृशीमात्मदशां विमृश्य	३८
अनेन नीयमानाऽसौ	८७
अपि प्राणपरित्यागान्नाऽऽवां	१२७
अप्यल्पं बहु मानसेन	११
अप्येकं दधदानन्दं	१३६
अप्येकपितृजातानाम्	२३
अप्रदक्षिणचरान् कुरङ्गकान्	१३
अमुना सह बन्धुनाऽधुना	१२८
अम्भोजसम्भवसुता	१५५
अम्भोधिर्भगवानयं जयति यः	१३९
अयं रामः श्यामः कमलदलदीर्घाक्षि-	११४
अरुणसुत ! मदस्त्रपातजातैः	८९
अरुन्धतीव कान्ताऽस्य	१५५
अर्थाम्भोभिर्वरुणनगरी—	३८
अवदतामपि दुर्वचनं	६६
अविभाजितो जनन्या	९
अशोकश्रेणीयं	३०
असदपि सर्वं सदिव त्वयि	१२६
असौ वसन्तकालश्रीः	१००
अस्मत्समागमन—	६१
अस्मिन्निन्दुमुखि ! स्थले छलविदा	११९

	पृष्ठे
आदिष्टं रघुपुङ्गवेन तदिदं	१०६
आद्ये विद्याः कुलगुरुमुखात्	३७
आधाय स्कन्धबन्धे	५९
आः पौलस्त्य ! किमेवमुत्पुलकितः	१०७
आरूढाः करिणां स्कन्धे	६४
आरोप्यते गिरिशिरस्यपरो	१२०
आर्येण मोचादलकोमलेन	१४४
आसीद् भूमी [....]र्जरो गूर्जराणां	१५५
इतः कृताचिते देव्याचितः संवर्मिता	१५२
इयतैव विद्धि शुद्धं	७६
इयं मूर्त्यन्तरेण श्रीरियं	१३२
इयं सा हंसाङ्कीकलितकमला	३४
उच्चैः पश्यति चेत्	७२
उज्जीवितगतवानररिक्ताद्रोऽयं	१३८
उत्पत्तिर्विमले विरञ्चिनि	१२१
उत्पत्तिः शिशिरेतरद्युतिकुले	३७
उत्पद्य वंशे तुहिनेतरांशोरधीत्य	५३
उद्गर्जत्तूर्यरवरोषितरोमराजयः	१२१
उद्भूतं भरतस्य बन्धुविरहाद्	७३
उद्यतस्य वनं	९६
उन्मूलितद्रुमवना	१४
उपचया-ऽपचयौ भवतः	६४
उपनयति कुसुमगन्धं	२३
उभौ युवामुभावावां	१२७
एकं कौशल्यया	५
एकच्छत्रामवति जगतीं	४९
एको मधुरगम्भीरो	७४

	पृष्ठे
एतत् केतकगर्भपत्र—	२
एतयोर्दशरथप्रसूतयोराकृति—	११४
एतैः प्रवीरचरितैः	३७
एषा पुरी परिजनोऽयमियं	१०७
एषा वधूर्वत्स ! कलङ्कपङ्कं	१३३
एषा विशेषदयिता	४९
कमलावरकरकमले	१४३
कवचनिचयं मुञ्चन्त्येके	६८
का माता ? श्रवसोर्वचांसि	५४
कारणविकृतोऽपि पुनः प्रकृतिं	१३९
कालिन्दीतटगह्वरे विहरतो	१
कालिन्दि ! यस्त्वयि	६९
किं कुर्मः ? सकलं विलोकितमिदं	२६
किं गर्भ एव विलयं	४७
किमाख्यामस्तेषामविषयमनोभिः	३६
किं याचते तातमुखेन माता	४८
किं वाचाल ! करोषि रे	८१
किष्किन्ध इत्यभिधया धरणीधरोऽयं	१४२
किष्किन्धां व्रज निजबान्धवेन	१२८
कीराद्यैः पञ्जरक्षिप्तैः	६०
कुमारमातुरङ्गे स्यात्	८६
कुर्यादिदं न भरतोऽपि	५७
कुर्वन् करैः क्षितिगतोऽपि	१४
कुर्वाणः कपिना परेण कलहं	१०५
कुर्वाणेऽपि विलक्षणां	१७
कृत्वा तपोधनतनुं	९९
केलिं कालिन्दि !	७०
केषामेष कशयति दशग्रीव !	११४
कैकेयीतनयः समं पृतनया	६९
कैर्नाम न प्रमुदितं	७३
कोपोत्कटस्य शकटेनं	११

	पृष्ठे
कौशल्यया नववधूः	१२
कौशिल्यया तदिदमुद्धृतविश्वशल्यं	९
क्रीडा मृगोऽयं मृगशावनेत्रे !	९४
क्षिप्तानां जलधिजले प्लवङ्गवृन्दैः	१४१
क्षिप्त्वा कक्षाभ्यन्तरे वानरेन्द्रं	१२३
खरात्मजोऽयं मकराक्षनामा	१२०
गङ्गा समुद्रदयिता धृता	१४०
गन्धर्वकन्याजननीकृशानुरुत्पादको	११२
गर्वान्धाः सति वीक्षन्ते	६४
गानैः किन्नरयोषितां	७०
गाहन्ते त्रितयमिदं	७०
गौरीपुत्रपराजयं	१९
घर्माम्भः सम्भवा श्रीर्विलसति	३३
घोरं दधानः परिघाभिधानमस्त्रं	१२०
चञ्चत्काञ्चनकान्ति—	९०
चन्द्रोऽह्नि पद्मं निशि	८४
चरितमिदमुदारं	३
चाटुकोटिघटनापरे पुरः	१०६
चूतैः कन्दर्पदूतैः	२४
छिन्नेषु मूर्द्धसु पुनश्च	१०९
जनकेन जनन्या वा	५४
जनयति कनकाधिकेन	७७
जन्येन राजन्यजनेन	११
जम्बूद्वीपस्याभितो	१४०
जय कदर्थितपार्थिवसन्तते !	१४
जय जय नयनाभिराममूर्त्ते !	७९
जयति जगति प्रौढामोदं	३१
जयतु जयतु रामः	१३७
जरसोऽपि जरा यत्र	२२
जरापराभूततनोस्तवाद्य	८८
जवराजिनि वाजिनि	११९

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

	पृष्ठे
जामिं सूपर्णखां यदेष	७९
जाम्बवानिति नवाम्बुदप्रभः	११२
जीमूतवाहनेन च शैलनेव	१२२
जीवन् ददे न वैदेहीं	११४
तत् पौरुषं किञ्चन यद् विचिन्त्य	१२
....तत्पौरुषं व्याहरन्	१२९
तदङ्गजः स्वाङ्गजलल्लशर्मप्रयुक्तया	१५५
तदेतद् दुःखमेकं मे	५७
तद् दूरेऽस्तु यदस्य	१३०
तद् बाहुवीर्यमवधीर्य	७८
तन्वीति चन्द्रवदनेति	८०
तपस्विनि कथं पूर्वमस्त्रं मुञ्चामि	१५१
तं मह घरं पि रण्णं	५७
तस्थे सुखमेव मया	४३
तस्मिन्नग्रे भृगुपतिरयं	१५
तस्याग्रजः खगभटस्य जटायुषोऽयं	१४१
तातस्तातः सा सवित्रि सवित्रि	२३
तानेव स्तुमहे महेशमहितां	६२
तापयत्यसुखवह्निना	६५
तामेतां विद्धि युद्धावनिम्	१३८
तावल्लावण्यलक्ष्मीं कलयति	१४३
तीर्णः क्लेशार्णवः सोऽयं नावेव	१५४
तैर्लक्षणैः सुचरितेन	९२
तोये शीते स्फीतबिम्बद्युतीन्दौ	३१
त्रिशिरः—खरदूषणादयस्ते	७८
त्वदधरमधुरं	३४
त्वदर्थिनं सम्प्रति मां	१०६
त्वद्दर्शनातृप्तविलोचनस्य	५
त्वन्निर्माणपरिश्रमः	९८
त्वं मे तात इवासि तत्	१२५
दधिमुख ! मुखे सेनायास्त्वं	१०८
दशवदनविनाशाद् दिक्पतीनां	१३४
दशशिरस्तनयस्त्रिशिराः	१२०
दिष्ट्या दृष्टः स	३०
दिष्टया मुञ्चत पुष्पवृष्टिममराः	१३१
दुःखाग्निदूनाऽपि तनुर्मनोज्ञा	११७
दुग्धस्निग्धजला तरङ्गतरला	३४
दूरान्निरस्य भरतेन	६६
दृष्टं वा यदि वा	९३
दृष्टिः स्पष्टं तटगतमपि	९३
दृष्ट्वा चिराद् दयितमस्तसमस्तखेदा	१३०
देवः प्रयत्नातिशयेन शङ्के	८५
देवः शिवो जयति वक्षसि	१४४
देवेन्द्राद् दशकन्धरं	७९
देवोऽयं दिवि	१४
देशं कृशाङ्गि ! हरिणाक्षि !	४५
देशे देशे ककुभि ककुभि	१२१
देशोऽयं दिशति	७०
दैवात् तत्र जगत्त्रयैकसुभटे	१३९
दैवाधीनो रावणस्योपकारः	७९
दैवेन दर्शिता याऽद्य	१४८
द्रष्टव्यं मुखमेतयोर्दयितयोः	५६
द्विगुणमरुणिमानं	२३
धत्तेऽधुनाऽपि भरतः पटलं	१३५
धर्मोऽसौ रक्षसां यत्	११८
धात्री प्रभूतधान्या यद्यपि	१३६
धारातीर्थे मरणं	८८
धीराणां दशस्कन्धरो भुरि सुरैः	१०५
धृत्वा मूर्धनि यत्	४६
....नक्तञ्चराधिपतिरेष बभूव भूयो	१५३
न क्रोधेऽपि वदत्यसावमधुरं	१०४
नदी मुदे स्तात् सरयूरियं मे	६७

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

	पृष्ठे
न दूत इति वध्यसे व्रज	१०८
न मयाऽस्ति समः पापी	९९
नरदेवोऽपि भूदेवो	११
नरपतिरितरोऽपि स्मर्यते	६
नवपरिणीता दुहिता	४
न स्त्रीत्व—मातृत्वभयं	६९
नाश्नाति किञ्चन, न केन	७२
नाऽहं लक्ष्मणमन्तरेण न	१२७
निबिडनिर्पीडननिगडितमुख—	१४२
निमीलिताक्षी गलदश्रुमिश्रां	११६
निर्जलं जाह्नवीस्नानमश्वमेधः	७०
निर्जितोऽसि निर्जरैव	८९
निर्मूलिताखिलनृपान्वयनामजाम—	११५
निर्विच्छेदच्छदसमुदयात्	३०
निवार्यमाणोऽपि स	१७
निवेदिते पार्थिवपुङ्गवान्ते	७२
निशाचराधीश्वर ! मुञ्च सीतां	८७
निष्कारणमधिरोहणम्	२४
निष्कारणं विगणिता किमियं	१३६
निस्त्रिंशदण्डदलितैः	१०७
नूनं प्रभूतास्वपि वाहिनीषु	१४१
नेत्रे निमीलय	७३
पम्पामपास्तदुरितां	१००
पराजितपुरन्दरं	८७
परिहर हरिणाङ्कं	८४
पश्चात्पतत्सु विशिखाहतिभिः	१२९
पाणिग्रहात् प्रभृति	४६
पाता पुलिन्दापयसां गिरेश्च	१११
पारियात्रगिरिपालनपात्रे	१११
पिता गन्ताऽरण्ये	५१
पिता दृष्टः श्लिष्टः	६५

	पृष्ठे
पुष्णातु प्रमदं प्रभुः	१३८
पुंसः पुराणस्य धनुः पुराणं	१७
प्रकटयति हृदयदाहं	६२
प्रचकितचकोरनयने !	७५
प्रतिकूले विधौ	४
प्रतिनिम्नगं प्रतिनगं	९५
प्रत्यग्रं तृणसंस्तरत्रयमिदं	६८
प्रत्यासीदति सङ्गरे प्रतिदिशं	१११
प्रथमं सीताहरणं	१००
प्रष्टव्योऽसि निशाचरेश्वर !	१०७
प्रागद्रितो द्रुतमपाकुरुते जपाभा	१९
प्राणापहारान्तमुशन्ति वैरं	१३०
प्राप प्राणितसंशयं रणमुखे	१२६
प्रायो वयं वेदाविचारपारवश्येन	१५५
प्रासादेऽत्र वसुन्धराधरपतेः	२०
प्रेतराजस्य संहारव्यापार—	११८
बालब्रध्नमरीचिजालकपिलः	१११
बालार्कबिम्बारुणवक्त्रकान्ति—	११९
बाले ! विलोक्य दिगन्तरमन्तरायो	३४
बालोऽपि प्रबलां निनाय	९
बूत्कारैर्बधिरां धरां विदधतः	११६
ब्रह्मचारिविजयार्जितकीर्ते !	१६
ब्रह्माऽस्त्रं मन्मथस्य	७७
भग्नं जीर्णं त्रिनयन—	२१
भग्नं धनुस्त्रिनयनस्य	१४९
भङ्क्त्वा भर्गशरासनं	२०
भवदानाख्याने द्वयमयति	६०
भवद्भीता सीता द्रुतमविशदग्नावथ	१३३
भास्वद्गोत्रचरित्रचित्ररुचिर	५८
भृत्यापराधं प्रभुरात्मदृष्टं	९१
भ्रातर्जातभयस्य	९१

	पृष्ठे		पृष्ठे
भ्रातश्चके भ्रमर ! भवता	३३	मौलौ बभार भरतः	७४
मध्ये तस्याः कोऽप्यनिर्द्धार्यरूप—	१४	म्लानं प्रिये ! माल्यमपि त्वदीयं	१३६
मन्ये महानन्दपदं तदेतन्नितम्बबिम्बं	१३२	यः कर्माणि च षड् गुणांश्च तनुते	१५५
मन्ये रामाय निर्माय	१३४	यत् पूर्वजैर्नृपतिभिर्मम	१५
मम प्रमदहेतुस्त्वं	९७	यत्र क्षमां दधति हन्त !	१३
मम वीक्रमभीतभर्तृकाणां	८५	यद्यप्यद्य व्युपरत—	६१
मयाऽद्य मोचादलकोमलाङ्गी	९९	यद् वन्द्यं जगतीभुजां	१०
मयि वीखरे सति त्वमन्यं	८५	यष्टङ्काराङ्कितनयनधनुर्दण्डतः	४
मयूरीणां रीणा	३१	यस्तादृक् कृतवान् निजाग्रजकृते	१४८
मलिनवसना निस्ताम्बूला	४५	यस्मिन् कार्यवशाद्	९७
मल्लीषु नोल्लसति	३२	यस्याऽऽस्ते मुखपङ्कजे सुखमृचां	३
महतीमप्यतिक्रम्य	८	यस्याः सच्चरित्रं त्रयेऽपि जगतां	१३२
महाग्निहोत्री द्रुहिणस्य पौत्रो	८०	याचे किञ्चित् तात !	५६
महोत्सवः पङ्कजिनीवनानां	१९	यातैव पातककथा .	६७
महोदरं पुरः पश्य	११८	या दध्रे हृदि वल्लभेत्यजनि	५८
मह्यं द्रुह्यतु न	१६	यावन्न राघवमसौ ग्रसते	१२४
माकन्देषु फलोदयादिह	३०	यावन्मूर्द्धनि मूर्द्धजाः पिकरुचि	३८
मातः क्षिते । तपन तात !	४९	युद्धावेशविशिष्यमाण—	१०८
मातर्मन्ये नगरी !	६०	युष्माभिर्यदुपकृतं न तस्य	१३५
मातर्महापातकघातदक्षे !	६७	येनैकेन शिलीमुखेन	१०१
मातर्मेदिनि ! देव दीधितिपते !	१३१	ये वानराः संयति तावकीनाः	१३४
मातुर्मन्मथजित्प्रसादनकथां	६४	रक्षोराजस्यायमुत्पातकेतुः	१४०
मातुश्च मन्थरायाश्च	६६	रथे स्थितोऽयं मृगराजकेतने	११९
मातॄणां तातपादानां	५५	रम्भायाः सुभगत्वमङ्गलतया	८०
मा भैषीर्भुजबलभीषितारिवीर !	१३	रम्या दिशां चतसृणामपि	७७
मायाकृतामपि मृगाक्षि !	१३८	राजानो जनयन्तु कीर्त्तिकुमुदैः	१५४
मुक्ता कृत्रिमपत्रकेलिरलकन्यासे	२५	राजा राजत्यनेनायं	३७
मुग्धाया अपि कान्ताया	३३	राजाऽसि प्रथमा तवैव	१०
मूर्त्तिर्भूमिभुवः स्वभावसुभगा	७९	राज्यश्रियं च जननीं	९३
मूर्द्धानं मधुजिन्मुखं	१	रामगेहिनि ! समेहि	९२
मूर्द्धानः शिवपूजनाय	६४	रामं प्रव्रजितं वने	६६
मूर्ध्ना बद्धजटेन	७४	रामेण स्थाणुचापं सपदि	४

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

	पृष्ठे
रे रक्षः! प्रतिपक्षतां	८९
रे रे क्षत्रियडिम्भ!	१६
लङ्कापुरीपरिभवे सति	१२०
लङ्कां विमुच्य सचिवैः	१०२
लङ्केन्द्रः स नवीन—	८
लङ्केन्द्रेणाहिणाऽहं निहत—	१०३
लङ्केश! त्रिदिवाङ्गनाः	१०२
लङ्केश्वरादजनि यः	११९
लब्धं तैर्नयनोत्पलद्वयफलं	१०
लभन्ते सौभाग्यं	३२
लीलोद्यानमिदं मुदे	२३
लोकम्प्रीणानपि निजगुणान्	२१
लोचनेन तव चारुपक्ष्मणा	१३७
वक्रं विधाय विधिना	२७
वक्राशयो वा सरलाशयो वा	१०३
वचसः स्थिरता दृशोश्चलत्वं	८४
वत्स! त्वयाऽस्मि विजयि	१२५
वत्सस्य वेत्सि भरतस्य	५७
वत्से भव! श्वसुरयोः	७
वनाय पुत्रद्वितयेऽपि	५७
वन्दे तव प्रवाहं तमसे!	६७
वप्तुर्विद्धि कुलं कलङ्कविकलं	४६
वप्तुः सत्यं भवतु वचनं	५३
वरौ पुरा कैकयराजपुत्र्या:	४८
वस्तुपाल! भवतो	७७
वार्त्तं निशाचरवरस्य	१०३
वाचालितः क्वचन	७१
वाणि! वक्त्रमिदमाशु	५१
वात्सल्यं तातपादानां	५
वारं वारं बकुलविटपी	९४
वारांनिधिं राक्षसराजधानीम्	११३
वालिविरचितं कक्षानिक्षेपं	१२३
वाहानां निवहैर्गणैश्च करिणां	१४९
विद्वत्तामुचितज्ञतामुपशमं	१८
विधिरयमविधेयस्तत्	६३
विनतो नाम रामस्य	११२
विना दिनाधिनाथेन	५५
विप्फुरउ ताव गव्वो सव्वाणं	११३
विप्रयोगेण शुष्काऽपि	१३६
विमानं व्योमाग्रे व्रजति	१३७
विश्वविश्रुतबलो नलनामा	११०
विश्वामित्रः पुत्रमादाय दोर्भ्यां	३६
विश्वालङ्कार! किं लङ्काराज्य—	१२८
वीर! व्यधीयत मया	६९
वीरश्रीशरणैर्निजप्रहरणैः	८७
वृक्षाः पुष्पफलोज्ज्वलाः	७०
वृद्धस्य वारिधेस्तस्य	१४०
वैदेहेन समाधिबाधित—	१३४
वैद्यराजोऽस्मि विद्यायाः	२८
व्यङ्गत्वं गमितः प्लवङ्गपतिना	१२४
व्यावृत्य रामभृत्यः स कपिर्लङ्कां	१४७
व्याहारैर्वा घटय	१७
शतकोटीघटितहृदये!	४८
शय्यायां स्वयमेत्य नोपविशति	२५
शरीरे वैराग्यं श्रयति	२१
शीतलं यदनिलं जनस्त्यजन्	३२
शुनः शेफो नाम्ना	३६
शुश्रूषा श्वशुरे ननान्दृषु नतिः	८
शौर्यक्रीतजगत्त्रयाधिपतिताचिह्नं	९
श्रीकाकुत्स्थकथातीर्थे	२
श्रीकृष्णाय नमस्तस्मै	१
श्रीखण्डशैलपवमान—	३२
श्रीरामभद्रादपि सात्त्विकाय	५९
श्रुत्वाऽपि शत्रुरिति तं च	११५
श्रुत्वा लक्ष्मणवक्षो रक्षोराजेन	१४६
श्रुत्वा सीताहरणमरुणोत्पाक्षितः	१४५

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

	पृष्ठे
श्रुत्वा सुमन्त्रवचनेन	६२
श्लाघ्यः स राघवयुवा	१३१
सकज्जलैरश्रुजलप्रवाहैः	९७
सङ्ग्रामाङ्गणनिर्जित—	११
सङ्ग्रामातिथिरेष वानरपतिः	१०५
सङ्ग्रामाय गृहीतधन्वशरधिः	११४
स जयति रघुराजग्रामणी	२
सत्कविकाव्यशरीरे	३९
सप्ताङ्गं मम राज्यं	९६
स मकरराशिरुदन्वन्	१४१
समीहिता कस्य न राज्यलक्ष्मीः	३८
समुद्धर वसुन्धरां	४४
सम्पातिः क्षितिपक्षतिः स	१४१
सम्बन्धेन नरेश्वरो	१२
सम्भावयतु भयं मयि	९१
सरस्वत्यां स्नानं	३६
सवित्रि तव सावित्री	४३
स श्रेयसे भवतु	१४४
स श्वसुरः सा श्वश्रूः	१२
सहैव हरिसेनया विनयनम्र—	११३
सा गता न पुनरेति	९५
सिञ्चसीव सुधया विलोचने	७७
सीताकृते राघवलक्ष्मणाभ्यां कृत्वा	१४७
सीता चित्तरतेरयं विषय	११५
सीतापतिर्विजयतां	१२८
सीतायामन्तिकस्थायां	९५
सीता रामं कुम्भकर्णं च शङ्के	१२४
सीतावलोकनकुतूहललोलुपस्य	१०२
सीते ! न वक्ति किमियं ?	९५
सीते ! भीतेः परिचितिरितः	८८
सुग्रीवः सूर्यसुतः	१०१
सुधाकरसुधारस	१९

	पृष्ठे
सुषेणः सोऽयं यः किमपि	११२
सृष्टिसूत्रमिदं	१९
सेयं नमो भगवतेऽद्भुत—	८२
सैव जीवितमित्येतद्	९५
सोऽहं किं न भवामि ?	१०६
सौधं तदेव नगरं	१०
सौधान्युद्धततोरणानि	४४
सौधेऽत्र नेत्रकमलैः	४४
सौन्दर्यं परमं समृद्धिरधिका	६१
सौन्दर्यापहृतप्रभञ्जनमनाः	१०२
संपत्तौ वा विपत्तौ वा	९
स्तुतेरनर्होऽद्य कृतोऽस्मि	६८
स्तुवन् विलक्षेण मुखेन रामं	१८
स्नात्वा तीर्थजलेन कोऽपि बटवः	१९
स्मृत्वाऽद्यापि यदीयबाहुपरिघ—	१३१
स्वर्गस्थितोऽपि स पिता	९४
स्वर्गौकसामधिपतिर्धृत—	३७
स्वस्ति स्वाश्रमतः पतिः	३५
स्वामिन्नब्धिसुतापते ! गमयता	१४३
स्वामिन् ! मुखं मखभुजामसि	७
हनुमान् न वेद खेदं	१२७
हंहो ! वृद्धतपोधनास्तदधुना	७५
हर्म्यं यस्य हिरण्मयः क्षितिधरः	११२
हाकारगर्भवदनाः	५९
हाकारगर्भितमुखेषु बलीमुखेषु	१३१
हुङ्कारैः प्रतिपर्वतप्रतिरवस्फारैर्दशानां	१२९
हुङ्कारोऽपि निराचकार	१०८
हृतां वा राक्षसैः	९३
हृदय ! हृदय ! दीने	९५
हे चन्द्रहास ! सहसा	९०
हे देवान्तक ! हन्तुमन्तकमपि	११५
हे प्रतीक्ष ! प्रतीक्षस्व	१२८
हे विमान ! पवमानमपि त्वं	१३७

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust